श्री विमलाचार्यकृत-

# त्रिषष्टिशलाकापुरुषचरित्रम्



संपादक

प. पू. गणिवर्य श्री जिनेशचन्द्रविजयजी म.सा.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्री वीतरागाय नमः

शासनसम्राट् श्री विजय नेमि-विज्ञान-कस्तूर-

चंद्रोदय-अशोकचंद्रसूरिभ्यो नमः

श्री नेमि-विज्ञान-कस्तूरसूरि ग्रंथमाला-३४

श्री विमलाचार्यकृत-

# त्रिषष्टिशलाकापुरुषचरित्रम्

(गद्य)

: दिव्याशिष :

प. पू. आचार्य वि. श्री चंद्रोदयसूरीश्वरजी म. सा.

प. पू. आचार्य वि. श्री अशोकचंद्रसूरीश्वरजी म. सा.

: आशीर्वाददाता :

प. पू. आचार्य वि. श्री अजितचंद्रसूरीश्वरजी म. सा.

प. पू. आचार्य वि. श्री सोमचंद्रसूरीश्वरजी म. सा.

: संपादक :

प. पू. पं. श्री निर्मलचंद्रविजयजी म. सा. ना शिष्य

प. पू. गणिवर्य श्री जिनेशचंद्रविजयजी म. सा.

: प्रकाशक :

श्री रांदेर रोड जैन संघ - सुरत

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

: द्रव्य सहायक :

**श्री बाबु अमीचंद पनालाल**

**श्री आदीश्वरजी जैन टेम्पल ट्रस्ट**

**वालकेश्वर - मुंबई**

**प्राप्ति स्थान**

| | |
|---|---|
| **श्री नेमि-विज्ञान-कस्तूरसूरीश्वरजी जैन ज्ञानमंदिर**<br>मेईन रोड, गोपीपुरा, सुरत-३९५००१.<br>C/o. अश्विनभाई संघवी. फोन-४१२८३३<br>निकेशभाई संघवी<br>फोन-४२२६११ | **श्री रांदेर रोड जैन संघ**<br>श्री शंखेश्वर पार्श्वनाथ जैन देरासर पेढी<br>अडाजण पाटीया, रांदेर रोड,<br>सुरत-३९५००९.<br>फोन-६८७४८८ |
| **श्री १०८ जैन तीर्थदर्शन भवन ट्रस्ट**<br>श्री समवसरण महामंदिर,<br>पालिताणा-३६४२७०<br>फोन-(०२८४८) २५२४९२ | **हर्षदभाई चुनीलाल शाह**<br>भारत ट्रेडींग कुं.<br>१११, टनटनपुरा स्ट्रीट,<br>खोजा गली, मुंबई-४००००९.<br>फोन-५००२१७५ |

: प्रकाशन दिन :

महा सुद-९, शुक्रवार दि. १५-२-२००८ वीर सं. २५३४

: मुद्रक :

भरत ग्राफिक्स

७, न्यु मार्केट, पांजरापोल, रिलीफ रोड, अहमदाबाद-३८०००१.

फोन : ०७९-२२१३४१७६, मो : ९९२५०२०१०६

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# પ્રકાશનની સાથે સાથે

**પ. પૂ. આચાર્ય શ્રી વિજયચંદ્રોદયસૂરીશ્વરજી** મ.સા. તથા તેમના ગુરુબંધુ **પ. પૂ. આચાર્ય શ્રી વિજય અશોકચંદ્રસૂરીશ્વરજી** મ.સા.એ એક દિવસ અમારા સંઘના આગેવાનોને બોલાવીને કહ્યું કે ગુરુ મહારાજનું જે જ્ઞાનયજ્ઞનું કાર્ય હતું તે આગળ ધપાવવું છે. અને તે માટે શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ ગ્રંથમાળા શરૂ કરવી છે. તે પણ તમારા શ્રીસંઘના નેજા હેઠળ કરવા ભાવના છે. તે વખતે હાજર રહેલ શ્રી સંઘના સભ્યોએ આ કાર્ય માટે સહર્ષ સંમતિ દર્શાવી અને આજ સુધી આ ગ્રંથમાળાના **૩૩** પુસ્તકો અમારા સંઘે પ્રકાશિત કરેલ છે. તેમાં તે બન્ને પૂજ્યોનો જ ઉપકાર માની શકાય. આજે તે બન્ને પૂજ્યોની ગેરહાજરીમાં પણ તેઓશ્રીના શિષ્યો—પ્રશિષ્યો તરફથી જે ગ્રંથ સંશોધિત સંપાદિત થાય તે દરેક ગ્રંથોનું પ્રકાશન પણ અમારા શ્રીસંઘના હસ્તક થશે. તે જાણી અમોને અતિ આનંદની લાગણી થાય છે ત્રિષષ્ટિશલાકાપુરુષચરિત્ર—**આ. શ્રી વિમલસૂરિજી**નું સંશોધન **પ.પૂ. આ. શ્રી વિજય ચંદ્રોદયસૂરીશ્વરજી મ.સા.**ના શિષ્ય **પ. પૂ. પંન્યાસ શ્રી નિર્મળચંદ્રવિજયજી મ.સા.**ના શિષ્ય **ગણિ શ્રી જિનેશચંદ્રવિજયજી મ.સા.**એ કરેલ છે. તેનો સંપૂર્ણ આર્થિક સહયોગ **બાબુ અમીચંદ પનાલાલ શ્રી આદીશ્વરજી જૈન ટેમ્પલ ટ્રસ્ટ વાલકેશ્વર** - મુંબઈ લીધો છે.

આ ગ્રંથનું ટાઈપસેટિંગનું કાર્ય **જગદીશ બારીયા** તથા મુદ્રણકાર્ય **ભરત ગ્રાફિક્સવાળાએ** અત્યંત ઝડપથી કર્યું છે.

ગ્રંથ પ્રકાશન માટે જ્ઞાનદ્રવ્યની રકમ આપનારા શ્રી સંઘો-ટ્રસ્ટોના અમો આભારી છીએ. અભ્યાસીઓ આનો ખૂબ ઉપયોગ કરે એ જ અભિલાષા.

લિ.

**શ્રી રાંદેર રોડ જૈન સંઘ**-સુરત

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# સંશોધનની પદ્ધતિ

ત્રિષષ્ટિશલાકાપુરુષચરિત્ર (અપૂર્ણ) **આ. શ્રી વિમલસૂરિજી** મ. સા.નું તેની બે તાડપત્રીની પ્રતિની ફોટોકોપી વિદ્વદ્વર્ય **મુનિ શ્રી જંબુવિજયજી** મ. સા. હસ્તક શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાન ભંડાર—સુરતના વહીવટકર્તાએ કરાવી રાખેલ તેનાં આધારે સંશોધન કરેલ છે.

**૧. શ્રી જિનભદ્રસૂરિજ્ઞાનભંડાર—જેસલમેર**

ત્રિષષ્ટિશલાકાપુરુષચરિત્ર, ગદ્ય શ્રી શાંતિનાથ ચરિત્ર પર્યંત, કર્તા- આ. વિમલસૂરિ, ગ્રંથ નંબર ૨૪૬, પત્ર-૧૬૧ (૧૫૯મું પત્ર નથી)

લેખન સંવત-૧૪મી શતાબ્દી

**૨. શ્રી ખેતરવાસીનો ભંડાર-પાટણ**

ત્રિષષ્ટિશલાકાપુરુષચરિત્ર કર્તા—વિમલાચાર્ય, પત્ર-૨૪૫, ગ્રંથ નં. ૩૧૫, સાઈઝ ૧૪X૧૮

લેખન સંવત લખેલ નથી.

આ બન્ને પ્રતિ અંગે ઉપર મુજબ વિગત પ્રાપ્ત થઈ છે. આ બન્ને પ્રતિ પડીમાત્રામાં છે. બન્ને પ્રતિમાં પ્રાયે કરીને ખાસ કોઈ પાઠભેદ આવતો નથી. જેસલમેરની પ્રતિ શ્રી શાંતિનાથ ભ. પર્યન્ત છે. જ્યારે પાટણની પ્રતિ શ્રી મલ્લિનાથ ભ. પર્યન્ત છે. તેથી આ બન્ને પ્રતિના આધારે સંશોધન કરેલ છે.

લિ.

**ગણિ જિનેશચંદ્રવિજય**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org



॥ વાલકેશ્વર તીર્થાધિપતિ શ્રી આદિનાથ પ્રભુ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# શ્રી વાલકેશ્વર જૈન દેરાસર



શેઠ શ્રી બાબુ અમીચંદ પનાલાલ



શેઠાણી શ્રી કુંવરબાઇ અમીચંદ



Jain Education International For Personal and Private Use Only www.jainelibrary.org



શાસનસમ્રાટ્ પ. પૂ. આચાર્ય
શ્રી વિજયનેમિસૂરીશ્વરજી મ. સા.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

વાત્સલ્યવારિધિ પ. પૂ. આચાર્યદેવ
શ્રી વિજયવિજ્ઞાનસૂરીશ્વરજી મ. સા.





પ્રાકૃતવિશારદ પ. પૂ. આચાર્યદેવ
શ્રી વિજયકસ્તૂરસૂરીશ્વરજી મ. સા.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

જિનશાસન શણગાર



પ. પૂ. આચાર્યશ્રી વિજય ચન્દ્રોદયસૂરીશ્વરજી મ. સા.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

સૂરિમંત્ર સમારાધક



પ. પૂ. આચાર્યદેવશ્રી વિજય અશોકચંદ્રસૂરીશ્વરજી મ. સા.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्री શંખેશ્વર પાર્શ્વનાથાય નમઃ
શાસનસમ્રાટ્ શ્રી વિજયનેમિ-વિજ્ઞાન-કસ્તૂર-ચંદ્રોદય-
અશોકચંદ્રસૂરીશ્વરેભ્યો નમઃ



# ત્રિષષ્ટિ ચરિત્ર, કરે આત્મ પવિત્ર

**तीर्थेशचक्रिप्रतिविष्णुसीरिणः,**
**कृष्णा जिनार्कग्रहसम्मिताः क्रमात् ।**
**एभिः शलाका शिवसौख्यलब्धये,**
**क्षिप्ता शलाकापुरुषास्ततस्त्वमी ॥ १८ ॥** (इन्द्रवज्रा)

પુરુષાર્થ કરે તે પુરુષ, સ્વાર્થ કાજે તો દરેક પુરુષાર્થ કરે, પરમાર્થ કાજે તો વિરલા જ કરે. કેટલાક પોતાના માટે, કોઈક કુટુંબ-પરિવાર માટે, થોડા ઘણા ગામ-નગર કે રાજ્ય માટે પુરુષાર્થ કરે તે ઉત્તમ પુરુષ છે. લોકોત્તર પુણ્યવંત શલાકાપુરુષો ત્રણ ખંડ કે ષટ્ખંડના ભલા માટે પુરુષાર્થ કરે છે. લોકોત્તમ તીર્થંકર પરમાત્મા ત્રણે લોકના શ્રેય માટે નિઃસ્વાર્થભાવે ઉપકાર કરી રહ્યા છે.

આવા ૬૩ શલાકાપુરુષના ચરિત્રો કલિકાલસર્વજ્ઞ શ્રી હેમચંદ્રાચાર્ય ભગવંતે પોતાની આગવી શૈલીમાં સંસ્કૃત પદ્યમાં રચ્યા પછી ઘણા પૂજ્યોએ શલાકાપુરુષના ચરિત્રો રચ્યા. છતાં ય એકદમ સરળ શૈલીથી સામાન્ય સંસ્કૃત ભણેલા પણ સરળતાથી થોડામાં સમજી શકે તે રીતે શલાકાપુરુષોના ચરિત્રો સાથે તે તે પ્રસંગો વર્ણવાનો શ્રી વિમલાચાર્ય ભગવંતે સફળ પ્રયત્ન કર્યો છે. જો કે વચમાં જે પદ્યો લીધા છે તેમાં તો ૧૩ માં સૈકાની છાંટ અવશ્ય અનુભવ્યા વિના રહેતી નથી. શ્લોકોના અર્થ - ભાવાર્થ માટે તો વાચકને વિદ્વત્તાની કે વિદ્વાનની અવશ્ય જરૂરીયાત રહેશે જ.

પ્રાચીન ગ્રંથોના સંશોધન-સંપાદન અમારા સાધુઓ કરે તેવી જે બન્ને પૂજ્યો (પૂજ્ય મોટા મ.) જિનશાસન શણગાર પ. પૂ. આચાર્ય શ્રી વિજયચંદ્રોદયસૂરીશ્વરજી મ., (પૂ. ગુરુદેવશ્રી) સૂરિમંત્રસમારાધક પ. પૂ. આચાર્ય શ્રી વિજયઅશોકચંદ્રસૂરીશ્વરજી મ. ની અંતરની ભાવના હતી. તદનુસાર પૂજ્ય મોટા મ. ના પ્રશિષ્ય ગણિવર્ય શ્રી જિનેશચંદ્રવિજયજી ને સંશોધનના કામ માટે મનથી દીલચશ્પી છે. તેથી બાહ્યપ્રવૃત્તિમાં રસ ન લેતા સારી એવી મહેનત કરી અપ્રગટ એવા શ્રી વિમલાચાર્યકૃત ત્રિષષ્ટિશલાકાપુરુષચરિત્ર ગ્રંથનું સંશોધન-સંપાદન કરી વિદ્વાનોના કર-કમલમાં અર્પણ કરે છે, એ આનંદની વાત છે.

ભવિષ્યમાં પણ આ જ રીતે તેઓ અનેક ગ્રંથોના સંશોધન-સંપાદન કરી જિનશાસનને ચરણે ધરી પૂજ્યશ્રીના હૃદયને આનંદિત કરે.

અંતે વિદ્વાન્ સુજ્ઞવાચકો પણ આ ચરિત્રનું વાંચન કરી આત્માને પવિત્ર કરે તેવી શુભેચ્છા..

**જિનશાસનશણગાર પ. પૂ. આચાર્ય શ્રી વિજયચંદ્રોદયસૂરીશ્વરજી મ. ના ગુરુબંધુ**
**સૂરિમંત્રસમારાધક પ. પૂ. આચાર્ય શ્રી વિજયઅશોકચંદ્રસૂરીશ્વરજી મ. નો પટ્ટધર**
**વિ. સોમચંદ્રસૂરિ**

પોષ સુદ ૧૪, પૂજ્યશ્રીની ૧૮મી માસિક તિથિ

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# સમર્પણ



જેમના મુખેથી આવા
મહાપુરુષોના ચરિત્રો
સૌ પ્રથમ સાંભળ્યા
તે પૂજ્ય દાદી મહારાજ
(બા મહારાજ)ના
બા મહારાજ
**સાધ્વીશ્રી**
**ઉદ્યોતયશાશ્રીજી મ. સા.**
તથા
પૂ. બા મહારાજ સાધ્વીશ્રી
**તરુણયશાશ્રીજી મ. સા.**ના
કર-કમલમાં......





Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# પ્રસ્તાવના

ત્રિષષ્ટિશલાકાપુરુષચરિત્રનું મૂળ શોધવા જઈએ તો જ્ઞાતાધર્મકથા નામનું ૬ઠ્ઠું અંગ તથા મુખ્યતાએ દૃષ્ટિવાદ નામનું ૧૨મું અંગ છે.

દૃષ્ટિવાદના મુખ્ય પાંચ ભેદો છે. (૧) પરિકર્મ (૨) સૂત્ર (૩) પૂર્વગત (૪) અનુયોગ (૫) ચૂલિકા. જેના પેટાભેદો અનેક છે.

★ પરિકર્મ– આગળના ચાર અંગ ભણવા માટેની શક્તિ સંપાદન કરાવનાર શાસ્ત્ર તે પરિકર્મ, તેના કુલ ૮૩ ભેદો છે.

★ સૂત્ર–તેના કુલ ૮૮ ભેદો છે.

★ પૂર્વગત– આ વિભાગમાં ૧૪ પૂર્વો હતા. ગણધરોએ દ્વાદશાંગી જ્યારે બનાવી ત્યારે સૌ પ્રથમ આ ૧૪ વિભાગો બનાવ્યા, તેથી તેને પૂર્વો કહે છે. તેનું પ્રમાણ આ પ્રમાણે છે. (૧) ઉત્પાદ– એક કરોડ પદ (૨) અગ્રાયણીય– છન્નુ લાખ પદ (૩) વીર્યપ્રવાદ– સિતેર લાખ પદ (૪) અસ્તિ–નાસ્તિપ્રવાદ– સાંઠ લાખ પદ (૫) જ્ઞાનપ્રવાદ– એક કરોડમાં એક ઓછુ પદ (૬) સત્યપ્રવાદ એક કરોડ છ પદ (૭) આત્મપ્રવાદ– છવ્વીસ કરોડ પદ (૮) કર્મપ્રવાદ– એક કરોડ એંશી હજાર પદ (૯) પ્રત્યાખ્યાનપ્રવાદ– ચૌર્યાશી લાખ પદ (૧૦) વિદ્યાનુવાદ– એક કરોડ (૧૧) અવંધ્ય–છવ્વીસ કરોડ પદ (૧૨) પ્રાણાયુ– એક કરોડ છપ્પન લાખ પદ (૧૩) ક્રિયાવિશાલ–નવ કરોડ પદ (૧૪) લોકબિંદુસાર– સાડા બાર કરોડ પદ

★ ચૂલિકા– જેનાં ૩૪ ભેદ છે.

★ અનુયોગ– દૃષ્ટિવાદના ચોથા વિભાગની વિષય વસ્તુના બે



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ઉપવિભાગો હતાં (૧) મૂળ પ્રથમાનુયોગ (૨) ગંડિકાનુયોગ. તેમાં મૂળ પ્રથમાંનુયોગમાં અરિહંત ભગવંતોના ગર્ભ, જન્મ, તપ, જ્ઞાન, નિર્વાણ વગેરે સંબંધી ઇતિવૃત્ત તથા શિષ્ય સમુદાયના વર્ણનો તથા ગંડિકાનુ યોગમાં કુલકર, ચક્રવર્તી, બલદેવ, વાસુદેવ વગેરે તથા બીજા અન્ય મહાપુરુષોના ચરિત્રો હતા.

દૃષ્ટિવાદનો જેમ જેમ વિચ્છેદ થવા લાગ્યો તેમ તેમ તેમાં સમાવિષ્ટ અનુયોગનો પણ વિચ્છેદ થવા લાગ્યો. તે જ વખતે પ્રાયે કરીને ઈસ્વીસનની પ્રારંભિક શતાબ્દીમાં આચાર્ય શ્રી આર્યરક્ષિતસૂરિજીએ અનુયોગના ચાર પ્રકાર કરી વિશેષ પ્રકારની વ્યાખ્યાપદ્ધતિ પ્રરૂપી. તેમાં (૧) દ્રવ્યાનુયોગ (૨) ગણિતાનુયોગ (૩) ચરણકરણાનુયોગ અને (૪) ધર્મકથાનુયોગ. દ્રવ્યાનુયોગમાં છ દ્રવ્ય વગેરેનું સ્વરૂપ, ગણિતાનુયોગમાં ૧૪ રાજલોકનું પ્રમાણ વગેરે, ચરણકરણાનુયોગમાં ચારિત્રમાં રુચિ થાય સ્થિરતા થાય તેવા ઔપદેશિક પ્રકરણો વગેરે, અને ધર્મકથાનુયોગમાં વિશુદ્ધ આચરણ કરનારા મહાપુરુષોની જીવન કથાઓ આદિ આવે છે.

આચાર્ય શ્રી આર્યરક્ષિતસૂરિજીએ દૃષ્ટિવાદની અંતર્ગત આવેલ અનુયોગના વિભાગો પ્રથમાનુયોગ અને ગંડિકાનુયોગને ધર્મકથાનુયોગમાં સમાવેશ કરીને નાશ થતા અટકાવી દીધા પણ તેમના ગયા પછી કાળના પ્રભાવે તે પણ શીર્ણ-વિશીર્ણ થતો ગયો. વીર નિર્વાણના ૬૦૦ વર્ષ પછી શાલિવાહન રાજાના સમયમાં આચાર્ય શ્રી કાલકસૂરિજીએ પ્રથમાનુયોગ નામથી આ વિશીર્ણ કથાઓનો પુનરુદ્ધાર કર્યો. અને ત્યાર બાદ અનેક આચાર્ય ભગવંતે તેની ઉપર સાહિત્ય રચીને પ્રથમાનુયોગને જીવંત રાખવા પ્રયત્ન કર્યો.

## ૬૩ની સંખ્યા અને શલાકા પુરુષનો અર્થ :

સમવાયાંગ સૂત્રના (સૂ. ૧૩૨) આધારે ૨૪ તીર્થંકર, ૧૨ ચક્રવર્તી, ૯ વાસુદેવ (નારાયણ), ૯ બળદેવને ઉત્તમ પુરુષ માની શીલાંકાચાર્યે ચઉપન્નમહાપુરુસચરિયંમાં ૫૪ની સંખ્યામાં માની. ત્યારે



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

જ્ઞાતાધર્મકથા, કલ્પસૂત્ર, જંબૂદ્વીપ પ્રજ્ઞપ્તિ, ત્રિલોકપ્રજ્ઞપ્તિ, આવશ્યક નિર્યુક્તિની ચૂર્ણિ, વિશેષઆવશ્યકભાષ્ય અને વસુદેવહિંડી આદિમાં ઉત્તમપુરુષની સંજ્ઞા આપી છે. ત્યાર બાદ આચાર્ય શ્રી જિનસેનસૂરિજીએ મહાપુરાણમાં તથા કલિકાલ સર્વજ્ઞ હેમચંદ્રાચાર્યે પોતાના ગ્રંથમાં ઉત્તમ પુરુષને બદલે શલાકાપુરુષની સંજ્ઞા આપી અને ૯ પ્રતિનારાયણને ઉમેરી ૬૩ની સંખ્યા માની ત્યારે આચાર્ય શ્રી ભદ્રેશ્વરસૂરિજીએ કહાવલીમાં ૯ નારદોની સંખ્યા ઉમેરી ૭૨ની સંખ્યા આપી. હેમચંદ્રાચાર્યે શલાકાપુરુષનો અર્થ जातरेखा (રેખારૂપજીવન) કર્યો છે. અને ભદ્રેશ્વરસૂરિજીએ સમ્યક્ત્વરૂપ શલાકાથી યુક્ત એવો અર્થ કર્યો છે.

હેમચંદ્રાચાર્યે ત્રિષષ્ટિશલાકાપુરુષચરિત્ર રચ્યું ત્યારબાદ ત્રિષષ્ટિની લોકચાહના એટલી બધી વધી ગઈ કે તેનાં પછી અનેક મહાપુરુષોએ તેની ઉપર પોતાની કલમ ચલાવી જેમકે વજ્રસેનસૂરિકૃત ત્રિષષ્ટિશલાકાપુરુષચરિત્ર, વિમલસૂરિકૃત ત્રિષષ્ટિ ગદ્ય-પદ્ય, સોમપ્રભસૂરિકૃત લઘુત્રિષષ્ટિ, ઉપા. મેઘવિજયજીકૃત લઘુત્રિષષ્ટિ, ચંદ્રમુનિકૃત લઘુત્રિષષ્ટિલક્ષણમહાપુરાણ, ત્રિષષ્ટિશલાકા પંચાશિકા, તથા અજ્ઞાતકૃત ત્રિષષ્ટિશલાકાપુરુષવિચાર, સાધ્વી અજિતસુંદરી (સં. ૧૨૫૮) કૃત ત્રિષષ્ટિભાષ્ય આમ ત્રિષષ્ટિ૦ ઉપર અનેક મહાપુરુષોએ સાહિત્ય રચ્યું તેમાં મુખ્ય ફાળો હેમચંદ્રાચાર્યજીનો જ ગણાય.

## આ ગ્રંથના કર્તા વિમલસૂરિજી કોણ ?

આ ગ્રંથ મલ્લિનાથચરિત્ર સુધી જ મળે છે. બાકીનો ભાગ લખાયો છે કે નહીં અને જો લખાયો હોય તો તે ભાગ ક્યાં છે તે જાણી શકાયું નથી. અધૂરા ગ્રંથની પ્રશસ્તિ ક્યાંથી મળે ? અને પ્રશસ્તિ વગર કર્તાનું નામ-ગુરુપરંપરા પણ કેવી રીતે જાણી શકાય ? આદિનાથ ભ. અને ભરત ચક્રવર્તીનું ચરિત્ર પૂરું થતા એક શ્લોક મળે છે તેમાં કર્તા તરીકે વિમલસૂરિ એવું નામ છે. તેથી કર્તા તો આપણને મળી ગયા. તેની પરંપરા શું છે તે જાણવું જરૂરી છે. તે માટે મંગલાચરણના ૮માં શ્લોકમાં



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

મલધારીગચ્છના પૂજ્યોને નમસ્કાર કરે છે. તેથી આ વિમલસૂરિજી મલધારીગચ્છના હોવા સંભવ છે. શ્લોક ૭માં કલિકાલસર્વજ્ઞ હેમચંદ્રાચાર્યને નમસ્કાર કરેલ છે.અને જેસલમેરની પ્રતિનું લેખન ૧૪મી સદીના પૂર્વાર્ધમાં થયું હોય તેવું લાગે છે. તેથી વિમલસૂરિજી હેમચંદ્રાચાર્ય પછી અને ૧૪મી શતાબ્દી પહેલા થવાનો સંભવ છે. આ સમયમાં મલધારીગચ્છની પાટ પરંપરા જોઈએ તો તેમાં વિમલસૂરિજીનું નામ જોવા મળતું નથી તેથી તેમના ગુરુ કોણ છે. તે જાણી શકાયું નથી. પણ વસ્તુપાળના મોસાળપક્ષના ગુરુ અને મલધારગચ્છીય આચાર્ય શ્રી નરચંદ્રસૂરિજીને ન્યાયકંદલી ટિપ્પણ ગ્રંથ રચવામાં વિમલાચાર્યએ સહાય કરેલી તેવી નોંધ મળે છે.

## ત્રિષષ્ટિ અને તેની રચના પદ્ધતિ :

વિમલસૂરિ મહારાજ હેમચંદ્રાચાર્ય મહારાજકૃત ત્રિષષ્ટિના ચરિત્રોના ક્રમને જ અનુસર્યા છે અને એક એક ચરિત્રમાં બનતી ઘટનાનો ક્રમ પણ તે પ્રમાણે જ લીધો છે. પણ હેમચંદ્રાચાર્યની જેમ પ્રસંગોનો વિસ્તાર, ઋતુઓના વર્ણન જેવી વસ્તુને મહત્ત્વ ના આપતા અત્યંત ઓછા શબ્દોમાં દરેક પ્રસંગ નોંધી લીધો છે. તે પણ ગદ્યમાં તેમણે હેમચંદ્રાચાર્યના ત્રિષષ્ટિ કરતા જેમ બને તેમ લઘુ અને સરળ બનાવવા પ્રયત્ન કરેલ છે, દરેક ચરિત્રની રચના પદ્ધતિ પણ સરળ છે. નવા શબ્દોનો પણ બહુ ઓછો ઉપયોગ કરેલ છે. તેથી પ્રારંભિક અભ્યાસીઓને વાંચવામાં ઉપયોગી છે. ચરિત્રોની વચ્ચે વચ્ચે જ્યાં શ્લોક મૂકેલાં છે. તે જોતા એમ લાગે કે આવા સુંદર શ્લોક અલગ-અલગ છંદમાં રચનાર વ્યક્તિ શું ગદ્યમાં આટલી સરળ રચના કરી શકે !

## ટૂંકું અને ટચ ગ્રંથકારશ્રીના શબ્દોમાં :

જે કવિઓ કાવ્ય રચનાને બહાને સ્ત્રીઓનું કે તેનાં અંગોનું વર્ણન કરે છે. તેઓને લાલબત્તી બતાવતાં લખે છે –



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**ये वर्णयन्ति कवयो वनितां नितान्त-**
**मत्युक्तिभिर्तरुणलोकमनोऽनुरक्त्यै ।**
**कन्दर्पसर्पविषविह्वलजीवलोक-**
**त्राणाय ते गरलभारणिकां पठन्ति ।।१६।।** (वसन्ततिलका)

જે કવિઓ યુવાનોનાં મનની પ્રીતિ માટે હંમેશા ઘણી ઉક્તિઓ વડે સ્ત્રીઓનું વર્ણન કરે છે, તેઓ કામદેવરૂપી સર્પના ઝેરથી ત્રાસી ગયેલ જીવ લોકના રક્ષણ માટે વિષની ભારી જ બતાવી રહ્યાં છે.

**મંગલાચરણ :**

મંગલાચરણ જોતા કાદંબરી યાદ આવી જાય છે. અતિ લાંબુ મંગલાચરણ છતાં ગ્રંથ અપૂર્ણ રહ્યો છે. તેમણે જૈન શાસ્ત્રોના મહાકાવ્યોમાં જે પ્રથા છે, તે પ્રમાણે તીર્થંકરોની સ્તવના, વસ્તુનિર્દેશ, સજ્જન-દુર્જન ચર્ચા, આત્મલઘુતા, પૂર્વાચાર્યોનું સ્મરણ કે સ્વગુરુ નમસ્કાર દરેકના અલગ-અલગ શ્લોકો દ્વારા મંગલાચરણ ૨૫ શ્લોક જેટલું લંબાવ્યું છે.

**આદિનાથ ચરિત્ર :**

દરેક જિનેશ્વર ભગવંતના ચરિત્ર લખતા પહેલા અને પૂરું થતાં બન્ને જગ્યાએ એક એક શ્લોક દ્વારા તે તે જિનેશ્વર ભગવંતની સ્તુતિ કરવામાં આવી છે. આદિનાથચરિત્રથી મલ્લિનાથચરિત્ર સુધી હેમચંદ્રાચાર્યકૃત ત્રિષષ્ટિને જ નજરમાં રાખીને રચના થતી હોય તેમ લાગે છે. કેમકે દરેક ચરિત્રનાં નાનામાં નાના પ્રસંગને પણ તેમણે જે ક્રમે લીધો છે, તે જ ક્રમે લીધા છે. વચ્ચે વચ્ચે ઔપદેશિક શ્લોકો છે, તે અનુપ્રેક્ષણીય છે.

આદિનાથ ભગવાનનો ચોથો ભવ શતબલ રાજાનો પુત્ર મહાબલ તરીકે થાય છે. મહાબલ રાજ્યને યોગ્ય થતા તેને રાજ્ય આપતા પણ સંસાર ત્યાગની જ હિતશિક્ષા શતબલ રજા આપે છે.



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**उच्छेदो विषयस्य वत्स ! करणव्यापाररोधक्रिया,**
**साधोरेव यशस्तनोति न पुन, विश्वम्भराया: प्रभोः।**
**राजानः क्षमयैव साधव इव, श्लाघ्या भवन्त्यन्वहं,**
**निर्भीकाः परलोकतश्च समिति-स्फारकस्फुरत्कीर्त्तयः।।२८।।**
(शार्दूलविक्रीडितम्)

વિષયનો ઉચ્છેદ અને ઇન્દ્રિયવ્યાપારરોધની ક્રિયા સાધુનો જ યશ ફેલાવે છે. પરંતુ પૃથ્વીના રાજાનો નહીં. રાજાઓ ક્ષમા વડે સાધુની જેમ હંમેશા પરલોકથી નિર્ભય અને સમિતિથી પ્રસરતી કીર્તિવાળા થાય છે.

જીવાનંદ વૈદ્યના ભવમાં એક ગ્લાન મુનિની ચિકિત્સા કરે છે, ત્યારે તે મુનિ ઉપદેશ આપે છે, તે શ્લોકની અંતિમ પંક્તિ ઉત્તરાધ્યયનની પંક્તિ जो गिलानं पडिसेवइ, सो मां पडिसेवइ નો જ અનુવાદ.

**तद् ग्लानस्य चिकित्सनं जिनतनूपास्त्या समं वर्णितम्**

શ્રી આદિનાથ ભગવાનના ૧૨ ભવ પૂર્ણ કરી કુલકરોના ચરિત્રોનું વર્ણન કરે છે. તેમાં પ્રથમ કુલકર વિમલવાહન ચંદ્રયશાનો પૂર્વભવ વર્ણવે છે. એક વખત સાગરચંદ્ર વનમાં મિત્રો સાથે ફરવા જતો હોય છે. ત્યારે દૂરથી કોઈ સ્ત્રીનો અવાજ આવે છે બચાવો બચાવો. એટલે સાગરચંદ્ર ત્યાં જઈને તે સ્ત્રીને લુંટારુઓના હાથમાંથી બચાવે છે અને તે સ્ત્રીનું નામ, પિતાનું નામ વગેરે જાણી તેને પરણવાની ઇચ્છાવાળો થાય છે. અને તે સ્ત્રી પણ સાગરચંદ્ર પ્રત્યે અનુરાગવાળી થાય છે. આ વૃત્તાંત સાગરચંદ્રના પિતા જાણીને તેને એકાંતમાં બેસીને સમજાવે છે.

**राज्ञामेव विराजतेऽद्भुतभुजा-ऽवष्टम्भसंरम्भिता,**
**नेयं विप्रवणिग्जनस्य यशसे, बर्हिस्तुलाधारिणः ।**
**उत्तीर्णं निजजातितो न हि शुभो-दर्काय पुंश्चेष्टितं,**
**पक्षोत्थानमुपानयेन्न मरणं, किं कीटिकानां कुले।।४४।।** (शार्दूलविक्रीडितम्)



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

અગ્નિ ધારણ કરનાર બ્રાહ્મણો અને ત્રાજવાને ધારણ કરનાર વણિકોને આવું સાહસ (લૂંટારું સાથે વેર) શોભતું નથી. સાહસ તો અદ્‌ભુત ભુજબળવાળા રાજાઓને જ શોભે છે. પોતાની જાતિના કાર્યોથી ઉપર જવું તે હિતકારી નથી. કીડીઓને પણ પાંખ આવે તે શું મૃત્યુ માટે નથી બનતી ?

અને આ તારો મિત્ર જે અશોકદત્ત છે, તેની મિત્રતા રાખવા જેવી નથી. તે તને ક્યારેક શોક આપનાર થશે. તે કાળમાં તે તે ક્ષેત્રોમાં માતા-પિતા કેટલું ધ્યાન રાખતા અને અવસરે એકાંતમાં હિતશિક્ષા આપતાં, તેનું ફળ વૃદ્ધાવસ્થામાં માતા-પિતાને જ મળે છે. તે આજના જમાનામાં માતા-પિતાએ ખાસ સમજવા જેવું છે.

ત્યારબાદ અવસર મેળવી ટૂંકમાં છ આરાનું સ્વરૂપ સમજાવી સાત કુલકરનાં ચરિત્રો ટૂંકમાં આલેખે છે. તેમાં હાકાર, માકાર અને ધિક્કારની નીતિ કઈ રીતે થતી, તે દર્શાવી નાભી કુલકરને ત્યાં મરુદેવા માતાની કુક્ષીએ ઋષભદેવ ભગવાનનો યુગલિકરૂપે જન્મ થાય છે. ૫૬ દિક્કુમારિકા મહોત્સવ, મેરુપર્વત ઉપર અભિષેકનું વર્ણન કરી. સુનંદા અને સુમંગલા સાથે પ્રભુનો વિવાહ સ્વયં શક્રેન્દ્ર આવીને કરે છે. ત્યારબાદ ભરત, બાહુબલિ વગેરે સો પુત્રોની ઉત્પત્તિ, પ્રભુનો રાજ્યાભિષેક, ૧૦૦ શિલ્પો, સ્ત્રીની ૬૪ કળા, પુરુષોની ૭૨ કળા પ્રર્વતાવી, ૧૦૦ પુત્રોને રાજ્યની વહેંચણી કરી પ્રભુ દીક્ષા લે છે. ત્યારબાદ પારણા માટે એક વર્ષ સુધી ઘરે ઘરે ફરે છે. ત્યારે અતિસમૃદ્ધ લોકો હોવાથી દાનધર્મથી અજાણ પ્રજા હતી. અને તેવે વખતે ભિક્ષા માટે ઘરે આવેલા પ્રભુને જોઈને લોકો નમસ્કાર કરી વિનંતિ કરે છે.

**कन्याः शीलेन धन्याः, प्रभुचरणयुगा-ऽभ्यस्तपूजास्तनूजाः**
**लक्ष्मीरक्षीणकोशा, गृहमनघगृहं, बान्धवाः सोद्धवाश्च ।**
**एषोऽहं स्वामिपादा-ऽम्बुरुहमधुकरः, किङ्करत्वायसज्जः,**
**श्लाघ्यं यत्किञ्चिदेषु, स्फुरति मनसि व-स्तेन देयो नियोगः ।।५६।।**(स्रग्धरा)



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

શીલથી ધન્ય એવી આ કન્યા આપના ચરણની સેવા કરવામાં હોંશિયાર એવી આ મારી પુત્રી, અક્ષીણ ભંડારવાળી આ લક્ષ્મી, કોઈ પણ દોષ વગરનું સુંદર આ ઘર, ઉત્સાહવાળા આ મારાં બાંધવો અને આ હું જે આપના ચરણકમળની સેવા કરવા તૈયાર થયો છું. આમાંથી આપને જે કાંઈ મનમાં વિચાર આવે તે આજ્ઞા કરો. હું તે આપના ચરણે અર્પણ કરું !

દાનધર્મ ન જાણનારા લોકોની તે વખતે આવી ચેષ્ટા હતી. ફરતા ફરતા શ્રેયાંસકુમારને ત્યાં પ્રભુ પધાર્યા અને તેમને જાતિસ્મરણજ્ઞાન થયું દાનધર્મનું સ્મરણ થયું. અને ત્યાં પધારેલા પ્રભુનો ખોબો શેરડીના રસથી ભરી દીધો. ત્યારે પ્રભુના હાથમાંથી એક ટીપું પણ નીચે પડતું નથી. તે ધન્ય દિવસ વૈશાખ સુદ-૩ નો હતો. અને તે દિવસે અક્ષય એવા દાનની પ્રવૃત્તિ થવાથી તે તૃતીયાની અક્ષયતૃતીયાપર્વ એવી પ્રવૃત્તિ થઈ. લોકોને પણ શ્રેયાંસકુમારને જાતિસ્મરણની વાત જણાવી દાન દેવાની વિધિ બતાવી. ત્યારબાદ જયારે પ્રભુને કેવળજ્ઞાન થાય છે. ત્યારે

ભરત મહારાજા મરુદેવા માતાને પગે લાગવા જાય છે. મરુદેવા માતા આશીર્વાદ આપીને ભરતને કહે છે.

**निर्वेदेन तरङ्गितः कवचितो, दुःखैरसह्योदयै-**
**रुद्वेगेन विपञ्चितः परिचितो, मूर्च्छागमैर्दुर्गमैः ।**
**आतङ्कैः कलुषीकृतः स्तबकितो-ऽन्तर्दाहकीलाशतैः,**
**प्रव्रज्य व्रजिते सते मम दिनः, स्याद वत्स ! संवत्सरः ।।६६।।**

(शार्दूलक्रीडितम्)

હે વત્સ ! પ્રવ્રજ્યા લઈને ગયેલ પુત્રને વિશેષ વિષાદ વડે તરંગિત થયેલ ક્યારેક અસહ્ય ઉદય પામેલ દુઃખ વડે વ્યાપ્ત થયેલ દુર્ગમ એવી મૂર્ચ્છા વડે પરિચિત આતંક વડે કલુષિત થયેલ અંતરમાં દાહ કરતા એવા સેંકડો ખીલાથી ગાઢ થયેલ મારો દિવસ વર્ષ જેવો થાય છે, ત્યારે પ્રતિહારી પ્રભુને કેવલજ્ઞાન થયું છે. તેવી વધામણી આપે છે. એટલે



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ભરત મહારાજા મરુદેવામાતાને કહે છે. આપ પધારો અને આપના પુત્રનો વૈભવ જુઓ એમ કહીને હાથી ઉપર બેસાડીને પ્રભુ પાસે લઈ જાય છે. ત્યાં પ્રભુનું સમવસરણ, વૈભવ, દેવોનું આવાગમન વગેરે જોઈને ભાવ વિશેષને પામીને કેવળી થઈને સિદ્ધિ ગતિને પામે છે. પ્રભુ દેશના આપે છે. ગણધરો તથા શ્રીસંઘની સ્થાપના કરે છે.

ત્યારબાદ ચક્રીનું વક્તવ્ય શરૂ કરે છે. ભરતચક્રી ચક્રની પૂજા કરી છ ખંડ સાધીને ૬૦ હજાર વર્ષે પાછા આવે છે. ચક્રીપણાનો અભિષેક થઈ ગયાં પછી ચક્ર આયુધશાળામાં જતું નથી. તેથી કારણ જાણીને પોતાના ૯૮ નાના ભાઈઓને કહેવડાવે છે. કે તમોને રાજ્ય જોઈતું હોય તો ભરતની સેવા કરો. એટલે તેઓ સાથે મળીને પિતા ઋષભને પૂછવા જાય છે. અને ત્યાં જ દીક્ષા લઈ લે છે. ત્યારબાદ બાહુબલી પાસે દૂત મોકલી કહેવડાવે છે. તે તો દૂતને અવગણીને કાઢી મૂકી છે. ત્યારબાદ બન્નેનું દૃષ્ટિ, વાગ્, બાહુ, મુષ્ટિ, દંડ, એમ પાંચ પ્રકારનું યુદ્ધ દેવો નક્કી કરાવે છે. અને સૈન્યનો નાશ થતો અટકાવે છે. પાંચેય યુદ્ધમાં ભરત રાજા હારે છે. અને બાહુબલી જીતે છે. એટલે પોતે વિચારમાં પડે છે.

**षट्खण्डभूजयकरं मम चक्ररत्नं,**
**स्वप्नान् ददर्श च चतुर्दश मे सवित्री ।**
**बाहोर्बले किमपि बाहुबली बली च,**
**तच्चक्र्यहं किमयमित्यपि संशयोऽस्ति ।।७५।।**(वसन्ततिलका)

છ ખંડને જીતાવનારું મારું ચક્રરત્ન છે. મારી માતાએ ૧૪ સ્વપ્નો જોયાં છે પણ બાહુના બળથી તો બાહુબલી બળવાન છે, તો શું ચક્રી હું છું. કે આ છે ! એવો સંશય પડે છે. અને બાહુબલી ઉપર ચક્ર મૂકે છે. એટલે ગુસ્સે થઈ બાહુબલી મૂઠી ઉગામીને ભરતને મારવા દોડે છે. અને ત્યારે પોતાની ભૂલ સમજાતા તે જ મૂઠી વડે લોચ કરી દીક્ષા લે છે. અને ઋષભદેવ પાસે જવા તૈયાર થાય છે. ત્યાં જ માનકષાયનો



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ઉદય થતા લઘુભાઈઓને હું કેમ વંદન કરું તેમ વિચારી પાછા ફરે છે. એક વર્ષ પૂરું થતા બ્રાહ્મી-સુંદરીથી બોધ પામી લઘુભાઈઓને વંદન કરવા પગ ઉપાડે છે અને ત્યાં જ કેવળજ્ઞાન ઉત્પન્ન થાય છે.

ત્યારબાદ મરીચી ત્રિદંડીનો વેષ રચે છે વગેરે વાત આવે છે. અંતે પ્રભુ ઋષભનો પરિવાર આયુષ્ય વગેરે બતાવી આદિનાથ ચરિત્ર પૂર્ણ કરે છે. અને ભરતને આરિસાભુવનમાં કેવળજ્ઞાન થતાં દેવ વડે અપાયેલ વેષને પહેરી ભૂમિ ઉપર વિચરી મોક્ષે પધારે છે. અને ૮૬૧ શ્લોક પ્રમાણ આદિનાથ ચરિત્ર પૂર્ણ કરે છે.

**અજિતનાથ ચરિત્ર :-** ત્રણ ભવ બતાવવા પૂર્વક અજિતનાથ ભગવાનનો જન્મ દીક્ષા થાય છે. પ્રથમ બ્રહ્મદત્ત રાજાના ઘરે પારણું કરે છે. ત્યાં પારણું કરાવવા વાળાનું શું મહત્ત્વ છે તે શ્લોક દ્વારા દર્શાવે છે.

**दत्तं येन जिनाय दानमतुल-श्रद्धाविशुद्धात्मना;**
**तस्मिन्नेव भवे शिवेऽस्य गमनं, पुंसस्तृतीयेऽथवा ।**
**किं चान्येपि जना भवन्ति विरुज-स्तं वीक्षमाणाः क्षणम्;**
**क्षुद्रोपद्रवविद्रवश्च सकले, स्यात् तत्र भूमण्डले ।।८८।।**
(शार्दूलविक्रीडितम्)

અતિશ્રદ્ધાથી આત્માને વિશુદ્ધ કર્યો છે. એવા આત્માઓ વડે જિનેશ્વર ભગવંતને દાન અપાયું હોય તો તે પુરુષનું તે જ ભવે મોક્ષમાં ગમન થાય છે. કદાચ ન થાય તો ત્રીજા ભવે મોક્ષ થાય છે. અને તે પારણું જોનારા મનુષ્યો તો ક્ષણવારમાં રોગ વગરનાં તથા ક્ષુદ્રોપદ્રવ વગરના થાય છે.

પ્રભુને કેવળજ્ઞાન થાય છે. અને પ્રથમ દેશના આપે છે.

**निःसङ्ख्यानि दिनानि यान्ति विषय-व्यासङ्गतः प्राणिनां,**
**जीवश्चेतयते न जातु यदहं, धर्मस्य सर्वं फलम् ।**



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भुञ्जानोऽस्मि विरम्य किञ्चन पुन-र्नव्यं न कुर्वेऽग्रतो;
येनं स्यां सुखितोऽसुखं च न पर-स्येक्षे न याम्यप्यधः ।।८९।।
(शार्दूलविक्रीडितम्)

વિષય વાસનામાં ડુબેલા એવા પ્રાણીઓના અસંખ્ય દિવસો જાય છે. પરંતુ તે ક્યારેય વિચારતો નથી. કે આ બધું ધર્મનું ફળ ભોગવું છું. હું વિષયોથી અટકીને નવો ધર્મ કરતો નથી. હું સુખી થાવ, બીજાનું પણ દુઃખ ન જોવું અને નીચેની ગતિમાં ન જાવ, આવું પોતે વિચારતો નથી. તો તેનું શું થશે ?

આ પ્રમાણે દેશના આપે છે. ગણધર સ્થાપના વગેરે કરે છે. સાથે સાથે સગરચક્રીનું ચરિત્ર પણ પૂર્ણ થાય છે. પૂર્ણ કરતા અજિતનાથ ચરિત્ર અને સગરચક્રીચરિત્રને કાનના બે કુંડલની ઉપમા આપવામાં આવી છે. ત્યારબાદ સંભવનાથ ચરિત્રથી લઈને શાંતિનાથ ચરિત્ર સુધી બહુ ટૂંકા વર્ણવ્યાં છે.

સનત્કુમારચક્રી ચરિત્ર અને શાંતિનાથ ભગવાનના ૧૨ ભવ થોડા વિસ્તારથી આપ્યા છે. વચ્ચે વચ્ચે બલદેવ, વાસુદેવ, પ્રતિવાસુદેવનાં ચરિત્રો પણ ટૂંકમાં લીધા છે. મલ્લિનાથ ચરિત્ર પરિવારની ગણત્રી સુધી લખાયેલું મળે છે. ત્યારબાદ ગ્રંથ અપૂર્ણ જ રહેલો ચરિત્રનો અન્તભાગ મેં જ પૂરો કર્યો છે. જેથી ચરિત્ર પૂર્ણ થાય.

અહીં જે વિષય વસ્તુનો નિર્દેશ કર્યો છે તે ગ્રંથ વાંચવામાં ઉત્કંઠા થાય તે માટે જ કરેલ છે.

અંતે હેમચંદ્રાચાર્યકૃત ત્રિષષ્ટિ સાથે મેળવતાં જ્યાં પાઠ કે વિષયવસ્તુમાં જુદાપણું જણાયું તેનું એક અને શ્લોકના અકારાદિનું બીજું એમ બે પરિશિષ્ટો આપેલા છે.

## બંને ગુરુ બંધુઓની કૃપા :

જિનશાસનશણગાર **પ.પૂ.આ. શ્રી વિ. ચંદ્રોદયસૂરીશ્વરજી**



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**મ.સા.** અને સૂરિમંત્રસમારાધક **પ.પૂ. આ. શ્રી વિજય અશોકચંદ્રસૂરીશ્વરજી મ.સા.** બન્ને પૂજ્યોની પ્રાચીન ગ્રંથોના સંશોધન સંપાદન વગેરે ઘણી સંખ્યામાં થાય તેવી હંમેશા ઈચ્છા રહેતી અને તે યોગ્યને પ્રેરણા દ્વારા પ્રગટ પણ કરતા.

તેઓને કોઈ કામ પડે તો પણ હસ્તપ્રતની ઝેરોક્ષનું પાનું આપણાં હાથમાં હોય તો આસને ન બોલાવતા સામાં આપણી પાસે આવી પૂછી લેતા. આપણે કહીએ 'તમો અમને આસને બોલાવો અમે જ આપના આસને આવી જઈશું.' તો તેઓ કહેતા કે 'મારાં કામ કરતાં તમો જે કરો છો તે વધુ અગત્યનું છે' અને કોઈ વખતે કાંઈ નવી વાત વાંચવામાં આવે તો પોતે કહેતા આ તો ધૂળ ધોયાનો ધંધો કહેવાય. જે નવુ મળે તે નોંધી રાખવું. કોઈ દિવસ કોઈની સાથે વાતો કરવા બેસી જઈએ. તો તરત ઠપકો આપતા. આજે તમારે પાનું ખોલવાનું નથી, વાતો તો આખી જીંદગી કરવાની જ છે. ક્યારેક વર્તમાનપત્ર લઈને બેસી જઈએ તો સમયનું બરોબર ધ્યાન રાખતા અને તરત બોલતાં આમાં શું છે ? અડધો પોણો કલાકથી છાપું પકડી રાખ્યું છે.

આમ તેઓની અમારી ઉપર ગમે તેવા કાર્યમાં ખૂપેલાં હોવા છતાં ચાંપતી નજર રહેતી તે હવે રહેવાની નથી. એટલે હવે અમો તેમની ગેરહાજરીમાં કેટલું કામ કરીએ છીએ, તે અમારી પાત્રતા ઉપર છે. અને તે જ તેઓનું નામ ઉજ્જ્વળ બનાવવાનો તથા તેઓની જે અમારી પાસે આશા હતી તે વધુ સારી રીતે પૂર્ણ કરવાનો અવસર છે.

મને આશા છે કે આ કાર્ય બાબતમાં તો તેઓ જ્યાં હશે ત્યાં એમનાં આત્માને દુઃખ નહીં પહોંચે પણ અતિ આનંદ પામશે. બાકી કૃપા તો તેમની વરસી જ રહી છે. અને અમો તેમાંનું એક બુંદ પણ બહાર ન જાય તેમ તે ઝીલી લઈને તેઓને પ્રિય કાર્યમાં જ વાપરવાના.



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## સંશોધન કાર્યને વેગવંતુ બનાવતા ઉપકારીઓ :-

મારા માટે સ્વતંત્ર સંશોધિત આ પ્રથમ પુસ્તક છે. તેથી આ અવસરે દરેક ઉપકારીને યાદ ન કરવા તે એક સંશોધનની ખામી જ કહેવાયને **પ. પૂ. આચાર્ય શ્રી વિજય શીલચંદ્રસૂરીશ્વરજી મ.સા.** અમોને તગડી મુકામે ભેગા થયા. ત્યારે અમુક શ્લોકોના અર્થ વગેરે બરોબર સમજાવ્યા તથા અમુક શ્લોકોના પાઠ ઉકેલી શકતા ન હતા. તે તાડપત્રીની ઝેરોક્ષ મંગાવી મહેનત કરી ઉકેલ્યા. ત્રુટીત હતા તે પૂર્ણ કરી આવ્યા. તેઓએ અમુક જરૂરી સૂચનો કર્યા આવી લાગણી તો સંશોધનના વ્યસની જ બતાવી શકે.

સંશોધનની પદ્ધતિ તથા અમુક ગરબડવાળા પાઠોને ઉકેલવા વગેરે શીખવાડનાર **પ.પૂ.આ.શ્રી સોમચંદ્રસૂરીજી મ.સા.**નો ઉપકાર વિસરાય તેમ નથી.

પ્રાચીનલિપીનો અભ્યાસ કરાવનાર પૂ. પં. **શ્રી શ્રમણચંદ્રવિજયજી** મ.નો હસમુખો ચહેરો સામે જ તરી આવે છે.

ફાઈનલ પ્રૂફ હોય કે કોઈ શબ્દનો અર્થ કરવો હોય કે કોઈ પાઠ ઉકેલવો હોય કે પરિશિષ્ટ મૂકવા અંગે કાંઈ વિચાર વિમર્શ કરવો હોય બધામાં તૈયાર **પૂ. પં. શ્રી શ્રીચંદ્રવિજયજી મ.**નો ઉપકાર તો શેં ભુલાય.

મારા ગુરુજી **પૂ. પં.શ્રી નિર્મળચંદ્રવિજયજી મ.સા.** તેમના વિષે શું લખવુ. નાના મોટા દરેકની ભક્તિ કરવી કે તેને અનુકૂળ થઈ રહેવું તે તો એમનો સ્વભાવ જ છે. તેમનું ચઢેલું ઋણ તો હું ક્યે ભવે પૂર્ણ કરીશ.

મને સંસ્કૃતનો અભ્યાસ કરાવનાર **પૂ. ગણિવર્ય શ્રી કુલચંદ્રવિજયજી મ.** તો પાયામાં જ છે.



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**મુનિ શ્રી સુયશચંદ્રવિજયજી**એ પણ પ્રૂફ જોવામાં મદદ કરી તો **મુનિ શ્રી કલ્પચંદ્રવિજયજી**એ ભક્તિ વૈયાવચ્ચમાં કોઈ ખામી રાખી નથી.

સહવર્તી પં. શ્રી સ્થૂલિભદ્રવિજયજી મ., પં. શ્રી પુષ્પચંદ્રવિજયજી મ., પં. શ્રી કૈલાસચંદ્રવિજયજી મ., પં. શ્રી રાજચંદ્રવિજયજી મ., ગણિ શ્રી પ્રશમચંદ્રવિજયજી મ., પ્ર. શ્રી કલ્યાણચંદ્રવિજયજી મ., મુનિ શ્રી અમરચંદ્ર—સુધર્મચંદ્ર—શશીચંદ્ર—સમકિતચંદ્ર—પ્રિયચંદ્ર—સંઘચંદ્ર—સિદ્ધચંદ્ર—શ્રેયચંદ્ર—શ્રુતચંદ્ર—નિરાગચંદ્ર—ઋષભચંદ્ર—સંયમચંદ્ર—સત્યચંદ્ર—સુજશચંદ્ર—સુનયચંદ્ર—ભક્તિચંદ્રવિજયજી મ.સા. એ યથાસમય યથાશક્ય સહાયતા કરી છે.

અંતે 'જિન ઉત્તમગુણ ગાવાતા, ગુણ આવે નિજ અંગ' એ પંક્તિને સાર્થક બનાવતા આપણે બધા જલ્દીમાં જલ્દી મોક્ષ સુખના સ્વામી બનીએ એ જ અભ્યર્થના.

**વિ.સં. ૨૦૬૪, માગશર વદ-૧**
**(પ.પૂ. જિનશાસન શણગાર આચાર્ય**
**શ્રી વિજય ચંદ્રોદયસૂરીશ્વરજી મ.સા.નો**
**૬૫મો દીક્ષા દિવસ)**

**-ગણિ જિનેશચંદ્ર વિજય**
પ્રસન્નચંદ્ર સ્મૃતિ ભવન
તળેટી રોડ, પાલિતાણા



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# अनुक्रमणिका


| विषय | पृष्ठ |
|---|---|
| પ્રકાશનની સાથે સાથે | ૩ |
| સંશોધનની પદ્ધતિ | ૪ |
| પ્રસ્તાવના | ૫ |
| श्रीऋषभदेवचरित्रम् | ४ |
| अथ कुलकरोत्पत्तिः | १३ |
| अथ चक्रिवक्तव्यताम् | ३० |
| श्रीअजितनाथचरित्रम् | ४५ |
| श्रीसम्भवचरित्रम् | ५७ |
| श्रीअभिनन्दनचरित्रम् | ६० |
| श्रीसुमतिनाथचरित्रम् | ६३ |
| श्रीपद्मप्रभचरित्रम् | ६७ |
| श्रीसुपार्श्वचरित्रम् | ७० |
| श्रीचन्द्रप्रभचरित्रम् | ७२ |
| श्रीसुविधिचरित्रम् | ७५ |
| श्रीशीतलचरित्रम् | ७७ |
| श्रीश्रेयांसचरित्रम् | ८० |
| अचलत्रिपृष्ठाश्वग्रीवाणां च चरितानि | ८२ |
| श्रीवासुपूज्यचरित्रम् | ८४ |
| विजय-द्विपृष्ठ-तारकाणां चरितानि | ८६ |
| श्रीविमलनाथचरित्रम् | ८८ |
| भद्र-स्वयम्भू-मेरकाणां चरित्राणि | ९० |
| श्रीअनन्तनाथचरित्रम् | ९२ |
| सुप्रभ-पुरुषोत्तम-मधु-कैटभानां चरित्रम् | ९४ |
| श्रीधर्मनाथचरित्रम् | ९६ |
| सुदर्शन-पुरुषसिंह-निशुम्भानां चरितम् | ९९ |
| मघवचक्रिचरितम् | १०० |
| सनत्कुमारचरित्रम् | १०१ |
| श्रीशान्तिनाथचरित्रम् | १०८ |
| श्रीकुन्थुनाथचरित्रम् | १३२ |
| श्रीअरचरित्रम् | १३५ |
| आनन्द-पुरुषपुण्डरीक-बलीनां चरित्रम् | १३७ |
| अरतीर्थे सुभूमचक्रिकथा | १३८ |
| अरतीर्थे नन्दन-दत्त-प्रह्लादानां चरित्रम् | १४१ |
| श्रीमल्लिनाथचरित्रम् | १४३ |
| परिशिष्टम् | १४९ |
| परिशिष्टम् | १५१ |


Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्रीविमलाचार्यविरचितम्

# त्रिषष्टिशलाकापुरुषचरित्रम्



Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

।। श्रीसर्वज्ञाय नमः ।। ।। नमः श्रीपञ्चपरमेष्ठिभ्यः ।।

।। अनन्तलब्धिनिधानश्रीगौतमस्वामिने नमः ।।

।। परमोपास्य श्री नेमि-विज्ञान-कस्तूर-चन्द्रोदय-अशोकचन्द्रसूरिभ्यो नमः ।।

## श्रीविमलाचार्यविरचितम्

# त्रिषष्टिशलाकापुरुषचरित्रम्

देवः स वः स्वपदमाद्यजिनो ददातु,
यस्यांसयोरसितकेशसटे चकास्तः ।
ऊरुस्थलाञ्छनवृषस्य ययोः कलापौ,
दूर्वावणद्वितयसम्भ्रममादधाते ।।१।। (वसन्ततिलका)

देवः श्रियं स दिशतादतिशायिनीं वः,
सिद्धार्थपार्थिवसुतो जगदेकवीरः ।
प्राप्तो यदीयचरणाग्रनिपीडनेन,
मेरुर्नमेरु[1]निचितोऽप्यचलश्चलत्वम् ।।२।। (वसन्ततिलका)

यैर्निर्ममे गौ[2]स्त्रिपदी पुनः सा, दत्ते परेषां पदलक्षकोटीः ।
द्वाविंशतिस्तेऽद्भुतशक्तयो मे, जिनाः प्रयच्छन्त्वजितादिकाः शम् ।।३।। (इन्द्रवज्रा)

यस्याकर्णनतस्त्रुटन्ति सहसा, मिथ्याग्रहग्रन्थयो,
यत्प्राप्तेर्भवपञ्जरं तनुभृतां, जीर्येत् कुटीरोपमम् ।
दुःप्रापापि पतिंवरेव भजते, मुक्तिर्यदाराधकान्,
सोऽव्याद् वः कुगतिद्रुभञ्जनगजः, श्रीमान् जिनस्यागमः ।।४।।
(शार्दूलविक्रीडितम्)

श्रीभद्रबाहुप्रमुखा मुनीन्द्रा, जयन्ति पूर्वे कविभास्करास्ते ।
योद्गोप्रचारानुपदं पदानि, न्यस्यन्ति मुग्धा अपि शास्त्रमार्गे ।।५।। (उपजातिः)

---

१ सुरपुन्नागवृक्ष० ।। २ वाणी ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पूर्वाणि भासन्ति चतुर्दशेति, भव्यानिव ज्ञापयितुं तदुक्तीः ।
चतुर्दशग्रन्थशतान्यकार्षीद्, यस्तं स्तुमः श्रीहरिभद्रसूरिम् ।।६।।
(उपजातिः)

श्रीहेमसूरेर्मुनिवृन्दवृन्दा-रकस्य तस्याऽस्तु नतिर्मदीया ।
यद् ग्रन्थसिद्धाञ्जनसञ्जयेव, चक्षुर्निरीक्षेत जनोऽखिलार्थान् ।।७।।
(इन्द्रवज्रा)

व्यामोहहालाहलदूषितं मे, प्रबोधशक्त्यद्भुतमन्त्रजापात् ।
चैतन्यमुल्लासितमञ्जसा यैर्जयन्तु ते श्रीमलधारिपादाः ।।८।।
(उपजातिः)

दोषान् गुणान् सत्कृतिषु ब्रुवन्तौ, शक्यौ निरोद्धुं खलसज्जनौ न ।
स्तवास्तवाभ्यामपि निष्फलं हि, सङ्कीर्तनं शास्त्रमुखे तयोस्तत् ।।९।।
(इन्द्रवज्रा)

प्रबन्धः पङ्गुवत् कश्चित्, गृहान्न हि बहिर्व्रजेत् ।
अरुणोदयवत् कोऽपि, विश्वं व्याप्नोति तत्क्षणात् ।।१०।।

यादृग्गर्भगतस्य याति समय-स्तादृक्ष एवाङ्गिनो,
बाल्येऽपि व्रजति स्मरज्वरभृतो, यूनो विवेकः कुतः ।
शक्तिः कैव जरागमे तदनयो-रन्तर्दिनान्यल्पका-
न्यालस्यं परिहृत्य कृत्यविषये, किञ्चिन्मनो दीयताम् ।।११।।
(शार्दूलविक्रीडितम्)

कलिः कालः क्रोधप्रमुखगुरुदोषैः कलुषितो,
वपुष्मन्तश्चिन्ताभरविधुरचित्ताश्चिरममी ।
कुतो धर्मध्यानं धृतिरपि कुतः कुत्र सुखिता,
मितं चायुस्तस्मात् कुरुत सुकृतं शक्तिवशतः ।।१२।। (शिखरिणी)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सत्कर्मनिर्मितिजुषां प्रथमो गुणोऽयं,
यत्सङ्गतिः सुकृतिभिर्व्यसनान्निवृत्तिः ।
पुण्यानुबन्धघटना परमो विवेकः,
कीर्तिः कलङ्कविगमः कुमतेर्निरासः ।।१३।। (वसन्ततिलका)

सत्कृत्यमास्ते न हि धर्मतः परं, चतुर्विधेऽप्यत्र कुकर्महृत्तपः।
स्वाध्याय एवेह परः स पञ्चधा, तत्राप्यलं धर्मकथा विरक्तये।।१४।।
(वंशस्थः)

तीर्थङ्कराणां सहिता चरित्रै-राख्यायिकाभिश्च महामुनीनाम्।
कथापि धर्मस्य ददाति हर्षं, पुष्णाति वैराग्यमघं निहन्ति।।१५।। (उपजातिः)

ये वर्णयन्ति कवयो वनितां नितान्त-
मत्युक्तिभिर्तरुणलोकमनोऽनुरक्त्यै ।
कन्दर्पसर्पविषविह्वलजीवलोक-
त्राणाय ते गरलभारणिकां पठन्ति ।।१६।। (वसन्ततिलका)

व्युत्पत्तिमन्तः सरसाः सहस्रं पूर्वैः कृताः सन्ति महाप्रबन्धाः।
स्त्रीबालबोधार्थमहं शलाकापुंसां त्रिषष्टेश्चरितानि वच्मि ।।१७।। (इन्द्रवज्रा)

तीर्थेशचक्रिप्रतिविष्णुसीरिणः,
कृष्णा जिनार्कग्रहसम्मिताः क्रमात् ।
एभिः शलाका शिवसौख्यलब्धये,
क्षिप्ता शलाकापुरुषास्ततस्त्वमी ।।१८।। (इन्द्रवज्रा)

ऋषभाऽजितसम्भवकाऽभिनन्दनाः सुमतिरथ च पद्मप्रभः।
ससुपार्श्वचन्द्रप्रभसुविधिशीतलोऽतः परं श्रेयान् ।।१९।। (आर्या)

श्रीवासुपूज्यविमलाऽनन्ता धर्मोऽथ शान्तिकुन्थ्वरकाः ।
मल्लिं सुव्रतनमिनेमिपार्श्ववीरा जिना एते ।।२०।। (आर्या)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भरतसगरमघवसन-त्कुमारकाः शान्तिकुन्थ्वरशुभोमाः ।
समहापद्मौ हरिषेण-जयौ च ब्रह्मदत्त इति चक्रिणः ।।२१।।

अश्वग्रीवस्तारक-मेरकमधवो निशम्भकश्च ।
बलिः प्रह्लादरावण-जरासन्धाः प्रत्यर्धचक्रभृतः ।।२२।। (आर्या)

अचलो विजयो भद्रः, सुप्रभश्च सुदर्शनः ।
आनन्दानन्दनः पद्मो, रामोऽमी बलभद्रकाः ।।२३।।

त्रिपृष्ठश्च द्विपृष्ठश्च, स्वयम्भूः पुरुषोत्तमः ।
पुरुषसिंहः पुरुष-पुण्डरीकश्च दत्तकः ।।२४।।

नारायणश्च कृष्णश्चा-ऽर्द्धचक्रिण इमे मताः ।
एते शलाकापुरुषा, भरतक्षेत्रसम्भवाः ।।२५।।

## ।।श्रीऋषभदेवचरित्रम्।।

युगपदखिललोक-श्रोत्रपावित्र्यकृद्य-
ज्जनयति तनुभाजां, यच्च कल्याणकोटीः ।
अभिनवमिव किञ्चित्, कुण्डलद्वन्द्वमेत-
च्चरितमृषभदेव-स्याऽस्तु कर्णातिथिर्वः ।।२६।। (मालिनी)

धनसार्थवाह १ मिथुनक २ सौधर्मामर ३ महाबलक्षितिपाः, ४ ईशाने ललिताङ्गाभिधदेवो ५ वज्रजङ्घनृपः, ६ मिथुनक ७ सौधर्मसूरौ, ८ वैद्या ९ ऽच्युतदेव १० चक्रि ११ सर्वार्थाः, १२ ऋषभ १३ श्चादिजिनेन्दोर्भवत्रयोदशकमित्याहुः ।।

अपरविदेहे क्षितिप्रतिष्ठितपुरे धनसार्थवाहो महासमृद्धं सार्थं कृत्वा प्रचलितो वणिज्यार्थं वसन्तपुरे । तेन समं गन्तुं प्रवृत्ताः प्राज्या वणिज्याकारका [१]वनीपकादयश्च ।

१ साधु० ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

बहिः समावासिते च तस्मिन् श्रीधर्मघोषसूरयस्तदन्तिके गत्वा निवेदितवन्तो निजमथाऽऽगमनं तस्य । अनुज्ञातं तेन हृष्टेन । अत्रान्तरे परिपक्वाण्याम्रफलानि समागतानि तस्योपायने तेन च ।

**कोऽन्यान् गुणान् गणयतीह महातरूणा-**
**माकारतोऽपि रुचिरः सहकार[१] एव ।**
**वार्ता फलस्य यदि च क्रियते तदानीं**
**क्षोणीतलं विजितमेतदनेन सर्वम् ।।२७।।**

(वसन्ततिलका)

इत्युक्त्वा ढौकितानि सूरीणां पुरः, तैरपि फलकन्दाद्यमशस्त्रोपहतं नाऽस्माकमुपकरोतीत्यादिर्निजाचारः सविस्तरमुपदिष्टः। प्रहृष्टेन च तेन विचार्य स्वचेतसा, भगवन् कल्प्यमेव दास्यामीत्युक्त्वा वन्दित्वा च विसृष्टास्ते ।।

तदानीं चासन्ना प्रावृट् । सार्थश्च महार्थः । पथि व्रजतामेव वृष्टो मेघः । कस्यापि न वहन्ति वाहनानीत्यटव्यामेवावासान् दत्त्वा स्थितः सार्थः । सार्थवाहमित्रेण च मणिभद्रेण निजं तृणच्छन्नं कुटीरकं समर्पितं सूरीणाम् । लोकश्च क्षीणपाथेयः प्रवृत्तो मूलकन्दाद्याहारे । अन्यदा सार्थवाहः सार्थसौख्यासौख्यं विमृशन् स्मृतवान् सूरिसमागमनं तद्भोजनदौस्थ्यं च । ततो गृहीतः पश्चात्तापेन प्रभात एव प्राप्तो वसतौ। दृष्टाः कष्टानुष्ठानम्लानवपुषो महर्षयः । ससम्भ्रमं च वन्दित्वा सूरीन्, क्षमयित्वा स्वप्रमादं, सादरं साधूनाऽऽहूय गृहे नीतवान् । दृष्टं च प्रगुणं प्राज्यमाज्यं दत्तं, श्रद्धानुबन्धाद् बद्धं तदानीं तेनोत्तमं मनुष्यायुर्जातो भद्रकभावः, प्राप्तं बोधिबीजम्। ततः परं च प्रतिदिनं सूरिसमीपे गत्वा स शुश्राव देशनाम्, जातः क्रमेण परमः श्रावको, निवृत्ता वर्षाः । प्रवृत्तः सार्थो गन्तुमग्रतः । सूरयोऽपि तमनुज्ञाप्यान्यत्र गताः । धनोऽपि समीहितसिद्धिं विधाय समायातः स्वपुरे । दानभोगाऽऽद्यैश्चादाय विभवोपयोगं, कालेन समाधिना मृत्वा ।।१।।

१ आम्रः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

उत्तरकुरुषु सीतानद्युत्तरतटे जम्बूवृक्षस्य पूर्वतः समुत्पन्नो युग्मधर्मी पुमान्।।२।।

ततश्च मृत्वा प्राग्जन्ममुनिदानफलानुबन्धात् सौधर्मो देवो जातः।।३।।

ततोऽपि च्युत्वा अपरविदेहे गन्धिलावतीविजये वैताढ्ये गन्धारदेशे गन्धसमृद्धनाम्नि विद्याधरपुरे राज्ञः शतबलस्य पुत्रो महाबलो नाम्ना जातः । प्राप्तश्च तारुण्यम्, समयेऽथ स्वयं राज्ञा ।।

**उच्छेदो विषयस्य वत्स ! करणव्यापाररोधक्रिया,**
**साधोरेव यशस्तनोति न पुन, विश्वम्भरायाः प्रभोः।**
**राजानः क्षमयैव साधव इव, श्लाघ्या भवन्त्यन्वहं,**
**निर्भीकाः परलोकतश्च समिति-स्फारकस्फुरत्कीर्त्तयः।।२८।।**

(शार्दूलविक्रीडितम्)

इति शिक्षां दत्त्वा स्थापितो निजराज्ये स्वयं च नृपः प्रव्रज्य स्वायुःक्षये स्वर्गी जातः । महाबलोऽपि प्रसक्तो भोगेषु न चेतयति किञ्चन । ।

एकदा आस्थानस्थितस्य महाबलनृपस्य पुरः प्रवर्तमाने सङ्गीतके स्वयम्बुद्धाभिधेन मन्त्रिणा विज्ञप्तम् ।।

**एतैः सङ्गीतकैर्देव-देवा अपि विमोहिताः ।**
**कालं नाकलयन्त्येव प्राज्यमप्यात्मनो गतम् ।।२९।।**

**एतन्मानुष्यकं नीवी[१], जन्तोर्धर्मधनाऽर्जने ।**
**वृथा निर्गमितं तच्चेत्, कुतः कल्याणसङ्गमः ।।३०।।**

प्रोक्तं राज्ञा मन्त्रिन् ! युक्तमेव धर्मासेवनं, परं समये, नैवासमये । ततोऽमात्येनोक्तं, देव ! गतोऽहमद्य नन्दनोद्याने, दृष्टौ तत्र मया महाज्ञानिनौ चारणमुनी। श्रुता तद्देशना, समये च पृष्टं मया भवदायुःप्रमाणम् । ताभ्यां च मासमात्रं निवेदितं

१ मूलधनम् (पूंजी)।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ते जीवितम् । अन्यच्चोक्तं, यदद्य निशावशाने दृष्टो महाबलनृपेण स्वप्नो यदहं क्षिप्तोन्धकूपे सम्भिन्नश्रोतःप्रमुखैरमात्यैः स्वयम्बुद्धेन पुनरुद्धृत इति । सम्प्रति च त्वद्दर्शनाभिलाषी वर्ततेऽसौ महात्मा । भावितीर्थकरजीवश्चायमिति । ततोऽहं सत्वरं तौ वन्दित्वाऽनुज्ञाप्यागत्य च देवपादान् समयेऽपि विज्ञप्तवान् । ततो मिलितप्रत्ययः संविग्नः सहसैव राजा गृहीतः पश्चात्तापेन प्रवृत्तो भणितुम्–

**तारुण्ये न कृतः कुकर्मनिरतै-र्ब्रह्मण्यऽजिह्मो लयः,**
**किं सम्प्रत्युपजातवार्द्धककलाः, कुर्मः सुशर्मावहम् ।**
**अङ्गे भङ्गुरतां गतेऽद्य जरसा, कृत्येषु नैव क्षमाः,**
**पश्चात्तापहते च चेतसि रतिर्धर्मस्य कौतस्कुती** ।।३१।। (शार्दूलविक्रीडितम्)

इत्युक्त्वा, दत्त्वा महादानानि, कृत्वा चैत्येषु पूजां, विन्यस्य स्वपुत्रं राज्ये, जग्राह व्रतम् ।।

कृत्वा द्वाविंशतिदिनान्यनशनं समाधिना मृत्वा।।४।। समुत्पन्नो ललिताङ्गनामा देव ईशाने श्रीप्रभविमाने।मिलित्वाऽभियोगिकदेवैः कारितः पुस्तकवाचनमाणवस्तम्भ- स्थितार्हदऽस्थ्यऽर्चनादिक्रमम् । सस्मार चावधिज्ञानेन जन्मान्तरकृतं जिनधर्माराधनम् । चकार मेर्वादिषु शाश्वताऽर्हद्बिम्बवन्दनाम् । शुश्राव गत्वा महाविदेहादिषु तीर्थकरदेशनाम् । स्वयम्प्रभाभिधाना च तस्य महादेवी परमप्रीतिस्थानमभूदविरहितश्च तया स सदैव चिक्रीड । अन्यदा स्वायुरन्ते सहसैव च्युता स्वयम्प्रभादेवी । पीडितस्तद्विरहेण सः ।।

इतश्च स्वयम्बुद्धोऽपि गृहीतदीक्षोऽनशनेन मृत्वा, शक्रसामानिक्रो दृढधर्माभिधानो जातो देव ईशाने, प्राग्भवसौहार्दादागत्य स ललिताङ्गदेवं प्रोवाच।।

**अनित्यः सर्वोऽयं, भवभवनवर्ती ननु जनः,**
**प्रमादी जीर्यन्तं, कलयति न कश्चिन्निजमपि ।**
**समुत्पन्नः को वा, न मृतिपदम-स्त्यङ्घिषु ततो,**
**विषादः कातर्यं, न खलु महतामेतदुचितम्** ।।३२।। (शिखरिणी)

Jain Educationa International                For Personal and Private Use Only                www.jainelibrary.org

ललिताङ्गेनोक्तम् । यद्यप्येवं तथापि न प्रियामन्तरेण क्षणमपि स्थातुं शक्नोमि। ततो देवः क्षणं सावधानो भूत्वा प्रोवाच । स्थिरीभव, लब्धा मया भवत्प्रिया ।।

धातकीखण्डे प्राग्विदेहेषु नन्दिग्रामे दरिद्रस्य श्रेष्ठिनो नागिलस्य सप्तानां पुत्रीणामुपर्यष्टमी कुरूपात्यन्तनिर्भाग्या पुत्री जाता । तस्यां जातायां प्रणश्य क्वापि गतः पिता । अभिधानमपि न केनापि तस्याः प्रदत्तम् । ततो निर्नामिकेति जनैरुच्यमाना प्राप्ता वृद्धिम् । जीवति च दुष्कर्मवृत्त्या । एकदाऽम्बरतिलकगिरौ गता सा दार्वाद्याऽऽनेतुम् । दृष्टस्तत्र तया तत्कालोत्पन्नकेवलज्ञानः सुरनिर्मितस्वर्णसिंहासनासीनः सभायां धर्मं समुपदिशन् युगन्धरनामा मुनिः । गत्वा वन्दितः सप्रमोदं, मुनिनाऽपि दुःखितेति विशेषतः प्रदत्ता तस्याऽनुशास्तिः ।।

**क्षेत्रं कलत्रमशनं वसनं धनं च,**<br>
**येषां समस्ति सुखिनो नियमान्न तेऽपि ।**<br>
**एतद्विपर्ययजुषोऽपि न दुखिनः स्यु-**<br>
**रज्ञानतैव परमार्थवशेन दुःखम्।।३३।।** (वसन्ततिलका)

**यद्यत्समाचरति मूढमतिः सुखाय,**<br>
**तत्तत्सुखभ्रमकृदायतिदुःखदं तत् ।**<br>
**ज्ञानी हि कर्मविगमाय करोति यत्नम्,**<br>
**निष्कर्मकस्य सुखमेव न दुःखलेशः ।।३४।।** (वसन्ततिलका)

इत्यादि श्रुत्वा प्रतिबुद्धा सा। प्रपन्ना च सम्यक्त्वमूलं श्रावकधर्मम् । दुर्भगेति न केनापि सा परिणीता। सम्प्रति च गृहीतानशना तत्रैवाऽद्रौ पुनरागतस्य तस्यैव मुनेः पार्श्वे विद्यते। तद्गत्वा त्वं, तस्याः स्वं प्रदर्शय । येन त्वद्रागिणी मृत्वा सा स्वयम्प्रभैव समुत्पद्यते। तेनापि कृतं तथा । साऽपि तेन निदानेत मृत्वा, समुत्पन्ना स्वयम्प्रभा। ततः परं प्राग्वदवियुक्तौ तौ भूयासं कालमतिवाहितवन्तौ। अन्यदा ललिताङ्गस्याऽऽसन्नच्यवनचिह्नान्युत्पन्नानि। तदानीं चेशानेन्द्राऽऽदेशाद् दृढधर्मदेवः समायातस्तदाऽऽह्वानाय। तत तेन सह गत्वा कृता नन्दीश्वरे यात्रा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ललिताङ्गेन अन्येषु च तीर्थेषु गच्छन् च्युतोऽसौ ।।

जम्बूद्वीपे पूर्वविदेहे सीतानद्युत्तरतटे पुष्कलावतीविजये लोहार्गलपुरे राज्ञः सुवर्णजङ्घस्य लक्ष्मीदेवीकुक्षाववतीर्णः। समये जातः पुत्रः। कृतं वज्रजङ्घ इति नाम। प्राप्तस्तारुण्यम् । स्वयम्प्रभापि च्युत्वा तत्रैव विजये पुण्डरीकिण्यां नगर्यां वज्रसेनतीर्थकरचक्रवर्तिनः पुत्री जाता। कृतं श्रीमतीति नाम । प्राप्ता यौवनम्। पितृभ्यां च तदर्थं कारितः स्वयंवरमण्डपः। समाहूताः क्ष्मापालसुताः । श्रीमत्या च नगरोपान्ते समुत्पन्नकेवलज्ञानस्य मुनेः समीपे समागच्छन्तो दृष्टा देवाः। ऊहापोहपरायाश्चोत्पन्नं जातिस्मरणम् । सखीमुखेन विज्ञापितं राज्ञो निर्नामिकाभवप्रभृतिकं ललिताङ्गच्यवन-निजच्यवनपर्यन्तं स्वचरित्रम् । ललिताङ्गादन्यवरनिषेधश्च ज्ञापितः पित्रोः ।।

पितृभ्यां च कारितः सुव्यक्तस्तच्चरित्रपटः, स्थापितो राजपथे। यः कश्चिल्ललिताङ्गजीवो भविष्यति स स्वयमेव विचार्य स्वप्रियां परिणेष्यतीति। दर्श्यते स पटः प्रत्येकं राजपुत्राणाम्। तत्र च बहुभिर्भूपालपुत्रैरारब्धो मायावृत्तान्तः । परं ते न निर्व्यूढाः। प्राप्तश्च तत्र वज्रजङ्घः। पटं दृष्ट्वा मूर्च्छितः । क्षणं कृतशैत्योपचारः, प्रत्यावृत्तचैतन्यः पठितवान्।।

**औत्सुक्यं वहतु द्वयं नयनयो-र्यद्गोचरेनैव सा,**
**पातुं तद्वचनामृतं श्रुतियुगं, पुष्णातु तृष्णामपि ।**
**भ्रातः किं हृदयाऽनुभूतदयिता-संयोग ! धत्से त्वरां,**
**तां प्राप्तुं पुनरेव, कस्य यदि वा, तृप्तिः समस्ति प्रिये।।३५।।** (शार्दूलविक्रीडितम्)

•

पृष्टोऽसौ चेटीभिः कोऽयं सानुमानिति । तेनाप्यम्बरतिलकोऽयमित्यादि। सर्वमपि व्यक्तमावेदितम् । ततः प्रहृष्टाः सर्वे। समुच्छलितो जयजयध्वनिः । प्रक्षिप्ता कण्ठे स्वयं श्रीमत्या वरमाला । निवृत्तो विवाहः । महता सम्मानेन विसृष्टः सन् गतः सवधूकः स्वपुरीम् । सुखमनुभवतश्च तस्य गतः कियानपि कालः । पित्रा च स्थापितो निजे राज्ये । त्रिवर्गसाधनया च राज्यं कुर्वाणस्योत्पन्नो योग्यः पुत्रः । प्राप्तश्च तारुण्यम् ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ श्रीमतीभ्रातुः पुष्कलपालस्य विप्रतिपन्नाः सीमसामन्तास्तत्साहाय्याय श्रीमत्या समं चलितः पुण्डरीकिणं प्रति वज्रजङ्घः नृपः । अर्द्धमार्गगतस्य च मार्गज्ञैरत्र शरवणमध्ये दृग्विषः सर्पोऽस्तीत्यस्य विज्ञप्तम् । ततो गतोऽन्येन पथा तत्र। पुष्कलपालस्याऽपि वशीभूताः शत्रवः। सत्कृत्य विसृष्टो वज्रजङ्घः शरवणसमीपागतश्च पुनरपि विज्ञप्तस्तैः । देव ! केवलज्ञानमुत्पन्नमत्र द्वयोरनगारयोः जातं च देवानामागमनम्। तदुद्योतेन प्रतिहता दृग्विषस्य विषशक्तिः अद्याप्यत्रैव धर्मं दिशन्तौ तौ स्त इति। ततो गतः श्रीमतीसहितस्तौ वन्दितुं नृपः। वन्दित्वोपविष्टे तस्मिन् कृता ताभ्यां धर्मदेशना।।

**अपारे संसारे, जननमरणश्रेणिषु पुरा-**
**ऽनुभूतं यद्दुःखं, सुखमपि च जीवेन यदहो।**
**न ताभ्यां सन्तुष्टः, स्पृहयति परप्राणहृतये**
**रतः शब्दाद्येषु, श्लथयति तपःकर्मणि लयम् ।।३६।।** (शिखरिणी)

इत्याकर्ण्य प्रबुद्धौ द्वावपि, वन्दित्वा मुनी, स्वपुरमागत्य प्रातः सुतं राज्ये न्यस्य प्रव्रजिष्याव इति निश्चित्य रात्रौ वासगृहे सुप्तौ तौ दम्पती । पुत्रेण चाविज्ञाय तदभिप्रायं राज्यलोभेन वासभवने विषधूपप्रयोगः कृतः । शुभभावौ च द्वावपि मृत्वा ।।६।। उत्तरकुरुषु समुत्पन्नौ युग्मरूपिणौ ।।७।। स्वायुःप्रान्ते मृत्वा द्वावपि सौधर्मे जातौ स्नेहलौ सुरौ ।।८।।

वज्रजङ्घजीवस्ततश्च्युत्वा जम्बूद्वीपे महाविदेहे क्षितिप्रतिष्ठितपुरे सुविधेर्वैद्यस्य पुत्रो जातः । कृतं तस्य जीवानन्द इति नाम । तदानीं च तत्रान्येऽपि च चत्वारो दारका जाताः । ईशानचन्द्रस्य राज्ञः पुत्रो महीधरः, मन्त्रिपुत्रो सुबुद्धिः, सार्थवाहपुत्रः पूर्णभद्रः, श्रेष्ठिपुत्रश्च गुणाकरः । पञ्चानामपि प्रवर्द्धमानानां तेषामन्योन्यं प्रीतिरत्यर्थं जाता । श्रीमतीजीवोऽपि च्युत्वा तत्रैव श्रेष्ठिपुत्रः केशवनामा जातोऽस्ति । सोऽपि षष्ठं मित्रम् । एकदा जीवानन्दस्य वैद्यस्य गृहे पञ्चापि जनाः सम्भूय स्वैरं भ्रमन्तः समायाताः । तदानीं राजर्षिर्गुणाकरो नाम व्रती भिक्षार्थमागतः । तं च

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुष्ठाकुलमालोकयतां पञ्चानामप्युत्पन्ना कृपा । पठितं तैः।।

**प्रकृतिरियं जन्तूनां, व्यसनेष्वप्रेरिताः प्रवर्तन्ते ।**
**शुभकर्मणि च नियुक्ताः, कुप्यन्ति समुद्विजन्ते च ।।३७।।** (आर्या)

**उपहतो व्यसनैर्गणिकादिभिः, किमपि चेतयते न धनं किरन् ।**
**सुकृतकर्मणि तु व्ययितान् लवा-नपि सहस्रसमान् मनुते जनः ।।३८।।**
(द्रुतविलम्बितम्)

इत्यादिवचनैः प्रोत्साहितो जीवानन्दवैद्यस्तच्चिकित्सार्थम् । तेन चोक्तम् । महत्या सामग्र्या चिकित्स्योऽयं मुनिर्द्रव्यव्ययेन महता लक्षपाकं तैलं गोशीर्षं चन्दनं रत्नकम्बलश्च सम्पद्यन्ते। तत्रापि तैलमस्त्येव मम गृहे तदहं करिष्यामि । शेषं तु चिन्तनीयमिति। ततो गता पञ्चापि ते जीर्णश्रेष्ठिसमीपे । तैर्याचितं मूल्येन रत्नकम्बलादिकम्। पृष्टं श्रेष्ठिना किमर्थमिति । तैरुक्तं साधुमेकं चिकित्सिस्यामः । जातसंवेगेन श्रेष्ठिना समर्पितं सर्वं साधिकम् । न गृहीतं मूल्यम् । तेनैव संवेगेन प्रवृद्धोत्साहः, सर्वमपि प्रोज्य जग्राह सुगुरुमूले दीक्षाम् । कृत्वा कर्मक्षयं सिद्धः श्रेष्ठिमुनिः। ते च तैलादिसामग्रीं गृहीत्वा वैद्येन समं गताः षडपि जनाः कायोत्सर्गस्थस्य मुनेः समीपमरण्ये। अनुज्ञाप्य च मुनिं कृतः सर्वाङ्गमभ्यङ्गः । संवाहितमङ्गं प्रच्छादितो रत्नकम्बलेन तैलतापव्याकुलाश्च निःसृताः कम्बललग्राः कृमयः सञ्चारिताः पूर्वमृतगोशवे। चर्चितश्चन्दनेन। एवमनेकप्रकारां कृत्वा क्रियां कृतो नीरोगो मुनिः। जातः प्राग्वत्सुवर्णवर्णशरीरः। आसितः समुचितासने। पादयोर्निपत्य क्षमितः सर्वैराशातनाम्। धर्मलाभाशीर्वादपूर्वं च कृता मुनिना देशना।।

**आहारो मितकालमेव कुरुते, क्षुद्व्याधिबाधाविधिं,**
**प्रोक्तं प्राज्यफलं तथापि सुतरा-माहारदानं श्रुते।**
**देहस्त्वेष चिकित्सितश्चिरतरं, धर्मोपकारी मुने-**
**स्तद्ग्लानस्य चिकित्सनं जिनतनू-पास्त्या समं वर्णितम्।।३९।।**
(शार्दूलविक्रीडितम्)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इति श्रुत्वा षडपि प्रतिबुद्धास्ते मुनिमनुज्ञाप्य गताः कृत्यशेषकरणाय । मुनिरप्यन्यत्र विजहार। तैश्च गत्वा चिकित्साऽवशेषतैलकम्बलचन्दनविक्रयसुवर्णेन स्वकीयद्रव्येण च स्तोकदिनमध्ये निर्मापितमुत्तुङ्गशृङ्गं जिनायतनम्। ततः षड्भिरपि गृहीतं व्रतं पालितं निष्कलङ्कम्। मृत्वा।।९।। षडप्युत्पन्ना अच्युते ।।१०।।

जम्बूद्वीपे पूर्वविदेहे पुष्कलावतीविजये पुण्डरीकिण्यां वज्रसेनस्य तीर्थकरभूपतेः धारिण्याः पत्न्याः कुक्षावच्युताच्च्युत्वा, वैद्यजीवश्चतुर्दशस्वप्नसूचितचक्रिजन्मा अवतीर्णः। समये च जातः पुत्रः, कृतं तस्य वज्रनाभ इति नाम । शेषा अपि चत्वारश्च्युत्वा तस्यैव वज्रसेनतीर्थकरभूपभार्याया धारिण्या एव कुक्षौ क्रमेण राज-मन्त्रि-श्रेष्ठि-सार्थवाहपुत्रजीवाः पुत्रत्वेन समुत्पन्नाः । तेषां बाहु-सुबाहु-पीठ-महापीठा इति क्रमेण नामानि । केशवजीवोऽपि सुयशा इति नाम्ना तत्रैव राजपुत्रः समुत्पन्नः । स च बाल्यादपि वज्रनाभमनुश्रितोऽस्ति । क्रमेण शेषा अपि वज्रनाभस्यान्तरप्रीतिपदं सञ्जाताः । प्राप्ताश्च षडपि तारुण्यम् । श्रीवज्रसेनोऽपि समये लोकान्तिक देवैर्विज्ञप्तस्तीर्थप्रवर्तनाय विन्यस्य स्वराज्ये पुत्रं वज्रनाभं सांवत्सरिकदानपूर्वं प्रपन्नः सर्वविरतिम् । मनःपर्यायं केवलं च ज्ञानमस्योत्पन्नम् । प्रवृत्तो नानादेशेषु भव्यान् बोधयितुं । वज्रनाभस्यापि समुत्पन्नं चक्ररत्नम्। साधितषट्खण्डः क्रमेण जातश्चतुर्दशरत्नस्वामी नवनिधीश्वरः सर्वचक्रवर्तिवैभवभाजनम् ।।

अन्यदा श्रीवज्रसेनतीर्थकरः समवसृतस्तत्र । सपरिवारो गतश्चक्री पितरं तीर्थकरं वन्दितुम् । वन्दित्वा समासीने तस्मिन् कृता प्रभुणा देशना ।।

**जन्तोरनन्तेषु भवेषु भोगाः, सिद्धास्तदप्यस्य न जातु तृप्तिः ।**
**नवं नवं वेत्ति भवे भवेऽसौ, सन्तोषपोषः सुखकृत् तदेकः।।४०।।**

(उपजातिः)

इति श्रुत्वा पुत्रे राज्यं न्यस्य वज्रनाभश्चक्री बाहु-सुबाहु-पीठ-महापीठ-सुयशःप्रभृतिभिः समं व्रतं प्रतिपन्नवान्, जातश्चतुर्दशपूर्वधारी, जाताश्चैकादशाङ्गधारिणः शेषाः । वज्रनाभमुनिना च विंशत्या स्थानकैरर्जितं तीर्थकृन्नामकर्म । बाहुना

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

साधुयोग्यान्नपानाद्यानयनादिना वैयावृत्येन चक्रवर्त्तिभोगफलं कर्म समुपार्जितम्। सुबाहुना तु महर्षीणां विश्रामणया लोकोत्तरं बाहुबलमुपार्जितम् । वज्रनाभोऽपि बाहुसुबाह्वोर्वारंवारं प्रशंसां करोति । ततो पीठमहापीठाभ्यामसहनाभ्यां चिन्तितम्।।

**उपकारकरस्यैव, गौरवं क्रियते जनैः ।**
**निश्छायो निष्फलस्तालः, सलिलैः केन सिच्यते ।।४१।।**

तदावामपि गुरोर्गच्छस्य चानुपकारकौ इति, न प्रशस्यावहे । इतीर्ष्याप्रत्ययं स्त्रीत्वायुस्ताभ्यामुपार्जितम् । षड्भिरपि चतुर्दशपूर्वलक्षीं यावन्निष्कलङ्कं व्रतं पालितम्। स्वायुः प्रान्ते मृत्वा।।११।। सर्वार्थसिद्धे विमाने षडप्युत्पन्नाः।।१२।।

## ।। इत्यादिदेवस्य पूर्वभववर्णना समाप्ता।।

## ।।अथ कुलकरोत्पत्तिः।।

जम्बूद्वीपेऽपरविदेहेऽपराजितायां पूर्यामीशानचन्द्रो राजा, चन्दनदासः श्रेष्ठी, तत्पुत्रः सागरचन्द्रः । स चान्यदा गतो राजानं द्रष्टुम् । अत्रान्तरे वनपालेनागत्य विज्ञप्तो राजा ।।

**अशोकैः पुन्नागै-स्तरुभिरपरैर्वासकरणै-**
**स्तवोद्यानं पूर्वैः, कुलमिव नरैः पूर्णमखिलम् ।**
**अमुस्मिन्नैकोऽपि, प्रकृतिकठिनो नापि कुटिलः,**
**फलैर्नैव त्यक्तः, प्रणयिषु नवातापशमनः ।।४२।।** (शिखरिणी)

ततः प्रहृष्टेन राज्ञा सर्वैरपि सपरिवारैः पौरैः प्रातरुद्याने समागन्तव्यमित्यादिष्टम् । सागरचन्द्रश्च स्वयमेव सप्रसादमामन्त्रितः । ततो गतः सर्वः । कोऽप्युद्याने सशृङ्गारो लोकः । सागरचन्द्रोऽप्यशोकदत्तेन मित्रेण समं गतः । सम्प्राप्तश्च सान्तपुरो राजा ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पुन्नाग ! पुन्नागतरुः पुरस्तादशोक ! नाशोकवनं विदूरे।**
**समाश्रितश्रीफल! लक्षसङ्ख्यफलोज्ज्वलः श्रीफल एष वृक्षः।।४३।।**

(उपजातिः)

यावदेवं वनपालेन दृश्यमानवृक्षविशेषः सानन्दमवलोकयन्नृपोऽस्ति तावत् त्रायध्वमिति तरुगह्वरात् त्रस्तस्त्रीध्वंनिरुत्थितः । किमेतदिति सम्भ्रान्तोऽभिधावितः सन्निहितवर्ती सागरचन्द्रः । दृष्टानेन बन्दिकारैर्धृता सालङ्कारा पूर्णभद्रश्रेष्ठिकन्या प्रियदर्शना । सहसैवैकस्य बन्दिकारस्य पाणिमुन्मोट्य गृहीता तेन क्षुरिका । प्रवृत्तस्तान्निहन्तुम् । प्रणष्टाः शृगाला इव बन्दिकाराः । हृष्टया दृष्टस्तया सानन्दं कोऽयं मे प्राणदाता, तदस्याप्यहमात्मानं ददामीति सङ्कल्प्य, कृतो हृदि निश्चयः, नान्यममुं विना परिणयामीति । गता सा स्वगृहे । सोऽपि तत्कालोन्मीलितप्रेमाऽऽबन्धो बबन्ध हृदि निश्चयं यदहमप्येनामेवोद्वहामि, नान्यामिति । समये च गतो मित्रेण समं विकल्पाकुलः स्वगृहे । ज्ञातवृत्तान्तेन च पित्रा समाहूय, रहसि भणितोऽसौ।।

**राज्ञामेव विराजतेऽद्भुतभुजा-ऽवष्टम्भसंरम्भिता,**
**नेयं विप्रवणिग्जनस्य यशसे, बर्हिस्तुलाधारिणः ।**
**उत्तीर्णं निजजातितो न हि शुभो–दर्काय पुंश्चेष्टितं,**
**पक्षोत्थानमुपानयेन्न मरणं, किं कीटिकानां कुले।।४४।।**

(शार्दूलविक्रीडितम्)

अयं च त्वन्मित्रमशोकदत्तः कदापि तव निश्चितं शोकप्रदो भविष्यतीति। सागरचन्द्रेण पादयोर्निपत्य क्षमितः पिता स्वापराधम् । पित्रापि पूर्णभद्रश्रेष्ठिनं प्रार्थ्य विवाहितस्तां प्रियदर्शनामसौ । सुखमुपभुञ्जानस्यैवं तस्य गतो भूयान् कालः ।।

एकदा सागरचन्द्रे बहिर्गतेऽशोकदत्तगृहमायातस्तेन प्रार्थिता प्रियदर्शना । तया चाक्रोशदानपूर्वं निष्कासितः । स दुरात्मा गतः, श्याममुखो दृष्टः सागरचन्द्रेण, पृष्टश्च दौर्मनस्यकारणम् । असावपि सदुःखमिव प्रोवाच । गतोऽहं त्वद्गृहे, रह इति प्रार्थितश्च त्वत्पत्न्या, ततः प्रणश्य निसृतोऽहं प्राप्तश्च त्वदन्तिकमिति ।। सागरचन्द्रेणोक्तम्-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**स्त्रीणां चित्तस्य वित्तस्य, जीवितव्यस्य च क्वचित् ।**
**स्थिरता यदि तद्व्यग्रो, मार्गः स्वर्गाऽपवर्गयोः ।।४५।।**

ततो मा विषीद । ईदृश्य एव स्त्रियः, नावयोर्युगान्तरेऽपि चित्तमालिन्यं, निर्मल एव त्वमिति । द्वावपि प्राग्वदेव वर्तेते । सागरचन्द्रश्च प्रियदर्शनां प्रति विरक्तः। सा च माऽनयोर्मत्कृतो भेदोऽभूदिति भर्त्रे न शशंस । एवं च सति सागरचन्द्रेण स्वविभवं दीनादिषु विश्राण्य स्वायुः प्रान्तः साधितः । प्रियदर्शनापि विपन्ना ।।

जम्बूद्वीपे भरतदक्षिणखण्डे गङ्गासिन्ध्वन्तर्भागेऽवसर्पिण्यास्तृतीयके सुषमदुःषमारके पल्याष्टमांशे शेषे सागरचन्द्रः प्रियदर्शना च युगलिषूत्पेदाते ।।

प्रस्तावात् कालचक्रस्वरूपं यथा । पञ्चसु भरतेषु पञ्चस्वैरवतेषु अवसर्पिण्युत्सर्पिणीभ्यां द्विधा कालः। द्वयोरपि क्रमोत्क्रमगैः षड्भिररैर्द्वादशारं कालचक्रं सागरोपमं विंशतिकोटिकोटिप्रमाणम् । तत्रैकान्तसुषमायां सागरोपमाणां चतस्रः कोटिकोटयः । सुषमायां तिस्रः कोटिकोटयः । सुषमदुःषमायां द्वे कोटिकोटी। दुःषमसुषमायां द्वाचत्वारिंशद्वर्षसहस्रोना एका कोटिकोटिः । दुःषमायामेकविंशतिवर्ष-सहस्राः। एकान्तदुःषमायामप्येकविंशतिर्वर्षसहस्राः प्रमाणम् । सर्वा ये दशकोटिकोटयः। प्रथमे अरत्रये यथासङ्ख्यं मर्त्यानां त्रिद्व्येकपल्यानि जीवितं, त्रिद्व्येकगव्यूतान्युच्छ्रयः, त्रिद्वयेकदिनतः कल्पद्रुमफलं भोज्यम् । चतुर्थे त्वरके मर्त्यानां पूर्वकोटिरायुः, पञ्चधनुःशतान्युच्छ्रयः । पञ्चमे त्वरके मर्त्यानां वर्षशतमाऽऽयुः, सप्तहस्ताश्चोच्छ्रयः। षष्ठे त्वरके मर्त्यानां षोडशाब्दान्यायुः, एकहस्तश्चोच्छ्रयः । उत्सर्पिण्यां तावत्प्रमाणायामेत एव षडप्यरा नाम प्रमाणयुगलितनुमानजीवित- सङ्ख्याभिरुत्क्रमतो ज्ञेयाः ।।

तौ च तृतीयारकप्रान्तजातत्वाद् दैर्घ्ये नवधनुःशतमानौ पल्योपमदशमांशायुष्कौ च । अशोकदत्तोऽपि मृत्वा प्राग्जन्मकृतमायाप्रभावात् तत्रैव चतुर्दन्तः श्वेतवर्णो हस्तिः समुत्पन्नः । एकदा तेन दन्तिना भ्रमता प्राग्जन्ममित्रं सागरचन्द्रजीवो युग्मधर्मी दृष्टः । स्नेहातिरेकेण द्वयारप्यन्योन्यमवलोकयतोरुत्पन्नं जातिस्मरणम् । अनिच्छन्नपि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स हस्तिना स्वं स्कन्धमध्यारोपितः । ततः परं सदैव तत्रारूढः स सर्वत्र विचरति । ततः मिथुनकैस्तस्य विमलवाहन इति दत्तं नाम । तदा चोत्सन्नप्रायाः स्वल्पदाश्च कल्पद्रुमा जाताः। मिथुनकानां ममत्वाबन्धः । परस्परपराक्रमेण च विमलवाहनेन राजधर्मः कथितः । तैः सर्वैः स एव कृतो राजा । तेन च हाकारनीतिः प्रयुक्ता । हा ! त्वया दुःकृतं कृतं वचन मात्रेणैव तेषामन्यायनिर्वृत्तिरिति । षण्मासावशेषायुषि च तस्मिन् चन्द्रयशोऽभिधानायां तद्भार्यायां मिथुनं जातम् । चक्षुष्मान् चन्द्रकान्तेति च तयोर्नामकृतम् । तौ चासङ्ख्येयपूर्वायुष्कौ अष्टधन्वशतोच्छ्रयौ च षणमासीं यावत्प्रपाल्य ततः स्वं युग्मं समाधिना मृत्वा विमलवाहनः सुपर्णकुमारेषूत्पन्नः । चन्द्रयशास्तु नागकुमारेषु । हस्त्यपि मृत्वा नागकुमारेषु गतः ।।१।।

चक्षुष्मच्चन्द्रकान्तयोरपि जातं मिथुनम् । सप्तधन्वशतोच्चं पितृतो न्यूनायुष्कं च । यशस्वी सुरूपेति तयोर्नाम। चक्षुष्मच्चन्द्रकान्तयोर्विपन्नयोः सुपर्णनागकुमार-योर्यथासङ्ख्यमुत्पत्तिः ।।२।।

यशस्विसुरूपयो राज्ये माकारनीतिर्जाता तयोरपि जातं मिथुनम् । सार्द्धषड्धनुःशतोच्चं पितृतो न्यूनायुष्कं च अभिचन्द्र-प्रियङ्गुरिति तयोर्नाम । यशस्विसुरूपयोरवसाने उदधिकुमारनागकुमारयोरुत्पत्तिः ।।३।।

अभिचन्द्रप्रियङ्ग्वोरपि जातं मिथुनम् । षड्धनुःशतोच्चं पितृतो न्यूनायुष्कं च प्रसेनजित् चक्षुःकान्तेति तयोर्नाम । अभिचन्द्रप्रियङ्ग्वोरन्ते उदधिकुमार-नागकुमारयोर्गतिः ।।४।।

प्रसेनजिद्राज्ये धिक्कारनीतिर्जाता । तयोरपि जातं मिथुनम् । सार्द्धपञ्चधनुः-शतोच्चं पितृतो न्यूनायुष्कं च मरुदेवः श्रीकान्तेति तयोर्नाम । प्रसेनजिच्चक्षुः-कान्तयोरायुःक्षये द्वीपकुमारनागकुमारयोरुत्पत्तिः ।।५।।

मरुदेवश्रीकान्तयोरपि जातं मिथुनम् । सपादपञ्चधनुःशतोच्चं पितृतो न्यूनायुष्कं च नाभिर्मरुदेवेति तयोर्नाम । मरुदेवश्रीकान्तयोरऽन्ते द्वीपकुमारनागकुमारयो-रुत्पादः ।।६।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इति कुलकररीत्या राज्यं परिपालयति । सप्तमे नाभिनामनि कुलकरे सुषमदुःषमाभिधस्य तृतीयारकस्य एकोननवतिपक्षाधिकेषु चतुरशीतिपूर्वलक्षेष्ववशिष्टेष्वाषाढसुदि(वदि)चतुर्थ्यामुत्तराषाढानक्षत्रे सर्वार्थसिद्धविमानाच्च्युत्वा वज्रनाभजीवश्चतुर्दशस्वप्नसूचिततीर्थकरजन्मा नाभेर्नृपस्य पत्न्या मरुदेवायाः कुक्षाववतीर्णः । जातं च तदानीं नारकाणामपि सुखम् ।।

प्रातर्नाभेः कुलकरनृपस्य स्वप्नान् विचारयितुं प्रवृत्तस्य सम्प्राप्ताः शक्रादयः कृत्वा विचारं, तीर्थकरोत्पत्तिं च कथयित्वा, नियोज्य गर्भरक्षार्थमाभियोगिकान् देवान्, पुनर्गताः स्वं स्वं स्थानम् । नवमासाऽर्द्धाष्टमदिनान्ते च चैत्रबहुलाष्टम्यामुत्तराषाढायां युगलधर्मिणं पञ्चधनुःशतप्रमाणं सुवर्णवर्णं वृषभलाञ्छनं ज्ञानत्रयधरं सर्वाद्भुतलक्षणं चतुरशीतिपूर्वलक्षायुषं प्रथमं तीर्थकरं पुत्रं मरुदेवास्वामिनी प्रसूता। जातानि पञ्चदिव्यान्यन्तःपुरे । प्रमुदितं नारकैरपि । सम्प्राप्ताश्च स्वं स्वं नियोगमनुष्ठातुं दिक्कुमार्यः ।।

**ऊद्ध्वाधोदिग्भ्योऽष्टाष्टैकैका विककुभां चतुर्णां च ।**
**मध्यमरुचकानामिति षट्पञ्चाशद् दिशां कन्याः ।।४६।।**

**सम्मार्जनजलसेचनदर्पणभृङ्गारतालवृन्तधृतिः ।**
**चामरदीपकनालच्छेदा दिक्कन्यकाकृत्यम् ।।४७।।**

**ताश्च जिनजिनजनन्योरभ्यङ्गस्नपनहोमरक्षाद्यम् ।**
**सूतिगृहयाम्यपूर्वोत्तरकदलिगृहेषु कुर्वन्ति ।।४८।।**

सर्वदेवलोकघण्टानां युगपदनाहतध्वननेनासनकम्पेनाऽवधिना च जानन्ति जिनोत्पत्तिं शक्रादयः ।।

ततः सौधर्मेन्द्रप्रथममुत्थाय सप्ताष्टानि पदानि गत्वा पञ्चाङ्गचुम्बितभूपीठः शिरस्यञ्जलिं बद्ध्वा शक्रस्तवेन स्तुत्वा नैगमेषिकृतलक्षयोजनमाने पालकविमाने सपरिवारः समारुह्य नन्दीश्वरे समायाति । ततः सङ्क्षिप्यमानं जिनजन्मगृहादीशानकोणे

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विमानं संस्थाप्य ततः समुत्तीर्य प्रभुसमीपमभ्येति । प्रणमति चालोकमात्रे स्थितः प्रभुम् । ततो भगवन्तं समातरं प्रदक्षिणयति । मूर्ध्न्यञ्जलिं बद्ध्वा जिनजननीं स्तौति ।।

**अज्ञानहालाहलजातमूर्च्छं, जगज्जनं बोधयितुं समस्तम् ।**
**त्वं जाङ्गुली देवि ! यदीयपुत्रमन्त्रो महामोहतमोऽपाहोऽयम् ।।४९।।**
(उपजातिः)

इति स्तुत्वा तस्याः समीपे जिनप्रतिच्छन्दं मुक्त्वावस्वापनिकां च तस्याः प्रदाय पञ्चधात्मानं विकरोति । चन्दनाक्तपाणिरेकेन रूपेण प्रभुमुद्वहति, द्वितीयेनातपत्रं धरति, द्वाभ्यां चामरे गृह्णाति, एकेन पुरः पविमुच्छालयन् द्वात्रिंशल्लक्षविमानवासिदेवीभिः समं नृत्यन् गायन् गच्छति मेरुशिखरं, पाण्डकवनेऽतिपाण्डुकम्बलायां शिलायां सिंहासने निजाङ्कस्थापितजिनः पूर्वाभिमुखः सुखं निषीदति ।।

ततः शेषा अपि कल्पेन्द्राः सूर्येन्दू असुरादिनिकायनायकचमरबल्यादिभुवनपतीन्द्राः पिशाचादिनिकायनायककालमहाकालादयोऽप्रज्ञप्तिप्रमुखनिकायनायकसन्निहितसामानिकादयश्च व्यन्तरेन्द्राः स्वस्वपरिवारेण सर्वेऽप्यायान्ति ।।

**कल्पेशा दश सूर्येन्दू, विंशति भुवनाधिपाः ।**
**द्वात्रिंशद् व्यन्तरेन्द्राश्च, चतुःषष्टिः पुरन्दराः ।।५०।।**

सौवर्णानां रौप्याणां रत्नानां सुवर्णरूप्यमयानां सुवर्णरत्नमयानां सौवर्णरौप्यरत्नमयानां रौप्यरत्नमयानां शुद्धमृण्मयानां योजनमुखानां समस्ततीर्थोदकपरिपूर्णानां कुम्भानां प्रत्येकं प्रत्येकमष्टोत्तरसहस्रेण प्रथममच्युतारणाधिपतिः कुसुमाञ्जलिक्षेपपूर्वं प्रभोः स्नपनं करोति ।।

**अम्भांसि वः प्रशमयन्तु रजांसि नित्यं,**
**श्रीनाभिसूनुजनिमज्जनसम्भवानि ।**
**यैर्वीक्षितैरपि दृशा सहसा द्रवन्ति,**
**प्राग्जन्मजा अपि कुकर्ममलावलेपाः ।।५१।।**(वसन्ततिलका)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**प्रतीतं सर्वेषां, प्रकटमिदमेव त्रिजगतो,**
**यदऽम्भःसंरम्भाद्, भवति परितापप्रशमनम् ।**
**अचिन्त्यं माहात्म्यं, किमपि हि जिनेन्द्रोर्यदुदयं,**
**प्रतापः प्राप्नोति, प्रसभमभिषेकव्यतिकरात् ।।५२।।**
(शिखरिणी)

केचिदेवं स्तुवन्ति । केऽपि वादयन्त्यातोद्यानि । इत्याद्यनेककृत्यपराः सुराः प्रमोदं मूर्त्तमिवावतारयन्ति । ततो गन्धकाषाय्या प्रभोर्वपुरुन्माज्य गोशीर्षचन्दन-द्रवेण विलिप्य पारिजातादिपुष्पैरुन्माल्याऽच्युतारणेन्द्रः प्रणम्य निवर्तते । एवं द्वाषष्ठिरन्येऽपि वासवाः स्नानाऽङ्गरागपूजादिकं ज्येष्ठानुक्रमात् कुर्वन्ति ।।

तत ईशानेन्द्रः पञ्चधात्मानं विकृत्य सौधर्मेन्द्रस्थाने प्रभुमुत्सङ्गे निवेश्या-ऽवतिष्ठते । सौधर्मेन्द्रस्तु प्रभोश्चतुर्दिशं चत्वारि स्फाटिकवृषभरूपाणि विकरोति, तेषामष्टभ्यः शृङ्गेभ्यः समुत्थिताभिर्धाराभिरन्ते मिलित्वा प्रभुशिरसि पतन्तीभिश्चिरं स्नात्रं करोति । ततो रत्नमये पट्टे प्रभुं निवेश्य गन्धकाषाय्या प्रमार्जयति।।

**सौवर्णराजतयवैरथ तन्दुलैर्वा,**
**ये मङ्गलाष्टकमुदारमुदारभन्ते ।**
**अर्हत्पुरः सुरनराधिपतिश्रियं ते,**
**भुक्त्वाष्टकर्मविलयं निलयं श्रयन्ति ।।५३।।** (वसन्ततिलका)

इत्यनुमोदमानोऽखण्डरौप्यतण्डुलैरष्टमङ्गली लिखति । ततो विलिप्य विचित्रवस्त्राणि परिधाप्य सर्वाङ्गं रत्नाभरणैर्विभूषयति । पूजयित्वाऽऽरात्रिकं त्रिरुत्तारयति। शक्रस्तवेन स्तुत्वा प्रागवत्पञ्चधात्मानं विकृत्य प्रभुं मातुरन्तिकं प्रापयति संहरति च निद्राम् । प्रभोश्चोच्छीर्षके दुकूलयुगं रत्नकुण्डलयुगं विमुञ्चति । विचित्ररत्नहारार्द्धहाराऽऽढ्यं दृष्टिविनोदाय विताने लम्बमानं श्रीदामगन्दुकं च विन्यस्यति। ततः शक्रादेशाद् धनदो हिरण्य-रत्न-स्वर्णानां द्वात्रिंशतं कोटीः प्रत्येकं नन्दासनानि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भद्रासनानि च द्वात्रिंशदन्यान्यप्युत्कृष्टानि वस्तूनि नाभिनृपगृहे निक्षिपति उद्घोषयन्ति चाभियोगिकदेवाः । कश्चिद्यद्यर्हतोऽर्हज्जनन्याश्चाशुभं चिन्तयिष्यति तस्याऽर्जकमञ्जरीव शिरः सप्तधा भेत्स्यत इति । अर्हन्तश्चाऽस्तन्यपायिनस्ततः क्षुदुदये प्रभुः शक्रसङ्क्रमितामृतमात्माङ्गुष्ठमेव रसवर्षिणं मुखे निक्षिपति । धात्रीपञ्चकं चादिश्य शक्रो नन्दीश्वरे गत्वा यात्रां करोति । सर्वेऽपि सुरेन्द्राः ससुराः सन्तो यात्रां तत्र कृत्वा स्वं स्वं स्थानं गच्छन्ति । अयं च जन्मोत्सवः समस्तेष्वपि चरितेषु ज्ञेयः।।

इदमिन्द्रागमनादिकं प्रातर्मरुदेवास्वामिनी नाभेः शशंस। ततः प्रमोदमयं पुत्रजन्मोत्सवं करोति नाभिनृपः । चतुर्दशस्वप्नानां मध्ये मरुदेव्या प्रथमं वृषभो दृष्टः प्रभोश्चोर्वोः वृषभो लाञ्छनमभूत् । ततः प्रभो ऋषभ इति नाम कृतं पितृभ्याम् । युग्मजातायाश्च स्त्रियः सुमङ्गलेति प्रदत्तं नाम । प्रभोश्च किञ्चिदूने वर्षे सति वंशस्थापनार्थमिक्षुपाणिः शक्रः सम्प्राप्तः । स्वामिना च तदनुग्रहाय प्रसारितः पाणिस्ततः शक्रेणेक्ष्वाकुरिति प्रभुवंशस्य नाम स्थापितम् । देवाश्च प्रभुयोग्यानि प्रत्यहमुत्तरकुरुतः फलानि क्षीरोदाच्च जलान्यानयन्ति ।।

दशवर्षदेशीये च प्रभावकालतालफलपातहतस्य विपन्नमातापितृकस्य मिथुनकस्य स्त्री सुनन्देति नाम्ना लोकैः प्रभुयोग्या सङ्गृहीता । अत्रान्तरे शक्रेणागत्य प्रभुं प्रति प्रारब्धो विवाहविधिः ।।

**निर्वाणं निकटं सुदुस्तरदशा-प्रान्तोऽपि लब्धस्तमः-**
**स्तोमोऽशामि समीहते तदपि च, स्नेहं मनो दीपवत्।**
**पाल्यं तीर्थकरत्वमन्तिमभवो, ज्ञानानि च त्रीणि मे,**
**वेद्यं कर्म मया तथापि यदहं, कार्येऽद्य पाणिग्रहम्।।५४।।**

(शार्दूलविक्रीडितम्)

प्रभुणाप्येवं विमृश्यानुज्ञातं सर्वम् । ततः प्रथममेव स्वामी सुमङ्गलासुनन्दाभ्यां सह दिव्यधात्रीभिः स्नपितो विलिप्तो भूषितश्च नीतो मण्डपद्वारम् । कृतं दधिदूर्वालवणा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नलगर्भशरावसम्पुटमुशलादिकं मङ्गलकृत्यम्। देह्यर्घं देह्यर्घमिति चोच्चारिता धवलाः। अर्घदायिन्या क्षिप्त्वा कण्ठे कौसुम्भं वासः समाकृष्य नीतः स्वामी मातृगृहम् । बद्धं हस्ते समदनफलं कङ्कणसूत्रम् । शम्यश्वत्थादिनिर्मितः समर्पितो हस्तलेपः कन्ययोः पाणिसम्पुटे । प्रभुणा च गृहीतौ तयोः पाणी । प्रक्षिप्ता हस्तसम्पुटमध्ये शक्रेण स्वोर्मिका । कृतस्तारामेलकः । प्रभुसमीपे देवाः, कन्यासमीपे देव्यश्च प्रवृत्ताः कौतुकधवलान् गातुम् । वध्वौ द्वावप्यञ्चलौ कट्यामारोप्य, वधूवरं नीतं वेदिगृहे । प्रत्यक्षीकृतः कुण्डे देवैरग्निः । परितश्चाग्निं दत्ता प्रदक्षिणा यावत् पूर्णाऽष्टमङ्गली । कृतः पाण्योरञ्चलयोश्च मोक्षः । कृतमिन्द्रेण देवीभिश्च नृत्तम् । इत्यादि कृत्वा गतः शक्रः स्वं स्थानम् । इयं सर्वत्र विवाहस्थितिः ।।

विवाहानन्तरं ताभ्यां समं प्रभोर्भोगाननासक्तमनुभवतः किञ्चिदूनेषु पूर्वलक्षेषु षट्सु गतेषु सर्वार्थसिद्धतश्च्युत्वा बाहुपीठजीवौ सुमङ्गलादेव्याः कुक्षौ युग्मित्वेनाऽवतीर्णौ, तयोश्चैकश्चतुर्दशस्वप्नसूचितचक्रवर्तिजन्मा पुमानन्यः स्त्री । सुबाहुमहापीठजीवौ सुनन्दायाः कुक्षौ युग्मित्वेनोत्पन्नौ । तयोरप्येकः पुरुषोऽन्यः स्त्री । समये सुमङ्गला सुषुवे भरतब्राह्म्यौ । सुनन्दा तु बाहुबलिसुन्दर्यौ पुनरपि सुमङ्गला पुत्राणां युग्मान्येकोनपञ्चाशतं प्रसूता ।।

तदानीं च कालप्रभावात् कल्पद्रुमाः क्रमेण क्रमेण हीनफलाः जाताः । कषायाश्च वृद्धिं गताः । प्रजाश्च नीत्युल्लङ्घिन्योऽभूवन् । ज्ञानत्रयधरेण च प्रभुणा प्रजानां राजनीतिः प्ररूपिता । ताभिर्याचितो राजानं श्रीनाभिस्तेनाप्यर्पितः श्रीऋषभो राजा तदभिषेकाय गतो लोको जलमानेतुम् । अत्रान्तरे शक्रेणागत्य सर्वाङ्गं विलिप्य विभूषितः स्वामी रत्नालङ्कारैः । लोकेन चागतेन विचार्य विचार्य प्रक्षिप्तं जलं प्रभुचरणयोस्ततो रञ्जितेन शक्रेण प्रोक्तं विनीता इमे ततो नगर्यपि विनीताऽस्त्विति द्वादशयोजनदैर्घ्या नवयोजनविस्तारा प्राज्यवस्त्ररत्नधनधान्यनिरन्तरा निर्मापिता पुरीन्द्रेण। विनीतेती च कृतं नाम । जन्मतो विंशतौ पूर्वलक्षेषु गतेषु प्रभुः पित्रा शक्रेण च राज्ये न्यस्तः । जन्मान्तराभ्यस्तराज्यनीतिना च प्रभुणाऽमात्यादीनां स्थापना कृता। उग्रा आरक्षाः, भोगा मन्त्रिप्रभृतयः, राजन्या समवयसः, शेषाश्च क्षत्रियाः पत्तिप्रायाः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कृताः । कृतः करितुरङ्गादिसङ्ग्रहः ।।

कल्पद्रुमोच्छेदे च कन्दमूलफलशालिगोधूमप्रभृतिकं भक्षमुपदर्शितम् । अरणिकाष्ठैश्चाऽग्निरुत्थापितः । एकान्तरुक्षे एकान्तस्निग्धे हि काले न तस्योत्पत्तिरिति। हस्तिकुम्भस्थलास्फालितमृत्पिण्डेन स्थाल्यादिसूत्रणोपदिष्टा । कुम्भकारवर्द्धकिलोह-कारचित्रकारकुविन्दकाश्यपशिल्पानि पञ्चापि प्रत्येकं विंशतिभेदानि लोकहितार्थं दर्शितानि । चतुर्द्धा सामादिनीतिं द्वासप्ततिकलाश्च भरतो ज्ञापितः । स्त्रीपुंसादिलक्षणानि शिक्षितो बाहुबली । दक्षिणेन पाणिनाऽष्टादशलिपी ब्राह्मी गणितं पुनर्वामेन सुन्दरी शिक्षिता । इत्यादिकं सावद्यमपि लोकोपकाराय स्वामिना समुपदिष्टम् । एवं सम्पूर्णस्थितिप्ररूपणापूर्वं यथोक्तं राज्यं त्रिषष्टिं पूर्वलक्षाणि यावत् प्रभुणा कृतम् ।।

एकदा वसन्तोत्सवे प्रभुरुद्यानमगच्छत् । दृष्ट्वा च तत्रातिमात्रं मधुपानजलकेलि-पुष्पावचयादिषु प्रमादिनं जनं, भावी जिनश्चिन्तयाञ्चकार।।

**कान्तेः पात्रं न गात्रं, न पवनजविनो, वाजिनो नार्द्रदान,**
**पोन्मीलद्गन्धगुञ्ज-न्मिलितमधुकरी-बन्धुराः सिन्धुरा वा।**
**तापत्रं नातपत्रं, शिरसि न च नम-च्चामरक्लान्तहस्ताः,**
**सुन्दर्यश्चेत्युरस्तात्, तदिह किमु जनः, सम्भ्रमी बम्भ्रमीति।।५५।।**(स्रग्धरा)

अत्रान्तरे सारस्वतादयो देवा लोकान्तिकाः समेत्य समयं विज्ञपयन्ति ।।

अनिच्छन्नपि स्थापितोऽयोध्याराज्ये भरतः । शेषदेशाश्च विभज्य प्रदत्ताः पुत्राणां बाहुबलिप्रभृतीनाम् । दत्तं सांवत्सरिकं दानं प्रातराशं यावद् दिने दिने सुवर्णस्यैका कोटिरष्टौ लक्षाणि दीयन्ते । संवत्सरेण प्रभुणा हिरण्यस्य कोटिशतत्रयमष्टाशीतिकोटयोऽशीतिर्लक्षाणि सर्वा ये दत्तं दानम् । चलितासनः सम्प्राप्तः शक्रः सपरिवारः । कृतस्तेन प्राग्वद्भगवतोऽभिषेकः । समर्पितानि दिव्यवस्त्राऽलङ्करणानि । कृता देवैः सुदर्शनाख्या शिबिका । शक्रेण दत्तहस्तस्तमारूढः प्रभुः । सा चाग्रतो मानुषैः, पृष्ठतः सुरासुरनागेन्द्रैरुत्क्षिप्ता । देवदानवमानववृतः प्रभुः पश्चिमवयाः सिद्धार्थोद्याने समुत्तीर्य शिबिकाया अशोकतरुतले

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वस्त्रमाल्यादीन्युन्मुच्य, बभार जम्भारिन्यस्तं देवदूष्यमंशेन । कृतषष्ठ-तपाश्चैत्रबहुला-ऽष्टम्यामुत्तराषाढानक्षत्रे दिनपश्चिमभागे चतसृभिर्मुष्टिभिरुच्चखान मूर्द्धजान्। शक्रप्रार्थनया मुक्ताः पञ्चममुष्टिकेशाः । ते च केशाः स्ववस्त्राञ्चलेन प्रतीष्य क्षिप्ताः क्षीराब्धौ, शक्रेण निवारितश्च देवैस्तुमुलः । स्वामी च कृतसिद्धनमस्कारः सुरनरसमक्षं सर्वसावद्यं योगं प्रत्याख्यामीति चारित्रं प्रतिपन्नवान् । तदानीमेवोत्पन्नं मनःपर्ययज्ञानम्। भरताद्यैर्वार्यमाणा अपि कच्छमहाकच्छादयश्चत्वारो नृपसहस्राः प्रपन्नाः श्रामण्यम्।

गताः शक्रादयः स्वं स्वं स्थानम् भरतोऽपि सपौरः प्रभुपादान् प्रणम्य सम्प्राप्तो राजधानीम्, प्रभुरप्यवलम्बितमौनोऽन्यत्र विजहार। पारणकार्थी च यस्य यस्य गृहे प्रभुः प्रयाति, स स भूमण्डलमिलन्मौलिः प्रणम्य योजिताञ्जलिरेवमेव विज्ञप्तिकां करोति।।

**कन्याः शीलेन धन्याः, प्रभुचरणयुगा-ऽभ्यस्तपूजास्तनूजाः**
**लक्ष्मीरक्षीणकोशा, गृहमनघगृहं, बान्धवाः सोद्धवाश्च ।**
**एषोऽहं स्वामिपादा-ऽम्बुरुहमधुकरः, किङ्करत्वायसज्जः,**
**श्लाघ्यं यत्किञ्चिदेषु, स्फुरति मनसि व-स्तेन देयो नियोगः ।।५६।।**(स्रग्धरा)

ततः प्रभुरनाकर्णितमिव कृत्वा व्रजति । एवं संवत्सरं निराहारं पर्यटितः। कच्छमहाकच्छादयस्तु क्षुधाबाधिता गङ्गातीरे गत्वा सर्वेऽपि स्थिताः । कच्छमहाकच्छपुत्रौ च नमिविनमी स्वाम्यादेशाद् दूरङ्गतपूर्विणौ व्यावृत्तौ च गङ्गातीराध्वना समागच्छन्तौ स्वपितरौ ददृशतुः । पितृभ्यां च तयोः स्वामिनः प्रव्रज्याग्रहणं स्वस्वरूपं च सर्वमाख्यातम् । ततस्तौ स्वाम्येवावयोर्गतिरिति पित्रोराख्याय प्राप्तौ प्रभुसमीपम्। त्रिकालमपि प्रभोरग्रे पुष्पोपहारं कृत्वा भगवन्! राज्यप्रदो भवेति त्रिकालं विज्ञपयतः। पार्श्वयोश्चाकृष्टकृपाणपाणी ऊर्द्ध्वं स्थितावेव सेवां कुरुतः । एवं कुर्वाणौ तावेकदा धरणेन्द्रेण वन्दितुमागतेन दृष्ट्वा भाषितौ ।।

**प्रीतिः प्रभोर्गुणगणोऽनुचरस्य सम्यग्,**
**योगस्तयोः प्रणयिषु श्रियमातनोति ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एकैकवस्तुघटनाप्रभुभृत्ययोर्यत्,**
**प्राच्यं द्वयो ऋणविशोधनमेव तत्तु ।।५७।।**

(वसंततिलका)

तदुदासीने निष्किञ्चने च प्रभौ विडम्वनैव भवतोः सेवेति । उक्तं ताभ्यां कुलक्रमायातः स्वाम्यावयोः सेव्य एव सर्वावस्थास्वपि । पुनर्धरणेन्द्रः प्रोवाच ।।

**अजानानौ भिक्षा-क्रममगणितात्मक्लमभरौ,**
**ययोर्याञ्चादैन्यं, गृहिषु कृतवन्तौ न पितरौ ।**
**युवां नूनं तादृग्-जनकतनयौ युक्तमधुना,**
**गतौ नान्याभ्यर्णं,यतिमपि विहाय प्रभुममुम्।।५८।।** (शिखरिणी)

इत्यनुमन्य तुष्टेन धरणेन्द्रेण पाठसिद्धानां विद्यानामष्टचत्वारिंशत्सहस्रीं दत्त्वा नीतौ वैताढ्ये संस्थाप्य दक्षिणोत्तरश्रेण्योः पञ्चाशतं षष्ठिं च नगराणि कृतौ विद्याधरेश्वरौ यः कश्चिज्जिनचैत्यसाधूनामवज्ञां करिष्यति, बलाच्च परस्त्रियं कामयिष्यते, आत्मानं स्त्रियं वा हनिष्यति, तस्य विद्या न स्फुरिष्यन्तीति मर्यादाक्षराण्युत्कीर्य गतः स्वस्थानम्। नमिविनमिभ्यां च विमानमारुह्यागत्य पित्रोः समीपं दर्शितं स्वं वैभवम्, विनीतायां च गत्वा दर्शिता भरतस्य स्वलक्ष्मीः । ज्ञातिलोकश्च सर्वोऽपि विमानमारोप्य नीतस्तत्र। प्रतिपुरं कारितानि जिनचैत्यानि । प्रतिदिनं श्रीऋभदेवपादान् शाश्वततीर्थानि च वन्दित्वा तौ भोजनं कुरुतः । एवं गमयतस्तौ कालम् ।।

प्रभुणा चिन्तितं यद्यहमाहारं न ग्रहीष्यामि तदा कच्छमहाकच्छवद् भाविनोऽपि मुनयो व्रतं प्रतिभङ्गं ग्रहीष्यन्ति । ततः सम्प्राप्तः प्रभुः कुरुदेशे । गजपुरे च बाहुबलिपुत्रः सोमप्रभो राजा । तस्य पुत्रः श्रेयांसस्तेन स्वप्ने सौवर्णो मेरुः श्यामः सन्नमृतकलशेन प्रक्षाल्योज्वलीकृत इति दृष्टम् । नगरश्रेष्ठिना स्वप्ने सूर्यबिम्बाद् रश्मिसहस्रं चलितम् । श्रेयांसेन पुनः संयोजितम् । ततः सूर्यो भास्वरो जात इति

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दृष्टम् । सोमप्रभेण च राज्ञा स्वप्ने कश्चिन्महापुरुषो वैरिभिरभिभूतः । श्रेयांससाहाय्यात्तेन ते निर्जिता इति दृष्टम् । प्रातस्त्रयोऽपि मिलित्वा विमर्शे प्रवृत्ताः परं नोन्मेषः कोऽपि सञ्जातः, ततो गताः स्वं स्वं गृहम् । श्रेयांसगृहे समायातस्तदैव प्राभृते प्रचुरतर इक्षुरसः । प्रभुरपि निजक्रमेणागच्छन् प्राप्तो गजपुरम् । स्थाने स्थाने नमस्क्रियमाणो नागरैरागतः श्रेयांसगृहे । मध्यादभिधाव्य भूलुठनपूर्वं श्रेयांस संमुखमेत्य नत्वा च प्रवृत्तो विज्ञपयितुम् ।।

**भृत्योऽस्मीति न निःस्पृहेषु रुचिरं कार्यं समादिष्यता-**
**मित्यस्ताखिलकर्मणामसदहं पुण्यस्त्विति स्वस्तुतिः ।**
**सर्वस्वं त्वदधीनमित्यभिनवं किं स्वामिनं प्रत्यद-**
**स्तत् किं विज्ञपयामि कामिव करोम्यऽर्चां च मामादिश ।।५९।।**

(शार्दूलविक्रीडितम्)

इत्यादि विज्ञपयन् प्रभुणैव समं प्रविष्टो गृहमध्यम् । कुत्रापीदृग् मया स्वरूपं दृष्टमित्यूहापोहपरश्चोत्पन्नजातिस्मरणो विवेद सर्वम्। यदयं प्रभुः प्राग्भवे वज्रसेनतीर्थकरपुत्र आसीत् । अहं त्वस्य सारथिरासम् । तीर्थकरेणैव तदानीं मे कथितम् । यदसौ भरतक्षेत्रे तीर्थकरो भविष्यतीति । तन्निश्चितं तीर्थकरोऽयं पितामहश्च मेऽस्मिन् भवे। तदवश्यं मयास्य कार्यैव भक्तिः । परं तपसाऽतिमात्रं क्षामः स्वामी। धिगज्ञातदानधर्ममम्मुं लोकम् ।।

**यत्कल्पःसमकल्पिकल्पतरुणा-ऽप्येकेन्द्रियेणादितो,**
**यद्यच्छन् कठिनोऽपि न स्पृहयति, प्रान्ताय चिन्तामणिः।**
**आबाल्यात् पशुरप्युपासितवती, यत्कामधेनुः स्वयम्,**
**तद्दानं पटुचेतनैरपि नरैः, किंनाम नाराध्यते ? ।।६०।।** (शार्दूलविक्रीडितम्)

इत्यादि हृदि भावयन् सहसैवेक्षुरसकुम्भमुल्लास्य भगवन् कल्प्योऽयं रस इत्युवाच । प्रभुणापि धृतं पाणिपात्रं लोठितास्तेनेक्षुरसकुम्भाः । प्रभुपाणितः परं न

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पपात बहिर्बिन्दुरपि । संवत्सरान्ते जातं प्रभोः पारणम् । गन्धोदकवृष्टिः पुष्पोत्करश्चेलोत्क्षेपो दुन्दुभिध्वनिर्वसुधारेति पञ्चदिव्यान्याविर्भूतानि । मिलिताश्च दिवि देवादयो भुवि च मानवाः ।।

वैशाखशुक्लतृतीयायां दानं तदक्षयं जातमिति । ततः प्रभृत्यक्षयतृतीयायाः पर्वप्रवृत्तिः । दानधर्मोऽपि श्रेयांसतः प्रवृत्तः । लोकैः पृष्टः श्रेयांसः त्वया कथं दानविधिर्ज्ञात इति । तेनोक्तम् । भगवद्दर्शनाद् ममोत्पन्नं जातिस्मरणम् । स्मृतं च मया प्राग्भवदृष्टं कृतं च दानव्रतादिकम् । तथा स्वप्नत्रयस्य चायमर्थः । यः श्यामो मेरुः स तपःकृशप्रभुः, क्षालनं तु पारणकम् ।। १ सूर्यस्थानी प्रभुर्गोसहस्रं तु केवलम्, तच्च मया कारिते पारणके प्रभोरतः परं भविष्यति ।।२ वीरः पुमांश्च स्वामी, वैरिणः परीषहाः, मत्साहाय्येन पारणकलक्षणेन प्रभुस्तान् पराजेष्यते ।।३

प्रभुरपि कृतपारणकोऽन्यत्र विजहार । प्रभुपादमुद्रायां च श्रेयसेना-ऽऽदिकृन्मण्डलमिति नाम्ना स्तूपं कारितम् । भगवांश्च बहलीदेशे विहरंस्तक्षशिलायां रात्रौ बहिः प्रतिमया स्थितः । ज्ञाताऽऽगमनेन बाहुबलिना पुर्यां मञ्चादिहट्टशोभा कारिता । किल प्रभुर्मध्यमेष्यतीति प्रातः सर्वसंवाहेन निःसृतोऽभिमुखं बाहुबली । प्रभुश्चान्यत्र गतः । बाहुबली च खेदं कृत्वा पादमुद्रां वन्दित्वा तत्र च स्तूपं कारयित्वा स्वस्थानं गतः । भगवानपि मौनी सन् नानादेशेषु विहरन् वर्षसहस्रान्तेऽयोध्यायाः पुरिमतालोद्याने सम्प्राप्तः । कृताष्टमतपसश्चाऽशोकतरुतले प्रतिमास्थस्य फाल्गुनकृष्णैकादश्यामुत्तराषाढानक्षत्रे प्रातः प्रभोः केवलज्ञानमुत्पन्नम् ।।

पूर्ववदिन्द्राः सर्वेऽप्यागताः । प्रारब्धा समवसरणरचना । मार्जिता वायुकुमारैरेकयोजनप्रमाणा भूमिः । सिक्तामेघकुमारैर्गन्धाम्बुभिः । कृतं व्यन्तरैः स्वर्णरत्नमाणिक्यशिलाबद्धं कुट्टिमम्, प्रकीर्णानि तैरेवाऽधोमुखवृन्तपञ्चवर्णानि पुष्पाणि चतसृषु दिक्षु कृतानि सध्वजानि रत्नादि तोरणानि । तदधस्ताच्च कृताः स्वस्तिका अष्टमङ्गल्यश्च ।।

**कल्पज्योतिर्भुवनत्रि-दशामणिरत्नकनककपिशीर्षाम् ।**
**रत्नकलधौतरौप्यैः, सृजन्ति वप्रत्रयीं मध्यात् ।।६१।।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अन्तस्त्रिकोशश्चैत्यद्रु-रधः सिंहासनानि च ।**
**देवच्छन्दो द्वितीयस्य, वप्रस्याऽभ्यन्तरे पुनः ।।६२।।**

**आसीने प्राङ्मुखे स्वामि-न्यन्यरूपत्रयादिकम् ।**
**कुर्वन्ति व्यन्तराः सर्वं, बहिश्चक्रं च पद्मगम् ।।६३।।**

**मुनिकल्पस्त्रीसाध्व्यो, भुवनवनज्योतिरङ्गनास्तासाम्।**
**देवा वैमानिकसुर-नरनार्योऽग्न्यादिविदिशि सभा।।६४।।** (आर्या)

**वप्रस्याऽन्तर्द्वितीयस्य, तिर्यञ्चोऽन्योन्यवैरिणः।**
**यानानि तु तृतीयस्य, गन्तागन्ता च तद्बहिः।।६५।।**

इयं सर्वजिनसामान्या समवसरणस्थितिः।।

सुरैः सञ्चार्यमाणेषु नवसु स्वर्णकमलेष्वंह्रिन्यासं कुर्वन् चतुर्विधदेवनिकाय-कोटीभिरावृतो भगवानपि पूर्वद्वारेण प्रविश्य समवसरणे चैत्यवृक्षस्य प्रदक्षिणां कृत्वा तीर्थं च नत्वा प्राङ्मुखः सिंहासने समुपविवेश। कृतानि व्यन्तरैर्भगवदनुभावात् प्रभोरभेदकारीणि त्रीणि प्रतिरूपाणि तिसृस्वपि दिक्षु। आविष्कृतान्यष्ट-महाप्रातिहार्याण्यशोकादीनि। पूर्वयाम्यपश्चिमोत्तरगोपुरद्वारेषु चतुर्ष्वपि वैमानिकव्यन्तर-ज्योतिषिकभुवनपतिदेवा यथासङ्ख्यं जाता द्वारपालाः।।

अथ सौधर्मेन्द्रः समेत्य प्रदक्षिणां दत्त्वा शक्रस्तवेन स्तुत्वा नत्वा च प्रभुं नरनारीदेवानामग्रतः समुपविष्टः।।

इतोऽपि विनीतायां विनीत इति प्रातरायातः सुतविरहा श्रान्तरोदनोद्भूत-नीलिकालुप्तलोचनां पितामहीं मरुदेवीं नमस्कर्तुं भरतश्चक्री। देवि ! ज्येष्ठपौत्रो नमतीत्युक्त्वा पुरस्तादासीनः। मरुदेव्यपि साश्रमाशिषं प्रयुज्य प्रोवाच।।

**निर्वेदेन तरङ्गितः क्वचितो, दुःखैरसह्योदयै-**
**रुद्वेगेन विपञ्चितः परिचितो, मूर्च्छागमैर्दुर्गमैः ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**आतङ्कैः कलुषीकृतः स्तबकितो-ऽन्तर्दाहकीलाशतैः,**
**प्रव्रज्य व्रजिते सुते मम दिनः, स्याद् वत्स ! संवत्सरः ।।६६।।**

(शार्दूलक्रीडितम्)

एवं वदन्त्यां स्वामिन्यां यमकशमकौ पुरुषौ समेत्य चक्रिणं विज्ञपयामासतुः। एकेन प्रभोः पुरिमतलागमनकेवलोत्पत्तिसमवसरणरचनादेवाद्यागमनादिकं निवेदितम् द्वितीयेनास्त्रशालायां चक्ररत्नोत्पत्तिर्निवेदिता। पारितोषिकं कृत्वा तौ विसृज्य च मरुदेवामुवाच। देवि ! दिष्ट्या वर्धसे, विलोकय, स्वयमधुनाधरीकृतचक्रिशक्रप्रभावं स्वसूनोर्वैभवम्। वाचामगोचरो मनसाऽप्यचिन्तनीया कापि लोकोत्तरैवाऽऽविर्भूता श्रीस्त्वत्सुतस्येति। ततो राजवाह्यं गजं तामारोह्य सपरिवारः सर्वर्द्ध्या प्रचलितो नमस्कर्तुं भरतो भगवन्तम्। दूरादप्यालोक्य रत्नध्वजम्, पितामहीमवादीत्। देवि त्वत्सुतस्य पुरतोऽयं श्रूयते सुराणां जयजयारवः। अयं च दुन्दुभेर्ध्वनिः। स एष विमानानां किङ्किणीक्वाणः। इयं गन्धर्वाणां गीतिः। इत्यादि शृण्वन्त्याः स्वामिन्याः प्रमोदाश्रुजलैर्विलीना लोचनयोर्नीलीका । दृष्टा स्पष्टा मरुदेव्या तीर्थकृल्लक्ष्मीः पुत्रस्य। पश्यन्ती च प्राप्ता तन्मयतां, समारूढा च भावविशेषेण क्षपकश्रेणिमेककालं क्षीणाष्टकर्मनिगडान्तकृत्केवलिनी भूत्वा प्राप्ता सिद्धिपदम्। अस्यां चावसर्पिण्यां प्रथमोऽयं सिद्धः। तद्वपुश्च सत्कृत्य देवैः क्षिप्तं क्षीरार्णवे। ततः प्रभृति च मृतकपूजा प्रवृत्ता। शोकहर्षसमाकुलश्च चक्री सन्त्यज्य राज्यचिह्नानि, प्रविश्योत्तरद्वारेण समवसरणम्, कृत्वा त्रिःप्रदक्षिणाम्, स्तुत्वा नत्वा च प्रभुम्, पृष्ठतः शक्रस्य निषण्णः। पञ्चत्रिंशदऽतिशयवत्या सर्वभाषानुगामिन्या गिरा चकार प्रभुर्देशना।।

**नाप्तः पुरातनभवे गुरुकर्मभिर्यः,**
**प्राप्तव्य एष्यति भवे न जनैरवश्यम्।**
**प्राप्तः सकर्मविवरादधुनैव तस्मात्,**
**सर्वात्मना कथमसौ क्रियते न धर्मः।।६७।।** (वसन्ततिलका)

अपि च–

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पुण्यैर्वैभवसम्भवो भवभृता-मेवं विदन्नप्यसौ,**
**लोकः स्तोकमतिर्न तत्र निरतः, किं तु प्रमादी मदी।**
**नाऽयं वायुमिवाऽऽयुरस्थिरमिदं, जानाति नाऽवेक्षते,**
**मृत्युं पार्श्वविवर्तिनं न च जरा-मागामिनीं मन्यते ।।६८।।**

(शार्दूलविक्रीडितम्)

इत्यादि देशनया भरतस्य ऋषभसेनाद्या एकोनपञ्चशतानि पुत्राः सप्तशतानि च पौत्रा ब्राह्मी अन्येऽपि नरा नार्यश्च प्रतिबुद्धाः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकं, सुन्दरी च प्रव्रजन्ती भरतेन निषिद्धा। ऋषभसेनाद्याः साधवो, ब्राह्मयाद्या साध्व्यो, भरताद्याः श्रावकाः, सुन्दर्याद्याः श्राविका, इति भगवता स्थापितश्चतुर्विधः श्रीसङ्घः। उपार्जितगणभृन्नामकर्मणामृषभसेनादीनां चतुरशीतेः साधूनामुत्पादो विगमो ध्रौव्यमिति पदत्रयीं प्रभुरुद्दिदेश। तैरपि सचतुर्दशपूर्वाण्यैकादशाङ्गानि कृतानि। स्वयं शक्रे दिव्यवासस्थालहस्ते प्रभुणा स्वयमुत्थाय सूत्रेणाऽर्थेन तदुभयेन द्रव्यगुणपर्ययनयैर-नुयोगाऽनुज्ञा गणानुयोगाऽनुज्ञा च प्रदत्ता। शक्रादिभिर्दुन्दुभिध्वनिपूर्वं कृतो वासनिक्षेपः।।

सम्पूर्णायां पौरुष्यां भरतेश्वरकारितोऽखण्डनिस्तुषकलमतण्डुलचतुष्प्रस्थी-प्रमाणः स्थालस्थितो वाद्यमानवादित्रधवलमङ्गलगीतस्फीतः पुरुषैरानीतो बलिः। प्रवेशितः प्राग्द्वारेण समवसरणप्रदक्षिणां दापयित्वा विक्षिप्तः प्रभोरग्रतश्चतसृष्वपि दिक्षु। अपततोऽपि तस्यार्द्धममरैरम्बरे गृहीतम् । भूगतस्याऽर्द्धं भूस्वामिना भरतेन स्वीकृतम्। शेषं समस्तलोकेन गृहीतम्। तत्प्रभावेण पूर्वोत्पन्नारुजः शाम्यन्ति। नवाश्च षण्मासीं यावत् नाविर्भवन्तीति। प्रभुश्चोत्तरद्वारेण निर्गत्य रत्नस्वर्णवप्रमध्यस्थितदेवच्छन्दके विश्रामार्थमागतः। ऋषभसेनगणधरेण प्रभुपादपीठमध्यास्य कृता देशना। प्रभोश्च तीर्थे गोमुखयक्षः, स चाऽक्षमालाभृद् दक्षिणदोर्द्वयः, मातुलिङ्गिपाशिवामबाहुयुगः, स्वर्णवर्णो गजस्थश्च। अप्रतिचक्रा च शासनदेवी, वरदबाणिचक्रिपाशिदक्षिणचतुर्भुजा, धनुष्मद्वज्रिचक्राऽङ्कुशिवामचतुर्बाहुः। एवं सपरिवारश्चतुस्त्रिंशदतिशयसमन्वितः स्थाने

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्थाने भव्यलोकप्रतिबोधाय विहर्तुं प्रवृत्तः प्रभुः।।

## ।।अथ चक्रिवक्तव्यताम्।।

प्रभुं नत्वा गतो भरतश्चक्रपूजार्थम्। आलोकमात्रेऽपि कृतप्रणामः। प्रमार्ज्य स्नपयित्वा च पुष्पवस्त्राभरणाद्यैरुक्षिप्तः सुरभिर्धूपो लिखिता रौप्यतण्डुलैरष्टमङ्गली। सप्ताष्टानि पदान्यपसृत्य कुञ्चितवामजानुर्ननाम। तत्रैव च कृतावासश्चक्राष्टाह्निकोत्सवम्। ततः सुमुहूर्ते कृतस्नानादिकर्मा, सम्मुखीनमङ्गलकलशन्यस्तदृष्टिः, शुभस्वप्नसूचितजयः, षोडशयक्षसहस्रसामन्तमाण्डलिकादिपरिवारयुक्तः कुञ्जरारूढः, समस्तकरितुरगादिसैन्यच्छन्नभूपीठः, पठत्सु—

**देव ! त्वदुद्योगचलत्तुरङ्ग-खुरक्षतै रेणुभिरुच्छलद्भिः।**
**वक्रां गतिं सम्प्रति सप्तसप्ति-रध्याप्यते सप्तभिरध्वमुग्धैः।।६९।।** (उपजातिः)

इत्यादि वैतालिकेषु वाद्यमानेषु वादित्रेषु भुवः प्रमाणं कुर्वाणस्येव योजनान्ते योजनान्ते गत्वा तिष्ठतश्चक्रस्य पृष्ठतः प्रत्यहं प्रयाणं कुर्वन् पूर्वाम्भोधिरोधसि मागधतीर्थे गत्वा द्वादशयोजनायामं नवयोजनविस्तारं स्कन्धावारं निवेशितवान्। वर्द्धकिरत्नकृतपोषधशालायां दर्भसंस्तारके मागधकुमारं मनसिकृत्य चकाराष्टमं तपो भरतः। अष्टमान्ते शुचिर्भूत्वा कृतबलिकर्मा रथमारुह्य विगाह्य नाभिदघ्नमम्भोनिधेरम्भःसम्भारं धनुरारोप्य च मुमोच महाप्राणं बाणम्। स च क्षणमात्रेण द्वादशयोजनीं गत्वा पपात मागधेश्वरस्य सभायाम्। तद्दर्शनात् कुपितः क्षणं सः। ततः ऋषभसूनुर्भरतः प्रथमचक्रवर्ती त्वां सेवायै समादिशतीत्यक्षरश्रेणीं दृष्ट्वा स्थितिं चावधिना विज्ञाय स्वयं चक्रिसमीपं समेत्य त्वदादेशकारकोऽहमित्युक्त्वा तीर्थाम्भः किरीटं कुण्डले तं च बाणं सप्रणयमर्पयामास। चक्र्यपि तं सम्मान्य विससर्ज। स्कन्धावारे चागत्य पारणं कृत्वा चकाराष्टाह्निकोत्सवं मागधेश्वरस्य।।

ततश्चक्रानुगो दक्षिणाम्भोधेर्वरदामनामनि तीर्थे प्राग्वदावासीत्। वरदामापि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वयमागत्य रत्नमयं कटिसूत्रं मुक्ताफलानि रत्नोत्करं तच्छरं च ढौकितवान्। चक्री तं विसृज्य प्राग्वदष्टाह्निकां कृत्वा चक्रपथानुयायी प्रत्यक्पयोधेः प्रभासतीर्थे समावासितः। प्राग्वत्प्रभासाधिपोऽपि कटकानि कटिसूत्रं चूडामणिं वक्षस्थलमणिं स्वर्णादिकं तत्पत्रिणं चाऽर्पितवान् । चक्रधरोऽपि तं सम्भाष्य विसृज्य चाष्टाह्निकाद्यन्ते चक्रमनुगच्छन् सिन्धोर्दक्षिणरोधसा पूर्वाभिमुखं गत्वा सिन्धुगृहसमीपे शिबिरं निवेशयामास । अष्टमतपोऽन्ते सिन्धुदेवी समेत्य साक्षादष्टोत्तरं रत्नकुम्भसहस्रं रत्नासनं, भद्रासनं, बाहुरक्षकान्, कटकान्, सूक्ष्मांशुकानि च ददौ । तां च सबहुमानं विसृज्याष्टाह्निकाद्यन्ते चक्रपृष्ठलग्नश्चक्री उदक्पूर्वया दिशा गच्छन् वैताढ्यस्य दक्षिणे नितम्बे शिबिरसन्निवेशमकारयत् । पठितं मङ्गलपाठकैः- —

**वशीचक्रे देव !, क्षितिरखिलराज्यापि भवता,**
**पवित्राणां पुंसां, न खलु विषयोऽतः परमिह ।**
**न ते यात्रा क्वापि, स्खलति तपनस्येव तदितो,**
**वहन्तु त्वत्सेवां, शिरसि सुरविद्याधरगणाः ।।७०।।** (शिखरिणी)

इत्याकर्ण्याष्टमतपसा सस्मार वैताढ्यकुमारम् । सोऽपि शीघ्रमागत्य महार्घ्याणि रत्नानि रत्नालङ्कारान् देवदूष्याणि भद्रासनानि च दत्तवान् । भरतोऽपि तं सम्भाषणपूर्वं विसृज्य कृत्वाष्टाह्निकाद्यं चलितश्चक्रं पुरस्कृत्य तमिस्राद्वारे गत्वा चोवास । कृतमालस्मरणायाऽष्टममकार्षीत् । सोऽपि सद्यः समेत्य स्त्रीरत्नयोग्यं तिलकं चतुर्दशं दिव्याभरणसम्भारं माल्यानि वस्त्राणि चार्पयत् । सम्मान्य तं विसृज्य सिन्धुसागरसीमानं दक्षिणसिन्धुनिष्कुटं साधयितुं सेनापतिं सुषेणमादिष्टवान् ।।

सेनाधिपोऽपि चक्रीव सर्वबलसहितः सिन्धुनद्या रोधसि स्थित्वा यत्स्पृष्टं द्वादशयोजनानि वर्द्धते, यत्र प्रातरुप्तानि धान्यानि सन्ध्यायां लूयन्ते, यच्च नदनदीसमुद्राम्भस्तारणक्षमं तच्चर्मरत्नं हस्तेन पस्पर्श । क्षणेन तदपि ववृधे । तस्योपरि सर्वं कटकमारोप्य जलस्थलदुर्गवासिनः सिंहल-बर्बरक-टङ्कण-जवन-कालमुख-म्लेच्छ समभूमिस्थकच्छदेशभूपालादीन् सर्वानपि जित्वा सर्वर्द्धिसम्पन्नः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्राग्वत्सिन्धुमुत्तीर्यायातश्चक्रिणोऽन्तिके । ढौकितानि प्राभृतानि । सम्मान्य प्रसाददानादिना प्रहितस्तमिस्राकपाटसमुद्घाटनाय सेनानीः । सोऽपि गत्वा गुहाभ्यर्णं कृतमालं स्मर्तुमष्टमं कृत्वा कृतस्नानादिकर्मा सौवर्णे धूपदहने धूपमुत्क्षिप्याष्टाह्निकां कृत्वा हयरत्नारूढः सप्ताष्टपदापसरणपूर्वं दण्डरत्नेन कपाटौ त्रिस्ताडयामास । तौ च तडत्कारं कुर्वाणौ कपाटौ सहसैवोद्घघटाते।।

चक्री च हस्तिरत्नमारुह्य सर्वोपद्रवद्रावकं शस्त्रघातप्रतिघातकं यक्षसहस्रेणाधिष्ठितं सूर्यवदुद्योतकं दक्षिणे कुम्भिकुम्भस्थले मणिरत्नं निवेश्य सर्वसन्नाहेन चक्रानुगः प्रविष्टो गुहान्तः । अष्टसुवर्णप्रमाणेन षट्तलेन द्वादशास्त्रिकेण यक्षसहस्राधिष्ठितेन द्वादशयोजनान्धकारनिवारकेण काकिणीरत्नेन गोमूत्रिकाक्रमेण द्वयोरपि गुहापार्श्वयोर्योजनान्ते योजनान्ते पञ्चधनुःशतायामानि एकयोजनोद्योतकारीणि एकोनपञ्चाशन्मण्डलानि कृतानि चक्रिणा । तानि च यावच्चक्रवर्त्ती जीवति, यावच्च गुहा विवृतकपाटा वर्तते, तावत्तिष्ठन्ति । तदुद्योतेन सुखं सञ्चरिता सर्वापि चमूः। यत्र क्षिप्ता शिलाऽपि तुम्बीफलवदुन्मज्जति सा उन्मग्ना। यत्र तुम्बीफलमपि शिलावन्मज्जति सा निमग्ना । ते द्वे अपि नद्यौ वर्द्धकीरत्नकृतया पद्यया चक्री ससैन्योऽप्युत्तीर्य प्राप्तवानुत्तरं द्वारम् । प्रवेशकपाटोद्घाटनस्वरश्रुत्यैवोत्तरद्वारकपाटा- वुद्घटितौ । चक्रपृष्ठानुगामी निर्गतश्चक्री पञ्चाशद्योजनाऽऽयामाया गुहाया मध्याद् गतो विजेतुमुत्तरभरतार्द्धम् । तत्रायाता नाम किराता दुर्जया धनिनश्च । तैः कृतं युद्धमग्रानीकेन समं पराङ्मुखीभूतं चक्रिसैन्यम् । ततः सुषेणः सेनानीस्तुरगरत्नारूढः खड्गरत्नं गृहीत्वा प्रविष्टो रणे । पराजिताः सन्तः किराताः प्रणश्य सिन्धोस्तटे गत्वा उत्तानीभूयाष्टमतपसा नागकुमारान् स्मृतवन्तः । प्राप्ताश्च नागकुमारदेवाः। तैः प्रोक्तं भो भा मेघमुखा [अस्मद्देशं पूर्वमनाक्रान्तम् । कोऽपि आगतोऽधुना । यथा स गच्छति तथा कुरुत । तत् श्रुत्वा चोचुर्मेघमुखाः । भरतोऽ]यं चक्री शक्रस्याऽपि मान्यो न सामान्योऽसौ तथाऽप्यस्य भवदुपरोधादुपद्रवं करिष्याम इत्युक्त्वा ते तिरोभूय महावृष्टिं कर्तुं प्रवृत्ताः । तां च वृष्टिमरिष्टमिति ज्ञात्वा चक्रिणा चर्मरत्नस्योपरि निवेशितं सैन्यम्, तस्य चोपरि धाराजलनिवारणाय चर्मरत्नप्रमाणं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नवनवतिसुवर्णशलाका- सहस्रयुक्तं दृढदण्डं छत्ररत्नं धृतम् । मध्यभागे तेजोहेतोर्दण्डमूले स्थापितं मणिरत्नम् तच्च चर्मरत्नच्छत्ररत्नसम्पुटं तरत्सप्ताहोरात्री स्थितम् । अष्टमदिने चुकोप चक्री । ततो मेघमुखास्ते नागकुमाराः प्रबोधिताः दण्डं च भरतस्य दापिताः। चक्रिणापि सत्कृत्य मुक्तास्ते किराताः ।।

सेनानीः सिन्धोरुत्तरं निष्कुटं साधयित्वा प्राग्वदायातः । चक्रं च पूर्वमार्गेण लघुहिमवद्गिरेर्दक्षिणनितम्बे चक्रिणा सह प्राप्तम् । अष्टमतपोऽन्ते चक्री रथमारुह्य रथतुण्डेन त्रिस्तं पर्वतमताडयत् । धनुरारोप्य शरं च चिक्षेप । स च शरो द्वासप्ततिं योजनान्याकाशे गत्वा हिमवत्कुमारस्याग्रे पतितः । शरनामाक्षरालोकनात् सोऽपि शान्तः सन् पारिजातपुष्पमालां गोशीर्षचन्दनं सर्वाश्चौषधीस्तीर्थोदकं कटकान् बाहुरक्षान् देवदूष्याणि च प्राभृते कृतवान् शरं चार्पयन् । चक्र्यप्याष्टाह्निकापूर्वं तं विसृज्य, ऋषभकूटाद्रौ गत्वा तमपि रथतुण्डेन त्रिरताडयत्, काकिणीरत्नेन च स्वाभिधानं पूर्वकटके लिलेख ।।

ततश्चक्रानुगो गङ्गासिन्धोरन्तरालाध्वना वैताढ्योत्तरनितम्बे गत्वा समावासितः नमिविनम्योर्दण्डग्रहणाय शरं प्रहितवान् । तौ च तद्दर्शनात् कुपितौ । ताभ्यां समेत्य भरतेन सह द्वादशवर्षाणि यावद् युद्धं कृतम् । पश्चाज्जितौ तौ। विनमिना स्थिरनखकेशयौवना सर्वरोगशमनी यथाकामीनशीतोष्णस्पर्शा सर्वलक्षणसम्पूर्णा सर्वर्द्धिसहिता स्वदुहिता सुभद्रेति नाम्ना स्त्रीरत्नमिति भरतस्य प्रदत्ता । रत्नानि च भूयांसि नमिनापि प्रदत्तानि । ततो नमिविनमी भरतमनुज्ञाप्य भवविरक्तौ श्रीऋषभदेवपादान्ते प्रवव्रजतुः ।।

ततश्चक्रानुसारी जाह्नवीसदनस्यासन्नभूभागे गत्वा ददावावासान् । सुषेणश्च सिन्धुवद्गङ्गामप्युत्तीर्य साधयित्वा गाङ्गमुत्तरनिष्कुटं सम्प्राप्तः । चक्रिणा चाष्टमभक्तेन स्मृता गङ्गादेवी । साप्यागत्य रत्नसिंहासनद्वयमष्टोत्तररत्नकुंभसहस्रं च ददौ । तत्र च तत्पार्श्वे वर्षसहस्रं स्थितो नाना सुखेन चक्री ।।

**चिन्तायाः समनन्तरं कुलकृतां, त्वत्पूर्वजानां सुराः,**
**सर्वेषां ददति स्म कामिकफलं, कल्पद्रुमाऽन्तर्हिताः।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**साक्षाद्भूय कृषीवलैरिव कर-स्तैस्तेऽद्य दण्डो ददे,**
**तद्वृक्षान्तरितामपीश भवता, लज्जाममी त्याजिताः ।।७१।।**(शार्दूलविक्रीडितम्)

इत्याकर्णयंश्च बन्दिमुखादुत्कण्ठितः स्वां राजधानीं गन्तुम् । ततस्तामनुज्ञाप्य चक्रमार्गानुसारी गत्वा खण्डप्रपातागुहाद्वारे उषितः ससैन्यः । तत्र नाट्यमालं देवमाश्रित्य कृतमष्टमं तपः । सोऽप्यागत्य रत्नभूषणानि दत्त्वा सेवां च प्रपद्य गतः । चक्री चाऽष्टाह्निकां तस्य कृत्वा गुहासमुद्घाटनाय सुषेणमादिदेश । सोऽप्यष्टमतपोन्ते कृतबलिकर्मा नत्वा दर्शनमात्रतोऽपि गुहां पूजयित्वाष्टमङ्गलीं च लिखित्वा दण्डरत्नेन त्रिः कपाटौ ताडयामास ।।

ततः प्राग्वच्चक्री गजारूढः तत्कुम्भे मणिरत्नं न्यस्य काकिणीरत्नेनै-कोनपञ्चाशतं मण्डलान्यालिखन्नुन्मग्नां निमग्नां च नदीं वर्धकिरचितपद्यया समुत्तार्य सर्वं सैन्यं स्वयमुद्घाटितेन दक्षिणद्वारेण गुहामध्यान्निःसृत्य पश्चिमे गङ्गारोधसि समावासितः। तत्र नवनिधीनुद्दिश्य चक्रेऽष्टमं तपश्चक्री, प्रत्येकं यक्षसहस्राधिष्ठिताः प्रत्यक्षीभूय नवापि निधयः सिद्धा वयमिति तस्य शशंसुः ।।

**नैसर्पः पाण्डुकश्चाथ, पिङ्गलः सर्वरत्नकः ।**
**महापद्मः कालमहाकालौ माणवशङ्खकौ ।।७२।।**

एतेषां दैर्घ्ये द्वादशयोजनानि । विस्तारे नव [योजनानि । उत्सेधेऽष्ट योजनानि ]। रत्नपूर्णाः पल्योपमायुर्नागकुमारावासाश्च ते । तत्र नैसर्पात् पुरग्रामाद्युत्पत्तिः । पाण्डकान्मानोन्मानादीनि । पिङ्गलान्नेपथ्यविधिः । सर्वरत्नादेकेन्द्रियाणां सप्तानां पञ्चानां पञ्चेन्द्रियाणां सम्भवः । महापद्माद् वस्त्रादीनि । कालाद् भूतभविष्यज्ज्ञानं कृष्यादिकर्मशिल्पानि । महाकालान् मुक्ताफलस्वर्णरौप्याद्याकरः । माणवाद् युद्धनीतिदण्डनीत्यादि । शङ्खान् महाकाव्यतूर्यादीनि ।।

तेषां चाष्टाह्निकामकारयत् तत्र चक्री । गङ्गायाश्च दक्षिणं निष्कुटं साधयित्वा सुषेणः समायातः । चक्री चक्रमार्गमनुगच्छन् क्रमेण सम्प्राप्तोऽयोध्यायाः परिसरे दत्तास्तत्रावासाः । निरुपसर्गप्रत्ययं च तत्र चक्रेऽष्टमं तपः । सपरिवारश्च कृत्वा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पारणकम् । कृत मञ्चादिहट्टशोभासमुदयामयोध्यां महाविभूत्या प्रविष्टः पुरीम्। जातः पौराणां परमः प्रमोदः ।।

स्वप्रासादसङ्गतस्य च चक्रिणः सर्वराजकेन निजनिजदिनरीत्या प्रारब्धोऽभिषेको द्वादशभिर्वर्षैर्जातः सम्पूर्णश्चक्रवर्त्तित्वाभिषेकः । तावन्ति च वर्षाणि यावत्सर्वापि पुरी अशुल्का अकरा अदण्डा च कृता । ततः षोडशसहस्रसङ्ख्या यक्षाः सम्भाष्य विसृष्टाः । पार्थिवाश्चानुज्ञाताः स्वस्वस्थानगमनाय । चक्रं च्छत्रं खड्गो दण्डरत्नमेतान्येकेन्द्रियाण्यायुधशालायाम् । काकिणीरत्नं मणिरत्नं चर्मरत्नं नवनिधयश्च श्रीगृहे । सेनापतिर्गृहपतिः पुरोहितो वर्धकिरिति चत्वारि पञ्चेन्द्रियाणि पुर्यामेव स्वस्वगृहे नररत्नानि । गजाश्वरत्ने वैताढ्यगिरिमूलोत्पन्ने । विनमिपुत्री च स्त्रीरत्नमिति चतुर्दशरत्नानि।।

द्वात्रिंशत्सहस्राः परिणीतराजपुत्रीणाम् । तावन्तश्चावरुद्धस्त्रीणामुभयं चतुःषष्ठिः सहस्रा, द्वात्रिंशत्सहस्राः बद्धमुकुटानां राज्ञां जनपदानां च । चतुरसीति लक्षाणि हयानां गजानां रथानां च । षण्णवतिकोट्यः पदातीनां ग्रामाणां च । द्वासप्ततिः सहस्राः पुरवराणाम् । सहस्रोनलक्षो द्रोणानाम् । अष्टचत्वारिंशत्सहस्राः पत्तनानाम्। चतुर्विंशतिः सहस्राः कर्बटानां मडम्बानां च । विंशतिः सहस्रा आकराणाम् । षोडशसहस्राः खेटानाम् । चतुर्दशसहस्राः सम्बाधानाम् । षट्पञ्चाशदन्तरोदकानाम्। एकोनपञ्चाशत् कुराज्यानाम् । त्रिषष्ट्यधिकत्रिशती सूदानाम् । अष्टादशश्रेणिप्रश्रेणि व्यवहारिणाम् । षष्ट्या वर्षसहस्रैर्दिग्विजयं कुर्वता भरतेन चक्रिविभूतिरियत्युपार्जिता।।

अभिषेकोत्सवान्ते प्रवृत्तः स्मर्तुं स्वं लोकम्। दृष्ट्वा तपःकृशां सुन्दरीं पप्रच्छायुक्तान् दौर्बल्यकारणम् । तैरप्युक्तम् । देवासौ व्रतं कर्तुमना नास्वादयति विकृतीः । केवलमाचाम्लतपसा निरन्तरेण दिनान्येतावन्त्यनैषीदेषेति । ततो भरतेन क्षमयित्वानुज्ञाता व्रताय । अत्रान्तरेऽष्टापदाद्रौ भगवदागमनं गिरिपालकैरागत्य चक्रिणे निवेदितम् । तेषां च चक्रिणा स्वर्णस्य सार्द्धद्वादशकोटयः पारितोषिके दत्ताः। सुन्दर्यपि दापिता दानं कारिता विशिष्टनेपथ्यादिपरिग्रहम्। कृतनिष्क्रमण-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

महोत्सवां सर्वर्द्धिसमुदयेन तां पुरस्कृत्य गतोऽष्टापदे चक्री। उत्तरद्वारेण सुन्दर्या समं प्रविष्टः समवसरणम् । प्रदक्षिणां दत्त्वा नत्वा चासीतः स्वस्थाने। सुन्दरी शिरसि बद्धाञ्जलिर्भूत्वा—

**निष्क्रान्तं घनदुर्दिनादिव पृथग्-भूतं विपत्तेरिव;**
**व्यावृत्तं खलसङ्गतेरिव बहि-र्भूतं यमास्यादिव ।**
**प्रोन्मग्नं नरकान्धकूपत इवो-त्तीर्णं भवाब्धेरिव;**
**स्वं मन्ये मुनिवृन्दवन्द्यचरणा-म्भोज ! त्वदालोकनात् ।।७३।।**

(शार्दूलविक्रीडितम्)

इति स्तुत्वा दीक्षां ययाचे। भगवानपि साधु साध्विति तां बहुमन्य सामायिकसूत्रोच्चारणपूर्वमनुशिष्टिं तस्या ददौ। साऽपि स्वं कृतार्थं मन्यमानानुज्येष्ठं साध्वीनां मध्ये गत्वा निषण्णा।।

चक्र्यपि प्रभुं तां च वन्दित्वा स्वपुरीं ययौ । तत्रायुक्तैः पुरुषैर्द्रष्टुमागता ज्ञातयस्तस्य दर्शिताः, अनागताश्च स्मारिताः तत्र चक्रिणा प्रत्येकं लघुभ्रातॄणां प्रहिता दूताः । गत्वा प्रोक्तं तैर्यदि युस्माकं राज्यैः कार्यं तदागत्य भरतं सेवध्वमिति। ततस्ते सम्भूय।।

**लोकः किं मदमेदुरः सुर इव, स्वं मन्यते निर्जरम्;**
**कोपाटोपविसंस्थुलं पुलकितः, किं नाम वैरायते ।**
**किं वाद्यून इवाऽशनैर्न भजते, तुष्टिं धनैर्मूर्द्धि य-**
**न्मृत्युर्वल्गति दुर्गतिश्च पुरतो, दूरेन्तरे निर्वृतिः ।।७४।।**

(शार्दूलविक्रीडितम्)

इत्यालोच्य प्रत्यूचुः । ताते त्रैलोक्यस्वामिनि विजयिनि सति न तस्मिन्नस्माकं सेवाहेवाकः । प्रजायामिकत्वप्रायं तावदिदं राज्यं तदप्यन्यदीयसेवया भविष्यति तदलं तेन । वयं तातपादानां विज्ञप्य यद्युक्तं तत्करिष्यामः इत्युक्त्वा तान् विसृज्य

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गताः सर्वेऽप्यष्टापदाद्रौ । वन्दित्वा प्रदक्षिणापूर्वं स्वस्थानेषूपविष्टाः । विज्ञाततद्भावार्थेन प्रभुणापि कृता देशना । अङ्गारकादिकथानकेषु कथितेषु प्रतिबुद्धाः सर्वेऽपि। दत्ता प्रभुणा तेषां दीक्षा । जाता क्रमेण सर्वेऽपि केवलिनः । तद्राज्यानि चाधिष्ठितानि चक्रवर्तिना ।।

पुनरप्यायुधशालानियुक्तैर्विज्ञप्तश्चक्री । देव ! नाऽद्याप्यस्त्रशालां प्रविशति चक्ररत्नमिति । चक्रिणोक्तं तर्हि कश्चिदद्याऽप्यवशिष्यते जेतव्येषु । विमृश्य सचिवैर्विज्ञप्तम्। देव ! भुजबलावलेपतृणीकृतत्रिभुवनोऽस्त्येव महाबलो बाहुबली। ततश्चक्रिणा प्रहितस्तस्य दूतः । अनुजराज्यापहारकलुषितेन बाहुबलिना न गणितश्चक्रिदुतः । तेन गत्वा कोपितो भरतस्ततः सर्वसन्नाहेन प्राग्वच्चक्रानुगः शकुनैरननुकूलैरपि चलितः शीघ्रैः प्रयाणैः सम्प्राप्तो देशसीमाम् । बाहुबलिरप्यागतः सर्वसन्नहनेन । द्वावपि देवपूजादिकृत्यं कृत्वा संवर्म्य प्रगुणीभूतौ योद्धुम्, अत्रान्तरेऽमर्त्यैरागत्य निवार्य चतुरङ्गं युद्धम्, दृष्ट्याद्युत्तमयुद्धेनैव योद्धव्यमिति द्वावपि प्रार्थितौ । ततो दृष्टियुद्धं वाग्युद्धं बाहुयुद्धं मुष्टियुद्धं दण्डयुद्धं क्रमेण ताभ्यां कृतम्, सर्वत्रापि बाहुबलिना जितम् । ततोऽतिविषण्णश्चक्री चेतसि चिन्तयितुं प्रवृत्तः ।

**षट्खण्डभूजयकरं मम चक्ररत्नं,**
**स्वप्नान् ददर्श च चतुर्दश मे सवित्री ।**
**बाहोर्बले किमपि बाहुबली बली च,**
**तच्चक्र्यहं किमयमित्यपि संशयोऽस्ति ।।७५।।**(वसन्ततिलका)

इत्यादिचिन्तासन्तानतिरस्कृतचैतन्योऽतिकोपाद् भ्रमयित्वा मुमोच चक्रम्। तच्च बाहुबलिनं परितः प्रदक्षिणीकृत्य स्वगोत्रे किल न प्रभवतीति गतं भरतस्यैव हस्ते । ततो बलसूदन इवोर्जस्वलो बाहुबली वज्रकठिनं मुष्टिमुद्यम्य चक्रिणं हन्तुं प्रधावितोऽपि विषादनिषादस्पर्शकश्मलं विलोक्य चक्रिणं सहसैव प्रशान्तश्चिन्तयितुं प्रवृत्तः—

**एतेनैव तपस्विनी न मुमुचे, तप्तं तपः सुन्दरी;**
**न्यक्कारं कृतवान् लघुष्वपि निज-भ्रातृष्वयं निस्त्रपः।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**एष द्वेषनिधिर्वधार्थममुच-श्चक्रं च मे निर्घृणो;**
**ज्येष्ठोऽप्यद्य कनिष्ठ एव यदि वा-धिग्नौ क्रमोल्लङ्घिनौ ।।७६।।**

(शार्दूलविक्रीडितम्)

**तैरेवोचितमालोचि, सोदरैर्लघुभिर्मम ।**
**अकृतातिक्रमैस्तातमार्गो यैः प्रथमं श्रितः ।।७७।।**

इत्यादिभावनया विरक्तस्तेनैव मुष्टिना मूर्द्धः केशानुञ्चखान । सर्वं सावद्यं च निषिद्धम् । यास्यामि तातान्तिकमिति वलितोऽपि कषायोदयवशात् प्रत्यावृत्य मनसि विकल्पयितुं प्रवृत्तः । तत्र गतेन मया प्रथमोत्पन्नकेवला लघवो भ्रातरः कथं वन्दनीयाः । ततः केवली भूत्वाऽहमपि यास्यामीति निर्णीय स्थितस्तत्रैव कायोत्सर्गे।।

भरतोऽपि सपश्चात्तापः सविनयं पादयोर्निपत्य स्वापराधं क्षमयित्वा तत्पुत्रं च सोमयशसं विन्यस्य तद्राज्ये गतोऽयोध्यायाम् । बाहुबलिमुनेरपि परीषहान् सहमानस्य सम्पूर्णमब्दमेकम् । ततश्चिन्तितमादिदेवेन ।।

**गेहस्नेहमपाकरोति विभवं, सम्भावयन्त्यशमवत्;**
**पुत्रं शत्रुसमानमिच्छति जनो, देहं दहत्यग्निना ।**
**भोगत्यागविवेकधर्मविमुखः, कार्यायतो जायते;**
**मानोत्तानमना न मानवजनो, मीमांसते किञ्चन ।।७८।।**

(शार्दूलविक्रीडितम्)

ततो ब्राह्मीसुन्दर्यौ मानविमोचनोपदेशदानाय तदन्तिकं प्रेषिते । ते अपि तत्र गत्वा महाकष्टेन लक्षयित्वा प्रदक्षिणीकृत्य वन्दित्वा पार्श्वयोः स्थित्वा महासत्त्व ! हस्तिस्कन्धाधिरूढानां नोत्पद्यते केवलमित्युक्त्वा च जग्मतुः । सोऽपि विमृशन् स्वयं विचारयति स्म । नूनं मान एव हस्ती नान्यस्ततो धिगहं व्रतज्येष्ठाशातना-कारकोऽहं गत्वा तान् वन्दित्वा स्वापराधं क्षमयिष्यामीति यावच्चरणमुत्पाटयति तावन्मोहक्षयादुत्पन्नं केवलज्ञानम् । सम्प्राप्ता देवाः । अनुभूतज्ञानमहिमा च गतः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रभुसन्निधौ दत्त्वा प्रदक्षिणां तीर्थं च नत्वा केवलिपरिषद्यासीनः ।।

अथ स्वामिशिष्यो भरतस्य पुत्रो मरीचिरेकादशाङ्गपाठी श्रामण्याचारखिन्नः स्वबुद्धिकल्पितं त्रिदण्डिव्रतिवेषमाश्रित्य प्रभुपरिवारपार्श्ववर्ती पृथग् वर्तितुं लग्नः। धर्मदेशनया प्रबुद्धांश्च जनान् भगवतः पार्श्वे प्रहिणोति । एवं स कालं गमयन्नस्ति।।

प्रभुरन्यदा समवसृतोऽष्टापदे । समायाताः शक्रादयः । ज्ञातभगवदागमनश्चक्र्यप्यागतः । स्तुत्वा नत्वा चानुशक्रमासीनः । श्रुता देशना । तदन्ते भरतेन प्राञ्जलचेतसा राज्यस्वीकाराय प्रार्थिता अनुजमुनयः । ततः प्रभुणा प्रबोधितो व्रतभङ्गकरणदोषोदाहरणैः । ततः चक्रिणा पञ्चभिः शकटशतैरानाय्याहारं भोक्तुं प्रार्थितास्ते । ततः प्रभुणा राजपिण्डोऽपि न कल्पते सुविहितानामिति कथयित्वा निवारितः । ततो विषण्णोऽयमित्यवबुध्य तत्सन्तोषाय शक्रेणावग्रहभेदान् प्रभुः पृष्टः । प्रोवाच च स्वामी । देवेन्द्र-चक्रि-नृप-गृह-स्वसाधुसम्बन्धात् पञ्चधाऽवग्रहः। एषां चोत्तरेणोत्तरेण पूर्वः पूर्वो बाध्यत इति । ततः प्रणम्य शक्रेण स्वावग्रहोऽनुज्ञातः। चक्रिणापि स्वमनुग्राहयितुं स्वावग्रहोऽनुज्ञातः ।।

समानीतस्य चाहारस्य दानस्थानं पृष्टः शक्रस्तेनापि गुणोत्तरेभ्यो देयमित्युक्तम्। ततो भरतेन साधर्मिका एव गुणोत्तरा अस्मद्भ्य इति निर्णीतं स्वहृदये । पुनश्चक्रिणा भवतां स्वाभाविकमिदं रूपमुतान्यदिति पृष्टः शक्रस्ततस्तेनापि महापुरुषोऽयं मान्य एवेत्येका निजाङ्गुली जाज्वल्यमाना प्रदर्शिता। ततः—

**शक्रस्यैकाङ्गुलीज्योति-र्जगदद्योतयत् तथा।**
**शतैरपि शितांशूनां नैव विद्योत्यते यथा ।।७९।।**

ततः प्रभुं नत्वा शक्रश्चक्र्यपि गतौ स्वं स्वं स्थानम् । अयोध्यां गतेन चक्रिणा रत्नसञ्चयेन शक्राङ्गुलीं कारयित्वा कारितोऽष्टाह्निकामहोत्सवः । ततः प्रभृत्यऽद्याऽपि वर्तते इन्द्रमहः । प्रभुरपि प्रवृत्तो नानादेशेषु विहर्तुम् ।।

भरतेनाऽऽकारिताः सर्वेऽपि श्रावकाः । भवद्भिः कृष्यादिसावद्यं किमपि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कर्म न कार्यम् । मदीयपोषधशालायामुभयकालं प्रतिक्रन्तव्यम् । ममाऽन्तिकं चागत्य "जितो भवान् भयं वर्तते तस्मान् मा हन मा हन" ति प्रत्यहं पठनीयम् । भोजनवस्त्र- पानादिसर्वमहं वः पूरयिष्यामीति भणितास्ते । ततः परं तथा कर्तुं प्रवृत्तास्ते । तथा च सति गच्छद्भिर्दिनैः श्रावकाश्रावकयोरन्तरं दुरधिगमं सञ्जातम्। ततश्चक्रिणा काकिणीरत्नेन श्रावकाणां वैकक्षकं चिह्नं कृतम् । स्वाध्याययोग्याश्चार्यवेदाः कृताः। तत्पाठे विचारे च ये निर्वहन्ति ते भोजनं लभन्ते नान्य इति व्यवस्था कृता । ततो लोकोऽपि तेषां पूजां कर्तुं प्रवृत्तः । भरतानन्तरं पुत्रेणाऽर्कयशसा सौवर्णानि वैकक्षकानि कृतानि । एवं महायशसा रौप्याणि । अन्यैः पट्टसूत्रमयानि । भरतादष्टभिर्भूपैर्भरतार्द्धं भुक्तम् । भगवन्मुकुटश्च शिरसि न्यस्तः । सुविधिशीतलयोरन्तरे साधूनां विच्छेदादुत्पन्नो माहनाचारः । यतः साध्वभावे त एव श्रावकान् प्रत्याख्यानादिकं कारितवन्तस्ततस्त एव धर्मदेशका जातास्ततो मिथ्यात्वं च गताः ।।

एकदा प्रभुः सपरिवारः सम्प्राप्तोऽष्टापदे । मरीचिरप्यायातः । गतश्चक्री वन्दितुम् । समये च तेन भाविनां तीर्थकृतां चक्रिणां च सङ्ख्या-नाम-वर्णादिकं प्रभुपार्श्वे पृष्टम् । प्रभुरप्यकथयत् । अजिताद्यास्त्रयोविंशतिरर्हन्तः सगराद्या एकादशचक्रिणोऽन्येऽपि भविष्यन्ति । मया त्वया च समं चतुर्विंशतिरर्हन्तः, द्वादश च चक्रिणः, नव विष्णवः, नव प्रतिविष्णवः, नव बलभद्राः, एवं त्रिषष्टिः पुरुषाः । इत्यादिकं सर्वं पृष्टमपृष्टमपि सुव्यक्तं कथितम् । पुनश्चक्रिणा पृष्टम् । भगवन्नत्र स कश्चिज्जीवोऽस्ति यस्त्वमिव तीर्थं प्रवर्त्त्य सेत्स्यतीति । प्रभुरुवाच । य एष आदिमः परिव्राजको मरीचिनामा तव सूनुरयं क्रमेण क्रमेण विशुध्यन् पोतनपुरे त्रिपृष्ठः प्रथमोऽर्द्धचक्री । प्रत्यग्विदेहे मुकापुर्यां प्रियमित्रनामा चक्रवर्ती । भरतक्षेत्रे च महावीराभिधानश्चतुर्विंशस्तीर्थकरश्च क्रमेण भविष्यतीति । ततो भगवदनुज्ञया तत्पार्श्वे गत्वा चक्री प्रदक्षिणापूर्वं भगवदुक्तं कथयित्वा नत्वा च मरीचिमयोध्यां गतः । सोऽपि तदाकर्ण्य सहसैव त्रिः करास्फोटं कृत्वा नृत्यन्नात्मानं स्वकुलं च परिवारस्याग्रे श्लाघयितुं प्रवृत्तः । ततस्तीव्राध्यवसाययोगात् तेन नीचैर्गोत्रं कर्मोपार्जितम्। दीक्षोन्मुखं कपिलं प्रति "कपिल ! अत्राऽपि धर्म इहाऽपि धर्मः"

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इति भणता कोटिकोटिप्रमाणः संसारश्चोपार्जितस्तेनेति।।

भगवानपि स्वविहारव्याजेन महीं पावयन् सौराष्ट्रमण्डलालङ्कारे श्रीशत्रुञ्जयगिरौ समवसृतः। सपरिवारश्च पुण्डरीकगणधरोऽपि तत्रायातः। देशनान्ते प्रभुणाभिहितम्। गणधरपुण्डरीक ! पुण्डरीक ! वयमन्यत्र विहरिष्यामः। मुनिकोटिपरिवृतस्तत्त्वमत्रैवाऽऽस्व। क्षेत्रानुभावादेवाऽत्र स्थितस्य भवतः सपरिवारस्यापि केवलज्ञानमचिरादेवोत्पत्स्यते, मोक्षोऽप्यासन्न एवेति। स्थितस्तत्र पुण्डरीकः कोटिपरिवारोऽप्यनशनेन। प्रभुरन्यत्र विजहार। मासान्ते चैत्रपूर्णिमायां कोटिपरिवारसहितस्याऽप्युत्पन्नं केवलज्ञानं पुण्डरीकगणधरस्य। क्रमेण क्रमेण सिद्धाः सर्वेऽपि। समायाताः सिद्धमहिमां कर्तुं दिवो देवाः। ततः प्रभृति च प्रथमं तीर्थं श्रीशत्रुञ्जयगिरिर्जातः।।

ज्ञातस्वरूपश्च सम्प्राप्तस्तत्र भरतेश्वरः। प्रभुसमवसरणस्थाने नानाविधमणिरत्नमयशिलास्थानं निर्मापितं जिनभवनम्। कारिता मध्ये श्रीयुगादिदेवप्रतिमा। पुण्डरीकप्रतिमा च तत्सन्निधौ कारिता। पूजार्चाप्रेक्षणकप्रमुखोत्साहसहिताष्टाह्निका कारिता। मिलिताश्च सुरकिन्नरविद्याधरादयः। महति महोत्सवे प्रवर्तमाने पठितं मङ्गलपाठकेन–

**तेषां किं चरितं स्तुवन्तु कवयो-ऽप्यत्यद्भुतं नाकिनाम्;**
**ये कालं गमयन्त्यनल्पयुगम-प्येकैककार्ये रताः।**
**एकच्छेकतमस्त्वमेव नृपते !, पात्रं समस्तस्तुते-**
**धर्मार्थस्मरमोक्षसाधनविधौ, यस्याऽन्तरायो न हि ।।८०।।**

(शार्दूलविक्रीडितम्)

अपि च–

**त्वत्तोऽन्यः कतमः पुमान्निरुपमं, प्रासादरत्नं जिन-**
**स्येदृक् कारयितुं क्षमः स्वशिखर-श्रेणीभिरभ्रंलिहम्।**
**यत्केतुस्थपताकिकाऽञ्चलचल-द्वातप्रतानैः शनै-**
**र्नात्मानं परिवीजयद्भिरमति, श्रीसङ्गमोष्मार्तितः।।८१।।** (शार्दूलविक्रीडितम्)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नित्यपूजार्थं ग्रामादिकं प्राज्यं दानं कृत्वा गतश्चक्री स्वस्थानम्।।

भगवतः सर्वपरिवारे साधूनां चतुरशीतिसहस्राः । साध्वीनां लक्षत्रयम् । सार्द्धसप्तचत्वारिंशच्छती चतुर्दशपूर्विणाम् । नवसहस्री अवधिज्ञानिनाम् । विंशतीसहस्री केवलिनाम् । विंशतीसहस्री षट्शती च वैक्रियलब्धिमताम् । द्वादशसहस्री (सपञ्चाशत्) षट्शती च वादिनां मनःपर्ययज्ञानिनां च । द्वाविंशतिशती अनुत्तरोपपातिसाधूनाम्। सार्द्धं लक्षत्रयं श्रावकाणाम् । पञ्चलक्षी (सार्ध)चतुःसहस्री च श्राविकाणाम् ।।

दीक्षाकालात् पूर्वलक्षान्ते मोक्षकालं निजमाकलय्याऽष्टापदं प्रति प्रभुर्गतः। मुनीनां दशभिः सहस्रैः सह तस्य शिखरे स्थित्वा पादपोपगमनं प्रभुः प्रपेदे । गिरिपालकैः शीघ्रमागत्य ज्ञापितश्चक्री । सोऽपि शोकशङ्कुपीडितस्त्वरितमागतः सान्तःपुरादिपरिवारः । दृष्टोऽनेन पर्यङ्कासनस्थः स्वामी । वन्दित्वा प्रत्यासन्न आसीनः। चलितासनाः सम्प्राप्ताः शक्रादयः । सन्ततव्याख्यानपरश्चतुर्दशेन तपसाऽवसर्पिण्यास्तृतीयारकस्य एकोननवतौ पक्षेष्ववशिष्टेषु माघमासकृष्णत्रयोदश्यामभीचौ पूर्वाह्ने निष्कर्मापर्यङ्कासनस्थ एव प्रभुर्लोकाग्रमध्यासितवान् । प्रतिपन्नानशनाः शेषमुनयोऽपि प्रापुः शिवम्।।

ततश्चक्रिणो हृदये जातः शोकसङ्कट्टो न शृणोति न पश्यति । तत शक्रेण सपरिवारेण कृतो महानाक्रन्दः, प्रवृत्तश्च विलपितुम्–

**अहह ! मनुजलोकः शून्य एवैष सर्वः,**
**प्रसरति हृदि चैतस्याऽधुना मोहनिद्रा ।**
**अवतु क इव विश्वं ग्रस्यमानं तमोभि-**
**र्जिनसवितरि जाते मौक्तिके मुक्तिशुक्तौ ।।८२।।**(मालिनी)

ततश्चक्रिणापि निर्भरं कृतं रुदितम् । विलीनो ग्रन्थिः । शक्रेण प्रबोध्य त्याजितः शोकम् । ततो देवैर्नन्दनवनादिभ्यो गोशीर्षचन्दनकाष्ठान्यानीय पूर्वस्यां दिशि प्रभुदेहयोग्या कृता वृत्तचिता । इक्ष्वाकुमुनीनां च योग्या त्र्यस्रचिता दक्षिणस्यां कृता । शेषमुनिनां योग्या च चतुरस्रचिता पश्चिमायां कृता । क्षीरोदजलैः स्नपयित्वा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गोशीर्षचन्दनरसैर्विलिप्य दिव्यवासोभिरधिवास्य माणिक्यादिभिर्भूषयित्वा प्रभोर्वपुः प्रणम्य सहस्रवाह्यां शिबिकामारोप्यान्यान्यपि मुनिशरीराणि अन्यास्वन्यासु शिबिकास्वारोप्य गायन्तीषु रम्भादिषु, गायनीषु क्रियमाणेषु, पुष्पाक्षेपेषु, प्रसर्पत्सु सुरभिधूपधूमेषु, वाद्यमानेष्वातोद्येषु, यथोचितं चितासु चिक्षिपुर्दिवौकसौ देहान्। ज्वालयामासुरग्निमग्निकुमारकाः । मुक्त्वास्थीनि दग्धेषु धातुषु विध्यापयामासुश्च चितां मेघकुमारः । दक्षिणदंष्ट्रामुपरितनीं सौधर्मेन्द्रो वामामीशानेन्द्र उपरितनीम्, अधस्तनीं दक्षिणां चमरेन्द्रो वामामधस्तनीं बलीन्द्रः, दन्तान् शेषपुरन्दराः, अस्थीनि देवाश्च जगृहुः । श्रावकैरग्निर्लब्धः । कैश्चिद् भस्मलब्धम् । ततः प्रभृति बह्निभस्मनोः पवित्रत्वम् । चितात्रितयस्य स्थाने रत्नस्तूपत्रयं देवैः कृतम् । प्रभुशरीरकृत्यं सर्वं स्वयं शक्रेण कृतम् । शेषाणां तु देवैः कृतम् । ततो नन्दिश्वरे यात्रां कृत्वा गताः सर्वेऽपि शक्रादयः स्वं स्थानम् । इन्द्राश्च माणव स्तम्भस्थवृत्तवज्रसमुद्गकेषु पूजार्थं दंष्ट्रादि चिक्षिपुः।।

भरतेश्वरेण वर्द्धकिरादिष्टस्तेन च स्वामिदेहसंस्कारस्थानासन्नभूमौ योजनायामस्त्रिगव्यूतोच्चः सिंहनिषद्याभिधानो रत्नशिलामयैः प्रासादो निर्मापितः। तन्मध्ये स्वस्वमानवर्णलाञ्छनसहिताश्चतुर्विंशतेरर्हतां प्रतिमाः कृताः । तदग्रतो भ्रातॄणां नवनवतेः प्रतिमाः कृताः । तदग्रतश्च प्रत्येकं भरतमूर्तिर्विज्ञापकपुरुषसंस्थाना कृता । नानाप्रकाराश्च रक्षार्थं यन्त्रप्रयोगाः कृताः । दण्डरत्नेन पर्वतदन्तानुच्छेद्य निर्मानुषप्रचारः पर्वतः सर्वतोऽपि कृतः । अष्टौ च मेखलाः कृतास्ततः प्रभृत्यष्टापद इति तस्य नाम सञ्जातम् ।।

ततश्चक्री तासां प्रतिमानां स्नानपूजास्तुतिप्रभृतिकं सर्वं कृत्वा सम्प्राप्तोऽयोध्याम्। तत्र चाऽमात्यैः प्रबोध्य प्रबोध्य क्रमेण क्रमेण कृतो निःशोकः । प्रवर्तितश्च राज्यकृत्येषु । स्वामिमोक्षदिनात् पञ्चपूर्वलक्षीं वैषयिकसुखेनाऽतिवाहितवान्।।

अन्यदा कृतस्नानविलेपनमाल्यांशुकरत्नाभरणताम्बूलाद्याडम्बरो रत्नादर्शगृहे गत्वा गतिरभसगलितकनिष्ठाङ्गुलीमुद्रिकः सर्वाङ्गं प्रत्यवयवमवलोकयन्नूर्मिकामेकाङ्गुलीं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दृष्ट्वा शेषावयवेभ्योऽपि वैराग्यातिशयादलङ्कारानुत्तारयन् हृदि भावयति स्म ।।

**न विभाति वपुर्नृणामनलङ्कारं कवेः कवित्वमिव।**
**सनिमित्ते गुणवृद्धी धातोर्धातोरिवाङ्गेऽपि।।८३।।** (अर्या)

अपि च—

**अहह ! सकलं जन्मात्मीयं मया गमितं वृथा,**
**किमिव हि तपस्तप्ये स्वल्पेतरत्प्रति किं त्वरे।**
**न खलु विदितो जातः कैरप्यहं स्वपितुर्गुणै–**
**र्मम तदधुना पूर्णं भोगैः स्पृहा न गृहाश्रमे।।८४।।** (हरिणी)

एवं च भावनाधिक्यात् सहसैव घातिकर्मक्षयादुत्पन्नं केवलज्ञानम् । सम्प्राप्तः शक्रस्तेनोक्तं, द्रव्यलिङ्गं गृहाण, ततो वन्दे । भरतेनाऽपि कृतः शिरःकेशोत्पाटः। देवतया चार्पितं रजोहरणादिकम् । ततो वन्दितः शक्रेण भरतमुनिः केवली । राज्ञां दशभिः सहस्रैस्तत्पृष्ठतो गृहीतं व्रतम् । आदित्ययशा भरतस्य पुत्रः स्वयं शक्रेणाऽभ्याषिच्यत राज्ये । केवलोत्पत्त्यनन्तरं पूर्वलक्षं यावद् भव्यप्रतिबोधाय विहारं कृत्वा प्रत्यासन्नमोक्षः प्रभुवदष्टापदगिरौ गतः । मासं यावदनशनं प्रपाल्य क्षीणभवोपग्राहिकर्मा मुक्तिसुखभाग् बभूव भरतचक्रिमुनिः । भरतमुनेः कौमारे पूर्वलक्षाणां सप्तसप्ततिः । माण्डलिकत्वे वर्षसहस्रमेकम् । चक्रवर्तित्वे वर्षसहस्रोना षट्पूर्वलक्षी । व्रते पूर्वलक्षम् । सर्वायुश्चतुरशीति पूर्वलक्षी । पञ्चधनुःशतान्युच्चत्वं च । भरतमुनेर्मोक्षमहिमा च प्रभोरिव शक्रादिदेवैर्महाप्रमोदेन कृतः ।।

**ऋषभदेवचरित्रमिति त्रयो-दशभवं चरितं भरतस्य च ।**
**विमलसूरिरभूरिकथाप्रथा-सुगममुद्धृतवान् स्मृतिहेतवे ।।८५।।**
(द्रुतविलम्बितम्)

## ।।श्रीऋषभदेव-भरतयोश्चरितं समाप्तम्।।

अक्षरगणनया ग्रन्थाग्रं श्लोक ८६१ ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# ।।श्रीअजितनाथचरित्रम्।।

**दानं निरन्तरममुष्यगतिर्नमस्या,**
**विश्वस्य नैष विषयः प्रतिकारकाणाम् ।**
**ज्ञात्वेति लाञ्छनमिषाद् गजताश्रिता यं,**
**सन्तः श्रयन्त्वजितनाथमनेकपं तम् ।।८६।।** (इन्द्रवज्रा)

जम्बूद्वीपे महाविदेहे वत्सविजये सुसीमायां पुर्यां विमलवाहनो राजा राज्यं पालयन्नेकदा बहिर्व्रजन् कस्याऽपि गृहे पञ्जरस्थितं बिडालदर्शनादार्त्तस्वरं व्याहरन्तं शुकं श्रुत्वा दृष्ट्वा च करुणार्द्रचेताश्चिन्तयितुं प्रवृत्तः–

**नाम्भः केलिसुखं सरस्सु सरसं, हेला न वेलावने[१],**
**नाकाशे सविकाशमुत्प्लुतिरसः, क्रीडा न नीडाश्रया।**
**नासङ्गः प्रियया न बन्धुभिरभि-ष्वङ्गः किमस्योच्यते,**
**कष्टं राजशुकस्य पिण्डिततनोः, स्तोकाजिरे पञ्जरे ।।८७।।**
(शार्दूलविक्रीडितम्)

इत्यादिखेदव्याकुलमनाः सहसैव संसाराद् विरक्तः सुतं राज्ये नियुज्य जग्राह परिव्रज्याम् । यथावच्च परिपाल्याऽर्हद्भक्त्यादिस्थानकैस्तीर्थकरनामकर्मोपार्ज्य स्वायुः प्रान्ते मृत्वानुत्तरे विजयविमाने देवो जातः ।।

जम्बूद्वीपे भरतक्षेत्रे विनीतायां पुर्यां श्रीऋषभदेवमोक्षकालात् सङ्ख्यातीतेषु व्यतीतेषु भूपतिषु क्रमेणेक्ष्वाकुवंश्यो जितशत्रुर्नृपो जात। तस्यानुजन्मा सुमित्रविजयो नाम युवराजः । जितशत्रुर्नृपस्य विजयाभिधाना पट्टराज्ञी । विजयविमानाच्च्युत्वा विमलवाहनजीवो वैशाखशुक्लत्रयोदश्यां रोहिणीनक्षत्रे गजादिचतुर्दशस्वप्नसूचित-तीर्थकरजन्मा विजयादेवीकुक्षाववतीर्णः । सुखं च नारकाणामपि तदाऽभवत् ।

१ समुद्रतटे स्थिते वने।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सुमित्रविजयपत्न्याश्च वैजयन्त्याः कुक्षौ तस्यामेव रात्रौ वृषभादिचतुर्दशस्वप्नसूचित-चक्रधरजन्मा वक्ष्यमाणपरिव्राजकजीवोऽवतीर्णः । नवसु मासेष्वर्द्धाष्टमदिनेष्वतिक्रान्तेषु माघशुक्लाष्टम्यां रोहिणीनक्षत्रे स्वर्णवर्णो गजलाञ्छनः सार्द्धचतुःशतधनुर्मानो द्वासप्ततिपूर्वलक्षायुः सर्वलक्षणलक्षिताङ्गो ज्ञानत्रयधरः पुत्रो जातः ।।

राज्ञा कारितः पुर्यां महामहोत्सवः । गर्भस्थे प्रभौ भर्त्रा सह रममाणा माता द्यूते कदापि न जिता । ततः पित्रा प्रभोरजित इति कृतं नाम । भ्रातृजस्य पुनः सगर इति स्थापितमभिधानम् । द्वावपि समानवपुषौ प्राप्तौ तारुण्यम् । सम्पूर्णाष्टादशपूर्वलक्षः प्रभुर्जितशत्रुर्नृपेणाभिषिक्तः स्वराज्ये । प्रभुणापि यौवराज्येऽभिषिक्तः सगरः । श्रीऋषभनाथस्थविरसमीपे च श्रीजितशत्रुर्नृपः स्वकीयपरिवारसहितः प्रव्रजितः । प्राप्तकेवलज्ञानश्च क्रमेण सिद्धः ।।

कौमारादजितस्वाम्यपि त्रिपञ्चाशत्पूर्वलक्षीं यावद्राज्यं कृत्वा समयोऽयं दीक्षाया इति सगरं राज्येऽभिषिच्य दत्त्वा च सांवत्सरिकं दानं शक्रादिकृतनिष्क्रमणो- त्सवः सहस्राम्रवणे गत्वा विमुच्य सर्वानलङ्कारान् कृत्वा पञ्चभिर्मुष्टिभिः केशोत्पाटं कृतषष्ठतपा माघशुक्लनवम्यां रोहिणीनक्षत्रे सप्तच्छदतरुतले वहन्नंसस्थलेन देवदूष्यांशुकं राज्ञां सहस्रेण समं सावद्यं मया निषिद्धमिति प्रतिपन्नवांश्चारित्रम् । ततः समुत्पन्नं प्रभोर्मनःपर्ययज्ञानम् । द्वितीयेऽह्नि च भगवतो ब्रह्मदत्तनृपगृहे जातं परमान्नेन पारणम्। समुद्भूतानि तत्र पञ्चदिव्यानि—

**दत्तं येन जिनाय दानमतुल-श्रद्धाविशुद्धात्मना;**
**तस्मिन्नेव भवे शिवेऽस्य गमनं, पुंसस्तृतीयेऽथवा ।**
**किं चान्येपि जना भवन्ति विरुज-स्तं वीक्षमाणाः क्षणम्;**
**क्षुद्रोपद्रवविद्रवश्च सकले, स्यात् तत्र भूमण्डले ।।८८।।**

(शार्दूलविक्रीडितम्)

प्रभुरपि द्वादशवर्षीमन्यत्र विहृत्य पुनरपि सहस्राम्रवने समायातः । कृतषष्ठतपसश्च सप्तच्छदतरुतलस्थस्य प्रभोः पोषशुक्लैकादश्यां घातिकर्मक्षयादुत्पन्नं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

केवलज्ञानम् । कृतं च देवैः प्राग्वत् समवसरणादिकम् । सम्प्राप्ताः शक्रादयः । सगरोऽपि सान्त पुरपौरः समायातो वन्दितुम् । कृता प्रभुणा देशना ।।

**निःसङ्ख्यानि दिनानि यान्ति विषय-व्यासङ्गतः प्राणिनां,**
**जीवश्चेतयते न जातु यदहं, धर्मस्य सर्वं फलम् ।**
**भुञ्जानोऽस्मि विरम्य किञ्चन पुन-र्नव्यं न कुर्वेऽग्रतो;**
**येनं स्यां सुखितोऽसुखं च न पर-स्येक्षे न याम्यप्यधः ।।८९।।**

(शार्दूलविक्रीडितम्)

इत्याकर्ण्य प्रतिबुद्धाः प्रभूताः प्राणिनः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकम् । सगरपिता सुमित्रविजयोऽपि प्रभुणा प्रव्राजितः स्थापिताः पञ्चनवतिर्गणधराः सिंहसेनप्रभृतयः । व्याख्यानविसर्जनानन्तरं प्रणम्य गताः शक्रादयः सगरादयश्च स्वं स्वं स्थानम्।।

प्रभुतीर्थे महायक्षो नाम्ना यक्षः । स च चतुर्मुखः श्यामो गजस्थो वरदमुद्गर्यक्षसूत्रिपाशिदक्षिणचतुर्भुजोऽभयदबीजपूराङ्कुशशक्तिभृद्वामचतुर्बाहुः। अजितबला शासनदेवता। सा च स्वर्णवर्णा वरदपाशिदक्षिणभुजा। बीजपूराङ्कुशिवामबाहुः ।।

अन्यदा प्रभुर्विहारक्रमेण गतः कौशाम्बीम् । तत्र व्याख्यानं भगवति कुर्वाणे समवसरणमध्ये सम्प्राप्तमेकं माहनमिथुनम् । तन्मध्यात् पुरुषेणोत्थाय पृष्टः प्रभुः स्वसङ्केतम् । भगवान् ! किमिदमिति । प्रभुणाऽप्युक्तम् । सर्वोऽप्ययं सम्यक्त्वप्रभावो नान्यदिति । ततो गणधरेण पृष्टम् । भगवन्नन्येषामपि च बोधाय सविस्तरं कथयेति । ततः प्रभुः प्राह ।।

शालिग्रामाग्रहारे[१] दामोदरो नाम माहनः, सोमा तस्य भार्या । शुद्धभट्टस्तयोः पुत्रः, सुलक्षणा तद्भार्या, तयोर्भोगपरयोर्मृतौ पितरौ । विभवोऽपि क्षीणः । ततो

१ ब्राह्मणबहुलके ग्रामे ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भार्याया अप्यनाख्याय गतः शुद्धभट्टो द्रव्यार्जनायाऽन्यदेशम् । सा च गृहे एकाकिनी वसति । कदाचिद् विपुलानामगणिनी तदन्तिकमागत्येति पपाठ ।।

**पावित्र्यं सदनस्य सङ्गतिरपि, स्यादुत्तमैर्मानुषैः,**
**सत्कर्मश्रवणं कुकर्मविरतिः, सभ्यत्वसम्भावना ।**
**उत्साहोऽपि कदापि धर्मकरणे, पर्वादिकाराधना,**
**मोहादेर्विलयो यतेः सुवसते-र्दानादमी स्युर्गुणाः ।।९०।।**

(शार्दूलविक्रीडितम्)

तयापि प्रहृष्टया समर्पिता स्वगृहैकदेशे तस्या गणिन्याः वसतिः । प्रतिदिनधर्माकर्णनेन च विगलिता तस्याः सर्वापि मिथ्यात्ववासना । आरोपितं सङ्घसमक्षं तस्याः सम्यक्त्वम् । जाता परमश्राविका । सकलमपि जैनमार्गमुपदिश्य वर्षानन्तरं गताऽन्यत्र गणिनी । शुद्धभट्टोऽपि द्रव्योपार्जनां विशिष्टां विधाय समायातस्तत्र। कृतश्च तया परमश्रावकः । तच्च माहनमिथुनं मिथ्यादृष्टिभिर्लोकैर्निन्द्यते । तथापि निजसम्यक्त्वात्तन्न चलति । एवं च सति जातस्तयो पुत्रः । एकदा शीतकाले शुद्धभट्टो बालकमुत्सङ्गे कृत्वा धर्माग्निष्टिका समीपे गतस्ततोऽसावन्यैर्माहनैः परतः परतः परत इति निन्दितः । ततस्तेन कुपितेन पुत्रमुत्पाट्य यदि जिनधर्मो न प्रमाणं तदा दह्यतामयं मत्पुत्र इत्युक्त्वा सहसैव क्षिप्तः स बालको वह्नौ । ततः सन्निहितव्यन्तर्या धृतः पद्मोदरे स बालकः। विस्मिताः सर्वेऽप्यासन्नवर्तिनो माहनाः। जातमास्तिक्यं बहूनां हृदये। इदं च तेन स्वगृहं गतेन कथितं स्वकीयगृहिण्या-स्तयाऽप्युक्तम्। न कर्तव्यं साहसमीदृशम् । यदि कदापि प्रमादिनी शासनदेवी भवति तदा धर्ममालिन्यं जायत इति । ततः प्रभृति स माहनो दृष्टप्रत्ययत्वाद् दृढतरसम्यक्त्वो जातः । अनेन च विस्मयेन कृतेन मनसि मम पार्श्वमागतोऽसौ । मया च सम्यक्त्वफलमिदमित्युत्तरं दत्तम् । एतच्च श्रुत्वा भूयांसो भव्याः प्रतिबुद्धाः। प्रभुरप्यन्यत्र विजहार ।।

अत्राऽन्तरे सगरस्यास्त्रशालायां समुत्पन्नं चक्ररत्नम् । कृता तस्याष्टाह्निका

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सगरेण । ततः सर्वसन्नाहेन चक्रपृष्ठानुलग्नः सगरोऽपि गतः पूर्वमार्गेण मागधतीर्थम्। गृहीत्वा तत्प्राभृतं गतो दक्षिणेन वरदामतीर्थम् । तदुपदामादाय प्राप्तः पश्चिमेन प्रभासे तटौ कनकं गृहीत्वा सिन्धुदक्षिणतटे । ततः प्राप्तो वैताढ्ये ततोऽपि तमिश्राद्वारे सिन्धोश्च दक्षिणं निष्कुटं साधयित्वा समायातः सेनानीः । ततस्तमिश्राद्वारमुद्धाटितं सेनान्या प्रविष्टश्चक्री उत्तरखण्डे साधितास्तत्राऽऽयाताः किराताः। सिन्धुसागरमर्यादश्चोत्तरः सिन्धुनिष्कुटः साधितः सेनान्या । ततो लघुहिमवति गतश्चक्री। गत्वा च ऋषभकूटाद्रौ लिखितं निजं नाम । तत उत्तरपूर्वेण मार्गेण गङ्गाभवनस्यासन्नो गतस्तदुपायनं गृहीत्वा दक्षिणदिशागतः खण्डप्रपातां गुहाम् । गङ्गापूर्वनिष्कुटं साधयित्वा समागतः सेनानीः । वैताढ्यविद्याधराश्चक्रिणा साधिताः । ससैन्योऽपि निःसृतः खण्डप्रपातायाश्चक्री गङ्गायाः पश्चिमकूले गतः । सिद्धास्तत्र नवापि नैसर्प्याद्या निधयः । गङ्गापूर्वनिष्कूटं सेनानीः साधयित्वा सम्प्राप्तः । एवं द्वात्रिंशता वर्षसहस्रेण षट् खण्डमपि भरतं साधितम् । चतुर्दशरत्नानि नवनिधय इत्यादिका चक्रिविभूतिः सम्पूर्णा सगरेणोपार्जिता । ततः समायातो विनीतायाम्। प्रविष्टो महामहोत्सवेन।।

एकदा सगरश्चक्री वाह्वालीं गतो विपरीतशिक्षमश्वमारूढस्तेनाऽप्यपहृत्य नीतो दूरमरण्यम् । तत्र च यावत्सरसि जलक्रीडां कुर्वन्नस्ति तावदेका दिव्याकारधरा काऽपि कन्या कञ्चुकिना सममायाता । तां दृष्टवा हृद्याक्षिप्तश्चक्री प्रवृत्तश्चिन्तयितुम्-

**कोदण्डमिक्षुरिषवः कुसुमानि पुष्प-**
**केतोरिति ध्रुवमियं कविवर्णनैव ।**
**विश्वत्रयं स्पृहयतः पुनरस्य जेतुं,**
**भ्रूवल्लिरेव परमायुधमङ्गनानाम् ।।९१।।** (वसन्ततिलका)

दृष्टस्तयापि सस्पृहमसौ । ततो विकल्पाकुलः सन् विज्ञप्तः कञ्चुकिना । देव ! वैताढ्ये गगनवल्लभपुरे सुलोचनो नाम विद्याधरपतिस्तत्पुत्रः सहस्रनयनः सुकेशा चेयं पुत्री, नैमित्तिकेन चक्रवर्तिनः स्त्रीरत्नमेषा भविष्यतीति कथितमस्ति।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इतश्च रथनूपुरसत्कपूर्णमेघविद्याधरेशेन परिणेतुमियं प्रार्थिता, न चास्याः पित्रा दत्तेति। ततः सुलोचनः पूर्णमेघेनाऽऽगत्य मारितः । ततः सहस्रनयनः स्वभगिनीमिमां गृहीत्वात्रायात इति । तत्रान्तरे सहस्रनयनोऽप्यागतः । तेन प्रणम्य चक्री नीतः स्वावासे, परिणायितः स्वभगिनीम् । स्त्रीरत्नीकृता सापि चक्रिणा प्रसन्नेन । सहस्रनयनेन समं गतश्चक्री गगनवल्लभे। तत्र निवेशितः पैतृके राज्ये चक्रिणा सहस्रनयनः कृतश्च श्रेणिनायकः । ततश्चक्री विद्याधरविमानच्छन्नगगनाङ्गणः समागतः सहस्राक्ष इव व्योम्ना स्वां राजधानीम् । तत्र च बद्धमुकुटैः सर्वैरपि भूपालैः कृतश्चक्रवर्त्तित्वाभिषेको द्वादशवर्ष्या च समर्थितः ।।

तत्र चान्यदा समवसृतः श्रीमानजितनाथः। समायाताः शक्रादयः सगरादयश्च वन्दितुम् । इतश्च पितृवधक्रुद्धेन सहस्रनयनेन पूर्णमेघो हतः । ततः पूर्णमेघपुत्रो घनवाहनः प्रणस्य तत्रैव समवसरणे समायातः । पृष्ठतश्च सहस्रनयनोऽपि तं हन्तुमागतः। परं प्रभुसन्निधौ न प्रभवन्ति वैराणीति मनाक् स शान्तो जातः। प्रभुणा च कृता देशना ।।

**जानानोऽपि जनः कुकर्मकुगते राज्यं निमित्तं तथा-**
**प्येतस्मान्न निवर्त्तते किमपरं, गर्वाद् गुरून् निन्दति ।**
**मग्नः कष्टमहार्णवे प्रतिपदं, सन्तप्यते संस्मर-**
**त्यात्मीयां प्रतिकूलतां न च तदा, त्राणं किमप्यस्य तु ।।९२।।**

(शार्दूलविक्रीडितम्)

इत्याकर्ण्य प्रतिबुद्धाः सर्वेऽपि । भगवन्ननयोः पूर्णमेघसुनेत्रयोः किं वैरकारणमिति प्रभुश्चक्रिणा पृष्टः । प्रभुरप्याह ।।

सूर्याभे पुरे भावनो नाम महाद्रव्यपतिर्वणिक् स्वपुत्रस्य हरिदासस्य द्रव्यं समर्प्य स्वयं देशान्तरे विशेषवणिज्यार्थं गतः । प्रचुरं च द्रव्यमुपार्ज्य द्वादशानां वर्षाणामन्ते समागत्य पुरीद्वारे रात्रिरिति बहिरेव समावासितः। अत्युत्कण्ठितश्च सार्थं मुक्त्वा रात्रावेकाकी स्वगृहद्वारमागतः । तदानीं च नगरे चौरभयमिति सर्वोऽपि

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रात्रौ सायुधः सावधानो वर्तते। ततश्च भावनश्रेष्ठी परिहासार्थमनुपलक्षितो मध्ये प्रविष्टः । पुत्रेण हरिदासेन चौरशङ्कया खड्गेन हतो विपन्नश्च । द्वावपि कतिचित् भवान् भ्रान्तौ। सम्प्रति च पूर्णमेघोऽयं भावनजीवः, सुलोचनश्च हरिदासजीवः। अनयोश्च वैरं बहुजन्मान्तरसम्बद्धमिति।।

पुनश्चक्रिणा पृष्टम् । तत्पुत्रयोरनयोः को वैरहेतुरिति । प्रभुरप्याह । चक्रिन्! भवान् प्राग्भवे परिव्राजकोऽभूत् तव शिष्याविमौ । शशी आवलिश्च । आवलिस्तु स्वभावविनीतत्वात् तवातिवल्लभोऽभूत् । एकदा आवलिना मूल्येन क्रीता धेनुः । शशिना चान्तराले पतित्वा सा गौर्गृहीता । ततः प्रभृत्यनयोर्जातं वैरम् । बहून् भवान् भ्रान्त्वाऽनन्तरभवे च रक्षःपतिभीमपुत्रो भूत्वा शशी स एष घनवाहनो जातः । आवलिस्तु सहस्रनयनो जातः । त्वं च दानप्रभावाच्चक्री जातः। तत वाऽनयोरुपरि तव स्नेहः ।।

अत्रान्तरे रक्षःपतिर्भीमो नाम तस्यामेव परिषदि समुत्थाय घनवाहनं प्रत्युवाच। वत्स! त्वं मम पूर्वभवपुत्रः, सम्प्रत्यपि ततः पुत्र इव मे । ततस्त्वया शत्रुजनाढ्ये वैताढ्ये न स्थेयम् । मदीय एव राक्षसद्वीपे त्रिकूटपर्वते मयैव मण्डितायां लङ्कायां नगर्यां स्थातव्यम् । द्वितीयस्यां वा भूमध्येऽधस्तात् षड्योजनायां सपादयोजन-शतप्रमाणायां पाताललङ्काख्यायां पुर्यां चिरन्तन्यां स्थातव्यम् । मया द्वेऽपि पुर्यौ तव दत्ते। तीर्थकरदर्शनफलं तवाऽस्मिन्नपि भवे जातमित्युक्त्वा नवमाणिक्यमयं हारं राक्षसीं विद्यां तत्रैव तस्य दत्तवान् सः । घनवाहनोऽपि सहर्षं प्रतीष्य प्रभुं नत्वा गतस्तत्र । ततः प्रभृति राक्षसवंशस्तस्मात्प्रवृत्तः । व्याख्यानविरतौ च गताः सर्वेऽपि स्वं स्वं स्थानम् । प्रभुरप्यन्यत्र विजहार ।।

सगरचक्रिणश्च जह्नुप्रमुखाः षष्ठिसहस्राः सुता जाताः । प्राप्ताः तारुण्यम्। अन्यदा तीर्थयात्राप्रसङ्गेन षट्खण्डभरतक्षेत्रविलोकनाय तैरापृष्टः पिता। चक्रिणापि-

**आत्मानं विदितं करोति सकले भूमण्डले पश्यति,**

**स्थाने स्थाने परिक्रियां स्वपरयो-रप्यन्तरं विन्दति।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**अंहःसंहतिमन्तयत्यपि महा-तीर्थान्युपास्याथवा,**
**किं किं नाद्भुतमर्जयत्यभिमतं यात्राप्रवृत्तः पुमान् ।।९३।।**
(शार्दूलविक्रीडितम्)

एतद् विमृश्य स्त्रीरत्नवर्जं सर्वाण्यपि रत्नान्यर्प्ययित्वा सर्वसन्नाहेन विसृष्टास्ते। गच्छन्तश्च क्रमेण सम्प्राप्ता अष्टापदपर्वतसमीपम् । पृष्टं तैः– कोऽयं पर्वत इति । ततोऽमात्यैर्विज्ञप्तम् । देव ! श्रीयुगादिनाथस्य पुत्रेण भरतचक्रिणाऽमुत्राऽष्टापदनामनि पर्वते चतुर्विंशतेरर्हतां प्रतिमाभिः सहितमुत्तुङ्गं जिनायतनं कारितम् । युगादिदेवस्य चाऽत्र निर्वाणकल्याणकं सञ्जातमतो महातीर्थमयं सानुमानिति । ततस्तैस्तत्रारुह्य कृतं स्नानादिकं सर्वप्रतिमानाम्, विशेषतश्च श्रीमदजितस्वामिप्रतिमायाः। पूजावन्दनानन्तरं सर्वतोऽपि तं पर्वतं विलोकयतां तेषां समुत्पन्ना चिन्ता–

**स्वर्णापूर्णतनुर्न[१]मेरुनिचितो, मेरुर्न केनाप्यसौ,**
**दृष्टः स्पष्टतराणि रोहणगिरौ, रत्नानि कः प्रेक्षते ।**
**माणिक्योपलकान्तिचुम्बितवियत्यस्मिंस्तु दृष्टे नगे,**
**नक्षत्रेष्वपि रत्नधीर्विरमति, द्रष्टुर्निकृष्टांशुषु ।।९४।।** (शार्दूलविक्रीडितम्)

ततो दुःषमाकालमाहात्म्यादत्यर्थमर्थलुब्धैर्नरैरवश्यं खनित्वा गृहीष्यतेऽसौ। ततः क्रियते कोऽपि रक्षणोपायो, जीर्णोद्धारपुण्यं चार्जितं भवेदिति । दण्डरत्नमादाय जह्नुना ज्येष्ठसुतेन तत्पार्श्वतः सहस्रं योजनान्यगाधत्वे खानिता परिखा । ततो नागलोके जातः क्षोभः । प्रकुपितो ज्वलनप्रभनामा नागकुमारः । समेत्य च जह्नुसमीपं प्रोवाच । केनाऽस्माकमुपद्रवोऽकारीति । जह्नुनाऽप्यूचे नागेन्द्र ! तीर्थरक्षार्थमिदं कृतम् । न पुनस्त्वद्भक्त्यै[२]ति । ततोऽतः परं नापराद्धव्यमित्युक्त्वा गतः स्वस्थानं नागेन्द्रः । अन्यस्मिंश्च दिने जह्नुना सोदरैः सहालोचितम् । कालेन रिक्तायाः परिखायाः पूरणमपि सम्भाव्यते । ततो दण्डरत्नेन गङ्गाप्रवाहमानीय पूर्यतेऽसौ । ततः साधु साध्विति भणित्वा गताः सर्वेऽपि गङ्गाम्। समाकृष्य

१ सुरपुन्नागः।। २ विभागबुद्धिना।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चानीतः पयःप्रवाहः । पूरिता च सर्वापि परिखा । जह्नुना समानीतेति जाता जाह्नवी। प्लावितानि च नागगृहाणि। क्रुद्धो नागराजः । समेत्य सर्वनागैः समं वीक्ष्य क्रूरदृष्ट्या दृग्विषज्वालाभिर्भस्मीकृताः क्षणमात्रेण षष्टिसहस्रसङ्ख्या अपि जह्नुप्रभृतयश्चक्रिणः पुत्राः । गतो नागराजः।।

समुत्थितः सैन्ये महानाक्रन्दः । सैनिकाश्च विविधं विलपन्तो विप्रेणैकेनागत्य प्रबोध्य विनीतामानीताः । अदूरदेशे संस्थाप्य तान् स्वयं च किमप्यनाथमृतकमुत्सङ्गे कृत्वा प्रथममेव राजगृहाङ्गणे गतः । प्रवृत्तः पूत्कर्तुम् । चक्रिणाप्याहूय किं ते दुःखकारणमिति पृष्टः । तेनोक्तम् । देव ! अवन्तिदेशेऽश्वभद्रग्रामे वास्तव्योऽहम्। समये च प्रसूता मत्पत्नी पुत्रम् । अहं च तन्निमित्तं गतोऽन्यत्र ग्रामे द्रव्यार्जनाय यावदहं सधनः स्वमन्दिरमायातस्तावत्सर्पदष्टः स्वपुत्रो मया दृष्टः । ततः प्रवृत्तोऽहं कुलदेवतामाराधयितुम् । तयापि प्रत्यक्षीभूयः प्रोक्तम् । भो भो यत्र गृहे न कोऽपि कदापि विपन्नस्तस्माद् गृहाद् रक्षामानय । ततोऽहं जीवयामि ते पुत्रमिति । मया चान्यत्र रक्षामनाप्नुवता त्वमनुश्रित इति । ततश्चक्रिणा प्रोक्तम्– भो भोः परम्परया शोकपरिहारायोपदेश एवायं न पुनर्मृतस्य सञ्जीवनोपायः–

**अभूवन्नर्हन्तो, निरुपमतमज्ञाननिधय-**
**स्ततो विद्यामन्त्रौ-षधिरसचिकित्सागमविदः ।**
**परं मृत्पुत्राणां, किमपि न हि तैरप्यवगतं,**
**भवेच्चेत्तत्तेषां, किमिव हि दुरापं त्रिभुवने ।।९५।।** (शिखरिणी)

ततो मृते जने शोकोऽपि न समुचितो धैर्यमेवार्याणां प्रशस्यत इति । ततस्तेनोक्तम्– चक्रिंस्त्वयापि विधुरे विह्वलेन न भाव्यम् । तवापि षष्ठिसहस्राः सुता विपन्नाः ।।

अत्रान्तरे कृतसङ्केताः पूत्कुर्वन्तोऽधोमुखाः सन्तः सम्प्राप्ताः सामा[१]त्यादयः सैनिकाः।मूर्च्छितश्चक्री।शीताद्युपचारैः कृतः प्रवणः।प्रारब्धा चक्रिणः शोकमपनेतुं कथा।।

१ ०मन्त्रि० इति J टि०।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कस्मिन्नपि पुरे कोऽपि राजा । तस्मिन्नास्थानस्थे कोऽपीन्द्रजालोपजीवी पुमानायातः । कृतं तेन स्वशक्तिवल्गितम् । राज्ञा प्रोक्तम् । मतिभ्रंश एवायं मूर्तः-

**मांसास्थिमेदप्रमुखैकगेहे,**
**देहेऽङ्गिनां जङ्गमवत् श्मशाने ।**
**छन्ने त्वचा वस्त्विति यत्र बुद्धि-**
**स्तत्रापि किं स्यात् परमिन्द्रजालम् ।।९६।।** (उपेन्द्रवज्रा)

तद्गच्छ त्यागं[१] गृहीत्वेति । तेनोक्तम्- नाहं दायादः सभारञ्जनासमर्थो वेति। तथापि राज्ञा निष्कासितः । सोऽपि गत्वा किञ्चिदन्तरं विप्रवेषं कृत्वा पुनरागतः । प्रोक्तं तेन । राजन् ! नैमित्तिकोऽहम् । मन्निमित्तेन सप्तमेऽह्नि भूरेकाऽर्णवा भविष्यतीति । तत सभ्यैरुल्लुंण्ठ[२] इत्यवगणितः । राज्ञा च प्रत्ययः प्रमाणमित्युक्त्वावस्थापितः । तेन च स्वमन्त्रप्रभावात् सप्तमे दिने क्षणादेव दर्शिता वृष्टिः । प्रत्यक्षीकृतः पयःपूरः । सर्वतोऽपि प्लावयन् गृहाट्टादीनि[३] । किं बहुना राजसौधवलभी[४]मप्युल्लङ्घितुं प्रवृत्तं प्रदर्शितमम्भः । ततः ससम्भ्रमेण राज्ञा प्रजोपद्रवरक्षणासामर्थ्यवैराग्यादिव दातुमारब्धा झम्पा, धृतस्तेन हस्तेनोपवेशितः सिंहासने संहृत्य सर्वम् । देव ! तदिदं मदीयमिन्द्रजालं सर्वम् । ततो राज्ञा चिन्तितम् । धिगस्मान् परमार्थोपयोगशून्यानेवंविधैरपि ये वञ्च्यन्त इत्यनेनैव वैराग्येण पटान्तलग्नं तृणमिव राज्यादिकं त्यक्त्वा दानादिकं च दत्त्वा व्रतं गृहीतम् । ततश्चक्रिन् ! संसारे सर्वथा न मुह्यन्ति लघुकर्माणः प्राणिनस्ततो विमुञ्च शोकसङ्कुलतामिति।।

ततो मन्त्रिणा प्रारब्धा द्वितीया कथा । कस्मिंश्चित् पुरे कोऽपि राजा तस्मिन्नास्थानस्थे प्राग्वदिन्द्रजालिकेन प्रथममवज्ञातेन पश्चाद् विद्याधररूपं कृत्वा समागतेन विज्ञप्तो राजा । देव ! विद्याधरोऽहं मदीया च गृहिणीयम् । मम चान्येन विद्याधरेण सह वैरमुपस्थितम् । ततोऽहमनया सह न क्षमो गन्तुम् । न चान्यत्रेमां मोक्तुं शक्तो भवांश्च परनारीसहोदरो जितेन्द्रियश्च । ततः प्रसादं कृत्वा यावदहमागच्छामि

१ दानम्।। २ असत्यवादी।। ३ गृहप्रासादीन्।। ४ प्रासादोच्चभित्तिम०।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तावदियमात्मपार्श्वे स्थापयितव्येति । प्रतिपन्नं राज्ञा । तां मुक्त्वा गतः सः । क्षणान्तरे राजा शुश्राव हक्काम् । क्षणाच्च रत्नकङ्कणभूषितः पतितो भुजः । तदा च तदीयोऽयमित्युपलक्षितः । एवं क्षणात् पादः, क्षणेन द्वितीयो भुजः, क्षणेन द्वितीयः पादः, क्षणादेव शिरोऽपि पतितम् । ततस्तया राजानुज्ञापितो भर्तुरङ्गैरुत्सङ्गभृतैः सह साधितस्तया वह्निरह्नाय । यावच्छोकाकुलः सभायां समुपविष्टो राजास्ति । तावदाकाशात् फलकासिधरः स विद्याधरः समुत्तीर्णः । दत्त्वाशिषं राज्ञे । प्रार्थिता स्वभार्या। तेन ततो राज्ञा कथितं तत्स्वरूपम् । तेनापि तस्यैव राज्ञः पृष्ठभागे दर्शिता समुपविष्टा सा स्वभार्या । विस्मितो राजा । ततस्तेन संहृत्य सर्वम्, सोऽहमिन्द्रजालोपजीवी यो भवन्तमुपस्थित इति। सर्वं कथयित्वा क्षमितः स्वावज्ञां राजा । राज्ञापि चोक्तम् । साधु स्मारितोऽहं संसार एवेदृश इति । तस्मै त्यागं दत्त्वा महता प्रमोदेन प्रव्रजितः स राजा ।।

ततश्चक्रिणोऽपि गतः शोकः। तदानीं च गङ्गापयःप्लावरावाकरणायागता जानपदाः । चक्रिणापि पौत्रो भगीरथः समादिष्टस्तदुपशमनाय। तेनापि नागकुमारः समाराधितः। तदादेशाद् दण्डरत्नेन भुवं विदारयता कुरुमध्येन हस्तिनापुरं दक्षिणेन कोशलदेशं पश्चिमेन प्रयागमुत्तरेण काशीं दक्षिणेन विन्ध्यं दक्षिणेन मगधानुत्तरेण गङ्गा सागरे नीत्वा मुक्ता। ततः प्रभृति गङ्गासागर इत्युच्यते । भ्रातॄणां चास्थीनि गङ्गाप्रवाहेन समुद्रे नीतानि । ततोऽद्याऽप्यस्थीनि लोकस्तत्र निक्षिपतीति ।।

ततो निवृत्तो भगीरथः । पथि च केवलिनं महामुनिमेकमपश्यत् । वन्दित्वा पृष्टः सः । भगवन् ! केन कर्मणा मम पितरो युगपद् विपन्ना इति । ज्ञानी प्रोवाच। पुरा सङ्घस्तीर्थयात्रार्थं प्रचलितः । सन्ध्यायां प्रत्यन्तग्रामे समावासितः । सन्निहितेन च कुम्भकारेण कृतमातिथ्यं घासादिना । समृद्धोऽयं सङ्घ इति ग्रामलोकस्तल्लुण्टनाय मिलित्वा समायातः । कुम्भकारेण सर्वोऽपि निवारितः । तेन च लोकेन सङ्घाशातनया कर्म निकाचितमुपार्जितम् । कुम्भकारेण च शुभाश्रयं कर्मार्जितम् । एकदा स ग्रामः सबालवृद्धजनोऽपि चौरदोषात् सर्वोऽपि प्रज्वालितो राज्ञा । तस्मिंश्च दिने स

Jain Educationa International	For Personal and Private Use Only	www.jainelibrary.org

कुम्भकारोऽन्यत्र गत आसीत् । कालेन स मृत्वा विराटदेशे यक्षः समुत्पन्नः । ग्रामलोकोऽपि कर्मधर्मसंयोगात् तत्रैव सर्वः समुत्पन्नः । कालेन यक्षश्च्युत्वा तत्रैव राजा जातः । ततोऽपि मृत्वा देवो वैमानिको जातः । देवोऽपिच्युत्वा त्वं भगीरथः समुत्पन्नः । ते च ग्राम्या जह्नुप्रमुखाः सगरपुत्रा जाताः। मनसापि कृतेन सङ्घोपद्रवेण एवमनेकदुःखभाजो जायन्ते जन्तवः ।।

ततो मुनिं वन्दित्वानुज्ञाप्य गतः साकेते । मिलितश्चक्रवर्तिनः । तदानीमुद्यानपालकैरागत्य श्रीमदजितनाथः समवसृतोऽस्तीति चक्रिणो विज्ञप्तः । अर्द्धत्रयोदशस्वर्णकोटीं पारितोषिके दत्त्वा भगीरथादिपरिवारेण समं गतश्चक्री वन्दितुम्, वन्दित्वा समासीनः स्वस्थाने । प्रभुणापि कृता देशना–

**येषां जन्म सुखैकतानमनसा, प्राक्पुण्यनैपुण्यतो**
**याति स्फातिभृतो भवन्तु सुकृते, द्वित्रान् दिनांस्तेऽलसाः ।**
**नीराणामिव नीरधौ न हृदये, सङ्ख्यापि येषां पुन-**
**र्दुःखानां स्पृहयन्ति ते न हि कथं, धर्माय निर्मायकाः ।।९७।।**

(शार्दूलविक्रीडितम्)

इत्याकर्ण्य प्रतिबुद्धा सभा । चक्र्यपि प्रव्रज्यार्थं प्रभुमभ्यर्थ्य गृहे गतो दानादिविधिं विधातुम् । दत्त्वा यथेच्छमर्थिभ्यो धनादिकम् । भगीरथं च विन्यस्य राज्ये । भगीरथेनैव कृतनिष्क्रमणोत्सवः सामन्तामात्यादिभिः समं श्रीमदजितनाथ-पादान्ते प्रव्रजितश्चक्री । भगवता सहान्यत्र विजहार च । क्रमेण चोत्पन्नं तस्य केवलज्ञानम् ।।

प्रभोश्च सर्वपरिवारे पञ्चनवतिर्गणधराः । लक्षमेकं साधूनाम् । त्रिलक्षी त्रिंशत्सहस्री च साध्वीनाम् । सप्तशतान्विता त्रिसहस्री च चतुर्दशपूर्वभृताम् । सार्द्धचतुःशतीर्द्वादशसहस्री मनोविदाम् । चतुर्नवतिशती अवधिज्ञानिनाम् । द्वाविंशतिसहस्री केवलिनाम् । द्वादशसहस्री चतुःशती च वादिनाम् । विंशतिसहस्री चतुःशती च वैक्रियलब्धिमताम् । सहस्रद्वयोना त्रिलक्षी श्रावकाणाम् । पञ्चलक्षी

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पञ्चचत्वारिंशत्सहस्री च श्राविकाणाम् ।।

दीक्षादिनादेकाङ्गोने पूर्वलक्षे गत आसन्नमोक्षः प्रभुः साधुसहस्रेण समं सम्मेताद्रौ मासिकेनाऽनशनेनोद्ध्र्वस्थित एव चैत्रशुक्लपञ्चम्यां मृगशिरसि सिद्धिसुखभाग् बभूव । कौमारेऽष्टादशपूर्वलक्षी । राज्ये त्रिपञ्चाशत्पूर्वलक्षी । व्रताच्छद्मस्थत्वे द्वादशाब्दी । केवले पूर्वलक्षं द्वादशाब्द्या पूर्वाङ्गेण हीनम् । एवं द्वासप्ततिः पूर्वलक्षाः प्रभोः सगरचक्रिमुनेश्च सर्वायुः । श्रीऋषभदेवमोक्षात् सागरोपमाणां पञ्चाशत्कोटिलक्षेषु गतेषु श्रीअजितस्वामिमोक्षः । सगरचक्रिमुनिरपि सिद्धः । मोक्षमहिमा च प्राग्वत् ।।

**अजितजिनचरित्रमत्युदारं,**
**चरितमथो सगरस्य चक्रिणोऽपि ।**
**श्रवणयुगपवित्रतां विधत्ता,**
**द्वयमिव कुण्डलयोर्जनस्य शश्वत् ।।९८।।** (पुष्पिताग्रा)

## ।।श्रीसम्भवचरित्रम्।।

**श्रीसम्भवाय भवतां भवताज्जिनेन्द्रः,**
**श्रीसम्भवो भवमहोदधिवाडवाग्निः ।**
**यस्य प्रतापमहिमापरिवर्द्धमानः,**
**सत्त्वाधिकैरपि जलैर्गमितः शमं न ।।९९।।** (वसन्ततिलका)

धातकीखण्डद्वीप ऐरावतक्षेत्रे क्षेमायां पुर्यां विपुलवाहनो राजा जिनधर्ममयं राज्यं न्यायेन पालयति । तत्र चान्यदा प्रजानामभाग्यान्न वृष्टो मेघः । जातं दुर्भिक्षमतिघोरम् । ततो राजा प्रवृत्तश्चिन्तयितुम्—

**किमम्भोऽम्भोधीनां, सकलमपि कुम्भोद्भवमुनिः,**
**पपौ भूयोऽप्यौर्व-क्षुदधिकतया भस्म किमभूत् ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**गताः किं जीमूता, न खलु तदुपादातुमुत किं,**
**नृपैस्त्यक्ता नीति-र्ववृषुरधुना यत्र जलदाः ।।१००।।** (शिखरिणी)

अपि च–

**आहारो हारतुल्योऽद्य, रसापि विरसाऽभवत् ।**
**दुष्कालभीतवद् दानं, नष्टं करिकरादपि ।।१०१।।**

तथापि–

**सुभिक्षे सौस्थ्ये वा, सुकृतपरिपाकव्यसनिनः,**
**स्वशक्त्या भिक्षुभ्यः, कति न ददते दानमसमम्?।**
**विशेषाद् दुर्भिक्षा-दिषु यदशनाद्यैर्मुनिजनः,**
**सुखी मज्ञज्जैनं, प्रवचनमसौ रक्षति कृती ।।१०२।।** (शिखरिणी)

इति निश्चित्य राज्ञा सकलमपि दुष्कालं यावद्विशिष्टभोजनादिनाऽर्हद्वैयावृत्यादिना च सङ्घस्य समाधिं जनयता समुपार्जितं तीर्थकरनामकर्म । समये च समुल्लसितवैराग्येण गृहीतं व्रतम् । तप्तं तपः । विंशत्या च स्थानकैर्विशेषतः पोषितं प्रागुपात्तं तीर्थकरनामकर्म । स्वायुःप्रान्ते च समाधिना मृत्वाऽऽनतकल्पे जातो देवः।।

जम्बूद्वीपेऽपाग्भरतार्द्धे श्रावस्त्यां जितारिनृपः । सेनानामपट्टमहादेवी । फाल्गुनशुक्लाष्टम्यां मृगशीर्षे विपुलवाहनजीव आनताच्च्युत्वा सेनायाः कुक्षाववतीर्णः। दृष्टाश्च तया चतुर्दशमहास्वप्नाः । मार्गशुक्लचतुर्दश्यां मृगशीर्षे स्वर्णवर्णस्तुरगलाञ्छनश्चतुर्धनुशतोच्चः षष्ठिपूर्वलक्षायुः ज्ञानत्रयधरस्तीर्थकरः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् कृतो जितारिनृपेण । पुरे महानुत्सवः । गर्भस्थे च प्रभौ प्रभूतं सम्भूतं धान्यं सुखं च समस्तप्रजानाम् । ततः कृतं सम्भवः शम्भवश्चेति प्रभोर्नाम । प्राप्तः क्रमेण भगवान् यौवनम् । महामहेन कारितः पित्रा प्रधानराजपुत्र्याः पाणिग्रहम् । पञ्चदशपूर्वलक्षान्ते प्रभुं राज्ये न्यस्य प्रव्रजितो जितारिर्जातश्च स्वार्थसाधकः ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सपूर्वाङ्गचतुष्टयां चतुश्चत्वारिंशत्पूर्वलक्षीं राज्येऽतिवाह्य कृतसांवत्सरिकदानः षष्ठेन तपसा सहस्राम्रवणे गत्वा शक्रादिकृत निष्क्रमणोत्सवः श्रीसम्भवो मार्गशीर्षपूर्णिमायां मृगशीर्षे कृतपञ्चमुष्टिककेशोत्पाटः शक्रक्षिप्तदेवदूष्यधारी पश्चिमदिने राज्ञां सहस्रेण समं पश्चिमवयाश्चारित्रं प्रतिपन्नवान् । समुत्पन्नं मनःपर्ययज्ञानम् । शक्रोऽपि क्षीराब्धौ क्षिप्त्वा प्रभुकेशान् प्रभुं च प्रणम्य कृतनन्दीश्वरयात्रः प्राप्तः स्वं स्थानम् ।।

द्वितीयदिने च तत्रैव सुरेन्द्रदत्तनृपगृहे प्रभुश्चकार पारणं परमान्नेन । पञ्चदिव्यानि तत्राविर्भूतानि । ततः परं चतुर्दशवर्षाणि प्रभुरप्यन्यत्र विहृत्य पुनः सहस्राम्रवणमायातः । सालतरुतलस्थस्य च प्रभोः पूर्वाह्णे कृतषष्ठस्य कार्तिककृष्णपञ्चम्यां मृगशीर्षे घातिकर्मक्षयादुत्पन्नं केवलज्ञानम् । प्राग्वत् समवसरणादिकम् । सम्प्राप्ताः शक्रादयः । कृता प्रभुणा देशना—

**अर्थार्थे घटयन्नुपायपदवीं, नापेक्षते प्रेरकम्,**
**कामार्थे विनिवारितोऽपि सुजनै-र्निःशृङ्खलं खेलति ।**
**धर्मार्थे गुरुभिः पुनः प्रतिपदं, प्रोत्साहितोऽप्यर्थितो-**
**ऽप्याक्रुष्टोऽपि न चेष्टते सकृदपि, प्राणी कुकर्मावृतः ।।१०३।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य प्रतिबुद्धाः प्राज्याः प्राणिनः केऽपि प्रवव्रजुः । केऽपि सम्यक्त्वादिकं च जगृहुः । द्व्यधिकशतं गणधराश्च स्थापिताः । प्रभुतीर्थे च त्रिमुखो यक्षः । स च त्रिनेत्रः श्यामो बर्हिवाहनो नकुलिगदाभृदभयददक्षिणदोस्त्रयो मातुलिङ्गनागाक्षसूत्रिवामभुजत्रितयः । दुरितारिश्च शासनदेवता । सा च गौराङ्गी मेषवाहना वरदाक्षसूत्रिदक्षिणदोर्द्वयाऽभयदफणिवामबाहुः ।।

सर्वपरिवारे च प्रभोर्द्विलक्षी साधूनाम् । त्रिलक्षी षट्त्रिंशत्सहस्री च साध्वीनाम्। सार्द्धैकविंशतिशती चतुर्दशपूर्विणाम् । षण्णवतिशती अवधिज्ञानिनाम् । द्वादशसहस्राः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सार्द्धं च शतं मनःपर्ययिणाम् । पञ्चदशसहस्री केवलिनाम् । अष्टादशशती वैक्रियलब्धिमताम् । द्वादशसहस्री वादिनाम् । सप्तसहस्रोना त्रिलक्षी श्रावकाणाम्। सषट्त्रिंशत्सहस्री षड्लक्षी श्राविकाणाम् ।।

आसन्नमोक्षश्च प्रभुर्मुनिसहस्रेण समं सम्मेतशैले मासिकेनानशनेनोर्ध्वस्थ एव चैत्रसितपञ्चम्यां मृगशीर्षे सिद्धिसौख्यभाग् बभूव । कौमारे पञ्चदशपूर्वलक्षाः । राज्ये सपूर्वाङ्गचतुष्टयाश्चतुश्चत्वारिंशत्पूर्वलक्षाः । व्रते चतुःपूर्वाङ्गहीनं पूर्वलक्षम्। एवं षष्टिपूर्वलक्षाणि प्रभोः सर्वायुः । अजितस्वामिमोक्षात् सागरोपमाणां त्रिंशति कोटिलक्षेषु गतेषु श्रीसम्भवमोक्षः । मोक्षमहिमा प्राग्वत् ।।

**सद्वृत्तं शुभबीजमुज्ज्वलगुण-ग्रामाभिरामं सदा,**
**यस्यास्ते हृदि लग्नमेव चरितं, श्रीसम्भवस्याद्भुतम्।**
**तुम्बीनां फलजालवन्निरवधौ, संसारसिन्धौ क्रीडन्,**
**प्राप्नोत्येव परं स पारमपरि-स्पृष्टश्च चित्रञ्जलैः ।।१०४।।**
(शार्दूलविक्रीडितम्)

## ।।श्रीअभिनन्दनचरित्रम्।।

**यज्जन्ममज्जनजलेऽनिमिषैस्तरद्भि-**
**रद्भिर्महानिमिषभङ्गिरभङ्गुराप्ता ।**
**देवः सुरासुरशिरोमणितामुपेत-**
**श्चेतः पुनातु स सतामभिनन्दनोऽर्हन् ।।१०५।।**(वसन्ततिलका)

जम्बूद्वीपे प्राग्विदेहे मङ्गलावतीविजये रत्नसञ्चयायां पुर्यां महाबलो राजा । कुलक्रमागतं जिनधर्मं परिपालयत्येकदास्मिन्नाऽऽस्थानस्थे नटैर्नर्तितुमारब्धं नाटकम्। चिन्तितं तदालोकयता राज्ञा—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**चिरतरनृपमन्त्रि-श्रेष्ठिरूपानुकारात्,**
**सदसि तदविभेदाद् दर्शयन् संहरंश्च ।**
**नवनवधृतवेषः, सैष शैलूषवर्गः[१]**
**स्मरयति तदवस्थं, संसृतेर्मे स्वरूपम् ।।१०६।।**(मालिनी)

इत्यादि पठन् विरक्तः सहसैव विमुच्य राज्यं प्राव्राजीत्। कृतोग्रतपश्चरणोऽर्हद्भक्त्यादिस्थानकैरर्हन्नामकर्म समुपार्ज्य पर्यन्तेऽनशनेन मृत्वा विजयविमाने देवो जातः ।।

जम्बूद्वीपेऽयोध्यायां संवरो राजा सिद्धार्था पट्टराज्ञी । वैशाखसितचतुर्थ्यामभीचिनक्षत्रे विजयविमानाच्च्युत्वा महाबलजीवः सिद्धार्थायाः कुक्षाववतीर्णः । दृष्टास्तया चतुर्दशमहास्वप्नाः। माघशुक्लद्वितीयायामभीचौ स्वर्णवर्णो वानरलाञ्छनः सार्द्धशतत्रयधनूच्चः पञ्चाशत्पूर्वलक्षायुः ज्ञानत्रयधरस्तीर्थकरो जातः पुत्रः। जन्मोत्सवश्च प्राग्वत्। राज्ञापि कारितो महामहोत्सवः। गर्भस्थे प्रभौ कुलं राज्यं पुरी लक्ष्मीः सर्वमप्यभ्यनन्दत्। ततः पितृभ्यामभिनन्दन इति कृतं नाम। प्राप्ततारुण्यश्च पितृभ्यां परिणायितः प्रधानराजपुत्रीम्। द्वादशपूर्वलक्षान्ते चाभिषिक्तः पित्रा स्वे राज्ये। अष्टपूर्वाङ्गसंयुतानि सार्द्धानि षट्त्रिंशत्पूर्वलक्षाणि यावद् राज्यं प्रपाल्य सांवत्सरिकं दानं दत्त्वा शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा कृतषष्ठो माघशुक्लद्वादश्यामभीचौ पश्चिमेऽह्नि वयसि च प्रभुर्विमुक्तालङ्कारः पञ्चभिर्मुष्टिभिः कृतकेशोत्पाटो राज्ञां सहस्रेण समं सर्वं सावद्यं मया निषिद्धमिति चारित्रं प्रतिपन्नवान्। प्रभुशिरश्चिकुरांश्च शक्रः क्षीरार्णवे निक्षिप्य प्रभुं नत्वा नन्दीश्वरे च यात्रां कृत्वा गतः स्वं स्थानम् । प्रभुरपि द्वितीयेऽह्नीन्द्रदत्तनृपगृहे परमान्नेन पारणं चक्रे । पञ्चदिव्यानि तत्राविर्भूतानि ।।

प्रभुरप्यष्टादशवर्षाण्यन्यत्र विहृत्य पौषशुक्लचतुर्दश्यामभीचौ सहस्राम्रवणमागतः। कृतषष्ठस्य प्रियालतरुतले प्रतिमास्थस्य पूर्वाह्णे घातिकर्मक्षयादुत्पन्नं केवलज्ञानम्।

१ नर्तकवर्गः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा देशना–

**दृष्ट्वान्यान् धनपुत्रमित्रमुदितान्, क्लीबः समुत्कण्ठते,**
**जीवस्तल्ललिताय सद्व्यवहृति-र्धर्माय नोष्मायते।**
**चिन्तारत्ननिधानवादविवर-स्पर्शोपलाद्याशया,**
**देशाद् देशमपेशलेन विधिना, भ्राम्यत्यसौ केवलम् ।।१०७।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य प्रतिबोधं प्राप्य प्रभूताः प्राणिनः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकम्। वज्रनाभप्रमुखाश्च प्रभुणा षोडशाधिकं शतं स्थापिता गणभृतः । प्रभुतीर्थे च श्यामो यक्षः स च गजस्थो मातुलिङ्गाक्षसूत्रदक्षिणदोर्द्वयो नकुलाङ्कुशभृद्वामभुजद्वयः। कालिका शासनदेवी। सा च श्यामा वरदपाशिदक्षिणद्विभुजा नागाङ्कुशभृद्वामभुजयुग्मा।।

प्रभोश्च सर्वपरिवारे त्रिलक्षी साधूनाम्, सत्रिंशत्सहस्री षड्लक्षी साध्वीनाम्, अष्टानवतिशती अवधिज्ञानिनाम्, पञ्चदशशती चतुर्दशपूर्विणाम्, ससार्द्धषट्शती एकादशसहस्री मनःपर्ययिणाम्, चतुर्दशसहस्री केवलिनाम्, एकोनविंशतिसहस्री वैक्रियलब्धिमताम्, एकादशसहस्री वादिनाम्, साष्टाशीतिसहस्री द्विलक्षी श्रावकाणाम्, ससप्तविंशतिसहस्री पञ्चलक्षी श्राविकाणाम् ।।

आसन्नमोक्षश्च प्रभुर्मुनिसहस्रेण समं सम्मेताद्रौ गत्वा मासिकेनाऽनशनेनोर्ध्वस्थित एव वैशाखसिताष्टम्यां पुष्ये क्षीणाशेषकर्मा मोक्षसुखमग्नो बभूव । कौमारे पूर्वाणां सार्द्धा द्वादशलक्षाः । राज्येऽष्टपूर्वाङ्गयुताः सार्द्धाश्च षट्त्रिंशत्पूर्वलक्षाः । व्रतेऽष्टपूर्वाङ्गोनं पूर्वलक्षम् । एवं पञ्चाशत्पूर्वलक्षाः प्रभोः सर्वायुः । श्रीसम्भवमोक्षात् सागरोपमाणां दशसु कोटिलक्षेषु गतेष्वभिनन्दनजिनमोक्षः मोक्षमहिमा च प्राग्वत्।।

**येषामिदं जिनपतेरभिनन्दनस्य,**
**हृद्याश्रयं भजति कौस्तुभवच्चरित्रम् ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**दूरे न तस्य पुरुषोत्तमता तदीय-**
**मोजोऽपि दुर्नरकभेदसमर्थमेव ।।१०८।।** (वसन्ततिलका)

## ।।श्रीसुमतिनाथचरित्रम्।।

**तीर्थङ्करस्य सुमतेः सुमते रमन्ताम्,**
**सन्तो विमुच्य मतमन्यतमं समन्तात् ।**
**यस्याज्ञया कवचितात् कृतिनोऽल्पयापि,**
**नैवोपसर्पति कदाचन मोहसर्पः।।१०९।।** (वसन्ततिलका)

जम्बूद्वीपे प्राग्विदेहे पुष्कलावतीविजये शङ्खपुरे विजयसेनो राजा। सुदर्शना प्रीतिपात्रं कलत्रम् । एकदा वसन्तलक्ष्मीविलोकनाय गतौ दम्पती बाह्योद्यानम् । यावच्च रम्यतां प्रति तरून् विलोकयन्तौ स्तस्तावदेकत्र पत्रलतरुतलसमासीना काचिदिभ्यगृहिण्यष्टाभिः प्रधानवधूभिरुपास्यमानचरणकमला सुखं विलसन्ती तयोरागता दृग्गोचरम् । ततोऽसञ्जायमानसुतोत्पत्तिखिन्नया सुदर्शनादेव्या विज्ञप्तः सकरुणं राजा । देव ! किं मम भवत्प्रसादेन राज्येन श्रिया वा ?, यतो मेऽनपत्याया नैकाप्येवंविधा वधूः पर्युपास्तिविधायिनी । किं च–

**उच्छिद्यते प्रणयिनां सकलापि वाञ्छा,**
**धर्मक्रमः कुलगतोऽक्रमतो व्यपैति ।**
**शून्यत्वमेति सदनं सुतमन्तरेण,**
**विश्वं सदप्यसदिवैव विना दिनेशम् ।।११०।।**(वसन्ततिलका)

इत्याद्युक्त्वाऽधोमुखी बभूव । ततो राज्ञापि बाष्पमन्तर्निरुध्य प्रोक्तम् । देवि! सत्यमेवेदम्–

**शून्यानि यानि धवलान्यपि मन्दिराणि,**
**याः काञ्चनोत्पलदृशो विहितप्रवासाः ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**देवालयाः क्षणदिनेऽप्यमहोत्सवा ये,**

**तत्सर्वमेतदभवत् पुरुषैर्विनाऽत्र ।।१११।।** (वसन्ततिलका)

तदवश्यं करिष्यामि तदर्थं प्रयत्नान्तरम्। इत्यभिधाय सहसैव राज्यादिचिन्तास्वमात्यादीन्नियुज्य नियमितेन्द्रियो महानुष्ठानेन कुलदेवीं समाराधयितुं प्रवृत्तः । भक्त्यतिशयेन च देवी प्रत्यक्षीभूय प्रोवाच । वत्स ! पुत्रार्थे कष्टानुष्ठानमनुष्ठितवान् भवान्, युक्तमेवैतत् परं कोऽपि पुण्यात्मैव पुत्रः पित्रोः सुखनिमित्तमुत्पद्यते । किञ्च-

**पुत्रः कस्य न वल्लभो जनयितु-र्जातो जडात्मा पुनः,**

**कश्चिच्छुक्तिपुटस्य मौक्तिकमिवा-नर्थाय सञ्जायते ।**

**कोऽपि श्लाघ्यकलः स्वभावविमलः, पुण्यैरगण्यैः पितुः,**

**वृद्धेरेव निमित्तमभ्युदयते, रत्नाकरस्येन्दुवत् ।।११२।।** (शार्दूलविक्रीडितम्)

भविष्यति च तेऽत्युत्तमः पुत्र इत्युक्त्वा तिरोदधे देवी।

राजापि प्रहृष्टमनाः प्रणम्य देवीं समायातः स्वस्थाने । निवेद्य च सुदर्शनायाः पत्न्याः प्रवृत्तो धर्मार्थादिषु । समये च सिंहस्वप्नसूचितो जातः पवित्रः पुत्रः । कृतः पुर्यां महोत्सवः पित्रा । दत्तं च पुरुषसिंह इति तस्य नाम । प्राप्तोऽसौ यौवनं कलाकलापं। च विवाहितोऽष्टौ राजपुत्रीः पित्रा । एकदा गतः कुमारः क्रीडोद्यानम्। दृष्टस्तत्र महाज्ञानी विनयनन्दनो नाम सूरिः । गतस्तं वन्दितुम् । कृता तेन देशना-

**येऽमी कामाः, सुखमिति जडै-र्लम्भिताः ख्यातिमग्र्यां,**

**व्याधेः पथ्या-दिकमिव सुखं, तत्त्ववृत्त्या न हीमे ।**

**सौख्यं लोको-त्तरमपरमेवास्ति यस्याग्रतस्तत्**

**स्वर्लोकस्या-प्यमृतमनृतं, शक्रभोगश्च रोगः ।।११३।।**(मन्दाक्रान्ता)

इत्याकर्ण्य विरक्तश्चित्तेऽनिच्छन्तावपि पितरावनुज्ञाप्य ताभ्यामेव कृतनिःक्रमणोत्सवः कुमारश्चकार व्रतग्रहणम् । निरतिचारं पालयन्नर्हद्भक्त्यादिस्थानकै-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्तीर्थकरनामकर्मोपार्जितवान् । अन्ते चानशनेन मृत्वा वैजयन्तविमाने देवो जातः।।

जम्बूद्वीपे भरतक्षेत्रे विनीतायां मेघो राजा। मङ्गला नाम पट्टराज्ञी। श्रावणशुक्ल-द्वितीयायां वैजयन्तविमानात् पुरुषसिंहश्च्युत्वा चतुर्दशस्वप्नसूचिततीर्थकरजन्मा तस्याः कुक्षाववतीर्णः ।।

इतश्च सदृशभार्याद्वयः कश्चिद्वणिग्वाणिज्ये गतः । गतमात्रस्य च तस्या एका भार्या प्रसूता पुत्रम् । पिता च कृत्वा वाणिज्यमायातमात्रो मृतः । क्रयाणकानां विक्रयादिकं गृहिणीभ्यां कृतम् । शिशुश्च द्वयोरपि जनन्योरन्तरं किमपि न वेत्ति । ततस्तयोर्द्वयोरपि जनन्योरन्योन्यं सुतधनव्यतिकरे विवादो जातः । केनापि च न निर्द्धारितस्ततो विनीतायाः मेघराजसमीपे द्वेऽप्याजग्मतुः । सामात्येनाऽपि राज्ञा न पारितोऽसौ निर्णेतुम् । ज्ञातवृत्तान्तया च सुमङ्गलया देव्या प्रोक्तम् । देवाहं निर्णेष्यामीति । ततो राजा धर्माधिकरणासने देवीमुपवेश्य विज्ञापिते ते वणिग्गृहिण्यौ। देव्याऽप्युक्तम् । वत्से! ममोदरे ज्ञानत्रयधरस्तीर्थकरदेवोऽवतीर्णोऽस्ति यावच्च तस्य जन्मोत्सवो भवति तावद्युवाभ्यां विलम्बनीयम्। जातः सन्नयमेव युवयोर्निर्णयं दास्यतीति। प्रतिपन्नमिदं विमात्रा । पुत्रमात्रा च पुत्रस्नेहविधुरया नाऽङ्गीकृतम् । तत सुमङ्गलया देव्या प्रोक्तम् । या स्वपुत्रविरहकातरा न विलम्बते, पुत्रं धनं च संशये न पातयति, तस्या एव पुत्रो धनं चेति । इति च निर्णये कृते रञ्जितः सर्वोऽपि सामात्यश्च राजा। वितर्कितवान् नूनं गर्भानुभावोऽयमिति । पुत्रं गृहसारं च स्वीकृत्य गता पुत्रमाता स्वस्थानम्।।

इतश्च नवसु मासेष्वर्द्धाष्टमेषु च दिनेष्वतिक्रान्तेषु वैशाखशुक्लाष्टम्यां मघानक्षत्रे स्वर्णवर्णः क्रौचाङ्कः कार्मुकशतत्रयोच्चश्चत्वारिंशत्पूर्वलक्षायुर्ज्ञानत्रयधरः सर्वाद्भुतलक्षणो-पेतस्तीर्थकरः पुत्रो जातः । जन्मोत्सवादिकं च प्राग्वत् । गर्भस्थे च प्रभौ मातुः शोभना मतिरभूदित्यालोच्य राज्ञा सुमतिरिति प्रभोः कृतं नाम । प्राप्ततारुण्यश्च पित्रा परिणायितः पार्थिवकन्याम् । जन्मकालाद् दशसु पूर्वलक्षेषु गतेषु पित्रा प्रभुरभिषिक्तो राज्ये । स्वयं च मेघनृपः स्वार्थसाधको जातः । द्वादशपूर्वाङ्ग सहितैकोनत्रिंशत्पूर्वलक्षाणि राज्यं प्रपाल्य प्रभुः सांवत्सरिकं दानं दत्त्वा नित्यभक्तपरः शक्रादिकृतनिष्क्रमणोत्सवः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सहस्राम्रवणे गत्वा वैशाखशुक्लनवम्यां मघासु पूर्वाह्ने नृपसहस्रेण समं पञ्चभिर्मुष्टिभिरुत्खातकुन्तलोऽन्त्यवयाः शक्रन्यस्तदेवदूष्यधारी सर्वं सावद्यं मया प्रतिषिद्धमिति चारित्रं प्रतिपन्नवान् । उत्पन्नं प्रभोर्मनःपर्ययज्ञानम् । शक्रादयश्च प्रभुकेशान् प्रक्षिप्य क्षीराब्धौ कृत्वा नन्दीश्वरयात्रां गताः स्वं स्वं स्थानम् । द्वितीयेऽह्नि च विजयपुरे पद्मनृपगृहे परमान्नेन चकार प्रभुः पारणम् । पञ्चदिव्यानि तत्राविर्भूतानि।।

विंशतिवर्षाणि यावदन्यत्र विहृत्य पुनरायातः स्वामी सहस्राम्रवणे । कृतषष्ठस्य च प्रियङ्गुतरुतले पूर्वाह्ने चैत्रशुक्लैकादश्यां मघासु प्रभोरुत्पन्नं केवलज्ञानम्। समवसरणादिकं च प्राग्वत् । सम्प्राप्ताः शक्रादयः । कृता प्रभुणा देशना–

**केऽपि क्षिपन्ति वपुरप्यकृशे कृशानौ,**
**भिन्दन्ति केचिददयं हृदयं च शस्त्रैः ।**
**वैराग्यतोऽपि गतभाग्यतमाः शमाय,**
**रुद्धेन्द्रियास्तपसि नैव धुरं धरन्ति ।।११४।।** (वसन्ततिलका)

इत्याद्याकर्ण्य प्रवव्रजुर्जगृहुश्च सम्यक्त्वाद्यं प्रभूताः प्राणिनः । स्थापिताश्च चमरप्रमुखाः शतं गणधराः । प्रभुतीर्थे च तुम्बरुर्यक्षः । स च गौरस्तार्क्ष्यवाहनो वरदशक्तिभृद्दक्षिणद्विभुजो गदापाशिवामभुजयुगः । महाकाली शासनदेवता । सा च स्वर्णवर्णा पद्मवाहना वरदपाशिदक्षिणद्विभुजा मातुलिङ्गाङ्कुशिवामभुजयुगा ।

प्रभोश्च सर्वपरिवारे साधूनां त्रिलक्षी विंशतिश्च सहस्राः । साध्वीनां पञ्चलक्षी त्रिंशच्च सहस्राः । चतुर्दशपूर्विणां चतुर्विंशतिशती । अवधिज्ञानिनामेकादशसहस्री। मनोज्ञानिनां वादिनां च चतुर्दशसहस्री सार्द्धचतुःशती च । केवलिनां त्रयोदशसहस्री। वैक्रियलब्धिमतामष्टादशसहस्री चतुःशती च । श्रावकाणां द्विलक्ष्येकाशीतिसहस्री च । श्राविकाणां पञ्चलक्षी षोडशसहस्री च।।

द्वादशपूर्वाङ्गरहितं छाद्मस्थ्यसत्कविंशत्यब्दीहीनं पूर्वलक्षमेकं केवलिपर्यायः। आसन्नमोक्षश्च प्रभुर्मुनिसहस्रेण समं सम्मेताद्रौ गत्वा मासमनशनेनोर्ध्व एव स्थितः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

क्षीणभवोपग्राहिकर्मा चैत्रशुक्लनवम्यां पुनर्वस्वोर्मोक्षसुखमग्नोऽभवत् । कौमारे दशपूर्वलक्षाः । राज्ये द्वादशपूर्वाङ्गयुता एकोनत्रिंशत्पूर्वलक्षाः । व्रते द्वादशपूर्वाङ्गन्यूनं पूर्वलक्षम् । एवं चत्वारिंशत्पूर्वलक्षाः प्रभोः सर्वायुः । अभिनन्दनमोक्षात् सागरोपमाणां कोटिलक्षेषु नवसु गतेषु श्रीसुमतिनाथस्य मोक्षः । मोक्षमहिमा च प्राग्वत् ।।

**सुमतिजिनचरित्रतार्क्ष(क्ष्य)मन्त्रं,**
**प्रतिहतमोहमहाविषप्रचारम् ।**
**हृदि वहति कृतादरो नरो य-**
**स्त्रुटति हि तस्य कुवासनागपाशः[१]** ।।११५।। (पुष्पिताग्रा)

## ।।श्रीपद्मप्रभचरित्रम्।।

**यज्जन्मनि प्रमुदितं हृदये दयाद्रै-**
**र्धर्मेण यस्य वपुषा सह सम्प्रवृद्धम् ।**
**यद्दीक्षया शिवपुरे रचिताः पताकाः**
**पद्मप्रभः प्रददतां प्रभुतां सतां सः** ।।११६।। (वसन्ततिलका)

धातकीखण्डद्वीपे प्राग्विदेहे वत्सविजये सुसीमायां पूर्यामपराजितो राजा राज्यं पालयन्नेकदा वर्षासु वर्षत्यूर्जिततरं पर्जन्ये पटलान्तपतज्जलधाराभिरुत्पद्योत्पद्य[२] विनश्यतो जलबिन्दून् विलोक्य चिन्तयामास—

**अत्युज्ज्वलप्रकृतयः सहसैव वृद्धिं,**
**लोकोत्तरामधिगतास्तरलस्वभावाः ।**
**वर्षोपजन्यजलबुद्बुदभङ्गिभाजः,**
**कालं चिरंस्थितिभृतो न नरा भवन्ति** ।।११७।।(वसन्ततिलका)

१ कुवासनानागपाशः।। २ 'छापरुं' इति भाषा।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादि भावयन् विरक्तः संसारात् उत्सृज्य राज्यं जग्राह प्रव्रज्याम् । प्रपाल्य चिरमर्हद्भक्त्यादिस्थानकैश्च तीर्थकृन्नामकर्मोपार्ज्य समाधिना मृत्वा नवमे ग्रैवेयके देवो जातः ।।

जम्बूद्वीपे भरतक्षेत्रे कौशाम्ब्यां धरो राजा। सुसीमा तस्य पट्टराज्ञी । अपराजितजीवो नवमाद् ग्रैवेयकाच्च्युत्वा माघकृष्णषष्ट्यां चित्रानक्षत्रे चतुर्दशस्वप्नसूचिततीर्थकरजन्मा तस्याः कुक्षाववतीर्णः । कार्तिककृष्णद्वादश्यां चित्रायां रक्तवर्णः पद्मलाञ्छनः सार्द्धशतद्वयधनुर्मानस्त्रिंशत्पूर्वलक्षायुर्ज्ञानत्रयधरः सर्वलक्षणसम्पूर्णः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । पित्रा कारितो नगरे महानुत्सवः । गर्भस्थे प्रभौ जनन्याः पद्मशय्यायां जातो दोहद इति पितृभ्यां कृतं पद्मप्रभ इति नाम । प्राप्ततारुण्यश्च कारितः पितृभ्यां पाणिग्रहणम् । जन्मतः पूर्वलक्षेषु सार्द्धेषु सप्तसु गतेषु राज्येऽभिषिक्तः पित्रा । स्वयं च धरनृपः स्वार्थसाधको जातः ।।

पूर्वलक्षाणामेकविंशतिं सार्द्धां षोडशपूर्वाङ्गानि च राज्यं प्रपाल्य प्रभुः सांवत्सरिकं दानं दत्त्वा कृतषष्ठः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा कार्तिककृष्णत्रयोदश्यां चित्रायामपराह्णे राज्ञां सहस्रेण समं कृतपञ्चमुष्टिककेशोत्पाटः शक्रन्यस्तदेवदूष्यभृत् सर्वं सावद्यं मया निषिद्धमिति चारित्रं पश्चिमवयाः प्रपेदे । उत्पन्नं मनःपर्ययज्ञानम् । क्षिप्त्वा क्षीराब्धौ प्रभुकेशान्, प्रणम्य प्रभुम्, कृत्वा च नन्दीश्वरे यात्राम्, प्राप्तः स्वं स्थानं शक्रः । प्रभुरपि द्वितीयदिने ब्रह्मस्थनगरे गत्वा सोमदेवनृपगृहे परमान्नेन पारणं चकार । विजहार चाऽन्यत्र । पञ्चदिव्यानि च तत्राऽविर्भूतानि।।

षण्मासान्यावदन्यत्र विहृत्य पुनरेव सहस्राम्रवणे समेत्य षष्ठेन तपसा वटतरुतलस्थस्य पूर्वाह्णे प्रभोश्चैत्रपूर्णिमायां चित्रानक्षत्रे केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा देशना—

**सविनयास्तनया दयिता हिता**
**नयभवो विभवोऽनुगुणा नु गुणाः ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**वपुरनाधि समाधिरतिर्नृणां,**

**शुभतरोः प्रथमेऽङ्कुरका इमे ।।११८।।** (द्रुतविलम्बितम्)

इत्याद्याकर्ण्य प्रतिबुद्धाः प्राणिनो बहवः प्रव्रजिताः सम्यक्त्वादिकं च गृहीतवन्तः । स्थापिताः सुव्रतादयः सप्तोत्तरं शतं गणभृतः । प्रभुतीर्थे च कुसुमो यक्षः । स च श्यामो मृगवाहनोऽभयदफलभृद्दक्षिणद्विभुजो नकुलाक्षसूत्रिवामदोर्द्वयः। अच्युता शासनदेवी । सा च श्यामा नृस्था वरदबाणभृद्दक्षिणद्विभुजाऽभयद-धनुष्मद्वामभुजयुगा।।

प्रभोश्च सर्वपरिवारे त्रिलक्षी त्रिंशत्सहस्री च साधूनाम् । सविंशतिसहस्री चतुर्लक्षी साध्वीनाम् । त्रयोविंशतिशती चतुर्दशपूर्विणाम् । दशसहस्र्यवधिज्ञानिनाम्। दशसहस्री त्रिशती च मनोज्ञानिनाम् । द्वादशसहस्री केवलिनाम् । साष्टोत्तरशता षोडशसहस्री वैक्रियलब्धिमताम् । सषट्शती नवसहस्री वादिनाम् । ससप्ततिसहस्री द्विलक्षी श्रावकाणाम् । सपञ्चसहस्री पञ्चलक्षी च श्राविकाणाम्।।

षण्मास्या षोडशाब्द्या चोनं पूर्वलक्षं केवलिपर्यायं विहृत्याऽऽसन्नमोक्षः प्रभुः साधूनां त्र्यधिकैरष्टभिः शतैः समं सम्मेताद्रौ गत्वा मासमनशन्यूर्ध्वस्थ एव मार्गशीर्षे कृष्णैकादश्यां चित्रायां क्षीणाशेषकर्मा शर्माद्वैतं पदं प्राप्तः। कौमारे सार्द्धासप्तपूर्वलक्षी। राज्ये पूर्वलक्षाणां सार्द्धैकविंशतिः षोडशपूर्वाङ्गाणि च। व्रते पूर्वलक्षमेकं षोडश पूर्वाङ्गहीनम् । एवं त्रिंशत्पूर्वलक्षाणि प्रभोः सर्वायुः । सुमतिस्वामिमोक्षात् सागरोपमकोटीनां नवतिसहस्र्यां गतायां श्रीपद्मप्रभमोक्षः । मोक्षमहिमा च प्राग्वत्।।

**सद्वृत्तवित्तमुक्ता-भिरामगुणधामनायकपवित्रम् ।**

**पद्मप्रभस्य चरितं हार इवास्तां सतां कण्ठे ।।११९।।** (आर्या)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ।।श्रीसुपार्श्वचरित्रम्।।

**स्वःसम्पदां प्रतिभुवः सुकृताङ्कुराणां,**
**बीजानि धार्मिकवणिग्जनमूलनीव्यः।**
**अग्रेसराः शिवपुरीं प्रतिगन्तुमिच्छोः,**
**सन्तु श्रिये तव सुपार्श्वपदोः प्रणामाः।।१२०।।** (वसन्ततिलका)

धातकीखण्डद्वीपे प्राग्विदेहे रमणीयविजये क्षेमायां पुर्यां नन्दिषेणो राजा राज्यं पालयति । स चैकदा साधूपाश्रयान्निशायां प्रतिक्रम्य चलितः । स्वावासमागच्छंश्च युवतिभिः सममश्लीलानि भाषमाणं वृद्धमेकं पुमांसं शुश्राव । ततोऽनुचितमिति कृत्वा प्रवृत्तश्चिन्तयितुम्—

**गात्रं पात्रं वलीनां, शिरसि शिरसिजाः, काशकर्पासभासः,**
**कर्णावभ्यर्णभाजा-मपि न कलयतो, जल्पमल्पस्वरोक्तम्।**
**कम्प्रौ पाणी न वाणी, स्फुरति पटुरुरो, भङ्गुरं श्वास आस्ये,**
**दास्ये वर्तन्त एते, तदपि मृगदृशां, यातयामाः किमन्धाः ?।।१२१।।**
(स्रग्धरा)

इत्यादिभावनया प्रवर्धमानवैराग्यः सहसैवोत्सृज्य राज्यं प्रव्रजितः । तपश्चोग्रतरं तप्यमानोऽर्हद्भक्त्यादिस्थानकैस्तीर्थकरनामकर्मोपार्ज्य समाधिना च मृत्वा षष्ठे ग्रैवेयके देवो जातः।।

जम्बूद्वीपे भरतक्षेत्रे वाराणस्यां प्रतिष्ठो राजा। पृथ्वीनाम्ना पट्टराज्ञी । भाद्रपदकृष्णाष्टम्यामनुराधायां षष्ठग्रैवेयकान्नन्दिषेणनृपजीवश्च्युत्वा चतुर्दशस्वप्नसूचित तीर्थकरजन्मा पृथ्व्याः कुक्षाववतीर्णः। ज्येष्ठशुक्लद्वादश्यां विशाखायां स्वर्णवर्णः स्वस्तिकाङ्कः कार्मुकशतद्वयोच्चो विंशतिपूर्वलक्षायुष्को ज्ञानत्रयधरः सर्वलक्षण-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सम्पूर्णस्तीर्थकरः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । कारितः पुरे पित्रा महानुत्सवः। गर्भस्थे प्रभौ विशेषतो जननी शोभनपार्श्वा जाता । ततः कृतं प्रभोः सुपार्श्व इति नाम । तथा गर्भस्थ एव प्रभो जनन्याः स्वप्न एकफणे पञ्चफणे नवफणे च नागतल्पे स्वं सुप्तं दृष्टम् । ततः प्रभोरप्युपर्येतत्सङ्ख्याः फणाः क्रियन्ते । प्राप्तयौवनश्चाऽनिच्छन्नपि कारितः पित्रा राजकन्यायाः पाणिग्रहोत्सवम् । कौमारे च पञ्चसु पूर्वलक्षेषु गतेषु पित्रा निवेशितो राज्ये। स्वयं च स्वार्थसाधको जातः पिता ।।

राज्ये च विंशतिपूर्वाङ्गसहितां चतुर्दशपूर्वलक्षीमतिवाह्य सांवत्सरिकं दानं दत्त्वा कृतषष्ठः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा पञ्चभिर्मुष्टिभिः शिरसिजानुद्धृत्य शक्रन्यस्तदेवदूष्यधारी प्रभुर्नृपसहस्रेण समं ज्येष्ठशुक्लत्रयोदश्याम-नुराधायां पश्चिमेऽह्नि वयसि च सर्वं सावद्यं मया निषिद्धमिति चारित्रं प्रतिपन्नवान्। उत्पन्नमनःपर्ययज्ञानः प्रभुर्द्वितीयदिने महेन्द्रनृपगृहे परमान्नेन पारणं चकार । पञ्च दिव्यानि तत्राविर्भूतानि । नवमासानन्यत्र विहृत्य पुनः सहस्राम्रवणमागतस्य शिरीषतरुतलस्थस्य षष्ठेन तपसा फाल्गुनकृष्णषष्ठ्यां विशाखायां प्रभोः पूर्वाह्णे केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत्, सम्प्राप्ताः शक्रदयः। कृता प्रभुणा देशना–

**जीवानां नयनादिकस्य करण-ग्रामस्य सांसारिके,**
**यद्रूपप्रमुखे सुखं तदपरं, नाकर्ण्यते किञ्चन ।**
**एतच्च क्षमते न कामपि पुन-श्चर्चां ततोऽन्यद् यदि,**
**स्वादिष्ठं सुखमस्ति तद्भजत त-न्नो चेत् तपस्तप्यताम्।।१२२।।**

(शार्दूलविक्रीडितम्)

इत्याकर्ण्य प्रतिबुद्धाः प्राज्याः प्राणिनः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकम्। पञ्चनवतिश्च विदर्भाद्याः स्थापिता गणभृतः । प्रभुतीर्थे च मातङ्गो यक्षः । स च श्यामो गजस्थो बिल्वपाशिदक्षिणदोर्द्वयोः नकुलाङ्कुशिवामभुजयुगः । शान्तादेवी शासनदेवता । सा च स्वर्णवर्णा गजस्था वरदाक्षसूत्रिदक्षिणद्विभुजाऽभयदशूलि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वामोभयबाहुः।।

सर्वपरिवारे च प्रभोः साधूनां त्रिलक्षी । साध्वीनां चतुर्लक्षी त्रिंशत्सहस्राश्च। चतुर्दशपूर्विणां सहस्रद्वयी त्रिंशच्च । अवधिज्ञानिनां नवसहस्री । मनःपर्ययिणां सार्द्धैकनवतिशती । केवलिनामेकादशसहस्री । वैक्रियलब्धिमतां पञ्चदशसहस्री त्रिशती च । वादिनामष्टसहस्री चतुःशती च । श्रावकाणां द्विलक्षी सप्तपञ्चाशत्सहस्री च। श्राविकाणां पञ्चलक्षी सप्तसहस्रहीना।।

नवभिर्मासैर्विंशत्या पूर्वाङ्गैश्च हीनमेकं पूर्वलक्षं केवलिपर्यायः । आसन्नमोक्षश्च मुनिनां पञ्चशत्या समं सम्मेताद्रौ गत्वा मासमनशनेनोर्ध्व एव स्थितः फाल्गुन-कृष्णसप्तम्यां मूलर्क्षे क्षीणाशेषकर्मा शर्माद्वैतं पदं प्रभुः प्रपेदे । कौमारे पञ्चपूर्वलक्षी । राज्ये चतुर्दशपूर्वलक्षी विंशतिपूर्वाङ्गयुता । व्रते विंशतिपूर्वाङ्गहीनं पूर्वलक्षम् । एवं विंशतिः पूर्वलक्षाः प्रभोः सर्वायुः । पद्मप्रभमोक्षान्नवसु सागरोपमकोटिसहस्रेषु गतेषु श्रीसुपार्श्वमोक्षः । मोक्षमहिमा च प्राग्वत् ।।

**सुपार्श्वनाथस्य चरित्रमेत-च्चेतःपवित्रीकरणाय भव्याः!।**
**ध्यायन्तु मन्त्राक्षरवत् सदैव, हृदीप्सितं ज्योतिरुदेति येन ।।१२३।।**

(उपजातिः)

## ।।श्रीचन्द्रप्रभचरित्रम्।।

**वृत्तं न खण्डमुदयः सततं कलङ्को-**
**ऽप्येतं श्रितस्य न हि राज्ञ इतीव मत्वा ।**
**[१]राजा स्थितो वपुषि [२]लक्ष्ममिषाद् यदीये**
**चन्द्रप्रभः प्रभवतात् स तमःशमाय ।।१२४।।** (वसन्ततिलका)

धातकीखण्डद्वीपे प्राग्विदेहे मङ्गलावतीविजये रत्नसञ्चयायां पुर्यां पद्मो

१ चन्द्रमसः।। २ लाञ्छनमिषात्।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

राजा राज्यं पालयति । स चैकदा बहिर्गच्छन् विभिन्नवहनं सांयात्रिकं वणिजं विलपन्तं शुश्राव–

**गुणा नामाधारः, सकलजननिस्तारणविधौ,**
**कृतावेशो योऽसौ, शुभफलकयोगेन घटितः ।**
**उपक्रान्ता सर्वे-र्यदनुसरणाच्च व्यवसितिः,**
**स मे पोतः पोत-प्रतिकृतिरमज्जत् क्वचिदपि ।।१२५।।**

(शिखरिणी)

इत्याद्याकर्णयन्नारूढवैराग्यो राज्यमुत्सृज्य युगन्धरमुनिपार्श्वे प्रव्रजितः । तप्यमानो दुस्तपं तपोऽर्हद्भक्त्यादिस्थानकैस्तीर्थकरनामकर्मोपार्ज्य समाधिना मृत्वा वैजयन्तविमाने देवो जातः ।।

जम्बूद्वीपे भरतक्षेत्रे चन्द्राननायां पुर्यां महासेनो राजा । लक्ष्मणानाम पट्टमहादेवी । पद्मनृपजीवो वैजयन्तविमानाच्च्युत्वा चैत्रकृष्णपञ्चम्यामनुराधायां लक्ष्मणादेव्याः कुक्षौ चतुर्दशस्वप्नसूचिततीर्थकरजन्माऽवतीर्णः । पौषस्य कृष्णद्वादश्यामनुराधायां शुक्लवर्णश्चन्द्राङ्कः सार्द्धधनुःशतमानो दशपूर्वलक्षायुर्ज्ञानत्रय-धरस्तीर्थकरः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । कृतः पित्रा पुर्यां महामहोत्सवः। गर्भस्थे प्रभौ मातुश्चन्द्रपानाय दोहदो जातः चन्द्राभश्च प्रभुस्ततश्चन्द्रप्रभ इति कृतं नाम प्रभोः पितृभ्याम् । प्राप्तयौवनश्च राजकन्यायाः कारितः पाणिग्रहणोत्सवम् । जन्मतः सार्द्धे पूर्वलक्षद्वये गतेऽभिषिक्तः प्रभुः पित्रा राज्ये ।।

षट्पूर्वलक्षीं सार्द्धां चतुर्विंशतिपूर्वाङ्गयुतां च राज्यं कृत्वा दत्त्वा सांवत्सरिकं दानं कृतषष्ठः शक्रादिकृतनिष्क्रमणोत्सवो राज्ञां सहस्रेण समं सहस्राम्रवणे गत्वा पौषकृष्णत्रयोदश्यामनुराधायामपराह्णे शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः पश्चिमवया मयाऽवद्यं निषिद्धमिति चारित्रं प्रभुः प्रतिपन्नवान् । मनःपर्ययज्ञानं च प्रभोरुत्पन्नम् । शक्रोऽपि प्रभुकेशान् क्षीरोदे क्षिप्त्वा कृत्वा नन्दीश्वरे यात्रां गतः स्वं स्थानम् । प्रभुरपि द्वितीयेऽह्नि पद्मखण्डपुरे सोमदत्तनृपगृहे परमान्नेन पारणं कृत्वाऽन्यत्र विजहार । वसुधारादिकं तत्राविर्बभूव।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मासत्रयान्ते पुनरपि सहस्राम्रवणे समायातस्य पुन्नागतरुतले कृतषष्ठस्य पूर्वाह्ने फाल्गुनशुक्लसप्तम्यामनुराधायां घातिकर्मक्षयात् केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । सम्प्राप्ताः शक्रादयः । कृता प्रभुणा देशना–

**विद्यासु विस्मृतिभयं विभवेषु शङ्का,**
**राजादितोऽभ्यवहृतिष्वपि भीरजीर्णात् ।**
**प्राणेषु दण्डधरकिङ्करतो दरश्च-**
**नातङ्कपङ्कमलिनं किमु वाऽङ्गभाजाम् ।।१२६।।** (वसन्ततिलका)

इत्याद्याकर्ण्य प्रतिबुद्धैः प्रभूतैः प्राणिभिः गृहीतं व्रतम् । प्रतिपन्नं च सम्यक्त्वादिकम् । स्थापितास्त्रिनवतिर्गणभृतः प्रभुणा । प्रभुतीर्थे विजयो यक्षः । स च नीलवर्णो हंसस्थश्चक्रभृद्दक्षिणबाहुर्मुद्गरिवामभुजः । भ्रुकुटी शासनदेवी। सा च व(म)रालस्था पीतवर्णा खड्गमुद्गरिदक्षिणदोर्द्वया फलकपरशुभृद्वामभुजयुगा।

सर्वपरिवारे च प्रभोः साधूनां सार्द्धा द्विलक्षी । साध्वीनां साशीतिसहस्रा लक्षत्रयी । चतुर्दशपूर्विणां द्विसहस्री । अवधिज्ञानिनां मनःपर्ययिणां चाशीतिशती। केवलिनां दशसहस्री । वैक्रियलब्धिमतां चतुर्दशसहस्री । वादिनां सप्तसहस्री षट्शती च। श्रावकाणां सार्द्धा लक्षद्वयी। श्राविकाणां पञ्चलक्षी नवसहस्रन्यूना।।

त्रिमासोनपूर्वलक्षश्चतुर्विंशतिपूर्वाङ्गवर्जितश्च केवलिपर्यायः । आसन्नमोक्षश्च प्रभुर्मुनिसहस्रेण समं सम्मेताद्रौ गत्वा मासिकेनानशनेनोर्ध्व एव भाद्रपदकृष्णसप्तम्यां श्रवणे क्षीणाशेषकर्मा स्वामी मोक्षं प्राप्तवान् । कौमारे सार्द्धा पूर्वलक्षद्वयी । राज्ये सार्द्धा षट्पूर्वलक्षी चतुर्विंशतिपूर्वाङ्गसंयुता च । व्रते चतुर्विंशतिपूर्वाङ्गहीनं पूर्वलक्षम्। एवं दशपूर्वलक्षाः प्रभोः सर्वायुः । सुपार्श्वमोक्षात् सागरोपमकोटीनां नवसु शतेषु गतेषु श्रीचन्द्रप्रभमोक्षः । मोक्षमहिमा च प्राग्वत् ।।

**जीयाच्चन्द्र-प्रभजिनपतेः, पातकातङ्कशङ्का-**
**पङ्कप्रक्षा-लनघनजलं, चन्द्रगौरं चरित्रम्।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**यस्मिन्नन्त-र्वसति मनसो, देहिनामन्तरात्मा,**
**सञ्जायेतां, तरतमतम-स्तोममुक्तः क्षणेन।।१२७।।** (मन्दाक्रन्ता)

## ।।श्रीसुविधिचरित्रम्।।

**अद्याऽपि लाञ्छनमिषेण यदङ्गसङ्गी,**
**प्रत्यक्ष एव मकरो मकरध्वजस्य ।**
**ब्रूते पराजयमयं सनतेर्जनस्य,**
**[1]वैधेयतां स सुविधिर्विधुनोतु देवः ।।१२८।।**(वसन्ततिलका)

पुष्करवरद्वीपार्द्धे प्राग्विदेहे पुष्कलावतीविजये पुण्डरीकिण्यां महापद्मो राजा राज्यं पालयति । तेन दिग्विजयाय गच्छता मार्गे दृष्टमदृष्टपारप्रायं सरोवरं, व्यावृत्तेन च तदेव रिक्तं दृष्ट्वा चिन्तितम्—

**यद्दृष्टं शतपत्रपात्रममृत—स्वादाम्बुपूर्णान्तरं,**
**तीरस्थद्रुमकुञ्जपुञ्जितजनं, हंसावतंसं सरः ।**
**विश्वप्लोषनिबद्धरोषविषम—ग्रीष्मार्ककार्कश्यतः,**
**पश्याम्यद्य तदप्यनीदृशमसौ, श्रीः कस्य वा शाश्वती ।।१२९।।**
(शार्दूलविक्रीडितम्)

अनेनैव वैराग्येण भावितमानसः परित्यज्य राज्यं प्रव्रजितः। तप्त्वा दुस्तपं तपोऽर्हद्भक्त्यादिस्थानकैस्तीर्थकरनामकर्मोपार्ज्य समाधिना मृत्वा वैजयन्तविमाने देवो जातः ।।

जम्बूद्वीपे भरते काकन्द्यां नगर्यां सुग्रीवो राजा । रामा नाम्ना पट्टराज्ञी ।

१ जडताम्।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

महापद्मनृपजीवो वैजयन्ताच्च्युत्वा फाल्गुनकृष्णनवम्यां मूले चतुर्दशमहास्वप्नसूचित-तीर्थकरजन्मा तस्याः कुक्षाववतीर्णः । मार्गशीर्षकृष्णपञ्चम्यां मूले श्वेतवर्णो मकराङ्कः कार्मुकशतोच्चः पूर्वलक्षद्वयायुष्को ज्ञानत्रयधरः सर्वलक्षणसम्पूर्णः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । कारितः पुर्या पित्रा महामहोत्सवः । गर्भस्थे च प्रभौ जननी सर्वेष्वपि विधिषु निपुणा जाता, पुष्पदोहदश्चोत्पन्नस्ततः पितृभ्यां सुविधिः पुष्पदन्तश्चेति नाम द्वयं प्रभोः कृतम् । प्राप्ततारुण्यश्च राजकन्यायाः कारितः पाणिग्रहणोत्सवम् । जन्मतः पूर्वाणां पञ्चाशत्सहस्र्यां गतायां पित्राभिषिक्तो राज्ये। स्वयं च स्वार्थसाधको जातः ।।

राज्ये च साष्टाविंशतिपूर्वाङ्गाणि पञ्चाशतं पूर्वसहस्राण्यतिवाह्य सांवत्सरिकं दानं दत्त्वा शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा मार्गकृष्णषष्ट्यां मूलेऽपराह्ने षष्ठेन तपसा नृपसहस्रेण समं कृतपञ्चमुष्टिककेशोत्पाटः शक्रन्यस्तदेवदूष्यधारी प्रभुः पश्चिमवया मयाऽवद्यं निषिद्धमिति चारित्रं प्रतिपन्नवान् । शक्रादयश्च प्रभोः केशान् क्षीराब्धौ क्षीप्त्वा नत्वा प्रभुं कृत्वा नन्दिश्वरयात्रां गताः स्वं स्थानम् । प्रभुरप्युत्पन्नमनःपर्ययज्ञानो द्वितीयदिने पुष्पनृपगृहे परमान्नेन पारणं कृत्वा विहृतवानन्यत्र। पञ्चदिव्यानि तत्राभूवन् ।।

नानास्थानेषु चतुर्मासीं यावद्विहृत्य पुनः सहस्राम्रवणे समायातस्य मालूरतरुतले कृतषष्ठस्य पूर्वाह्ने कार्तिकशुक्लतृतीयायां मूले प्रभोः केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा देशना—

**एकैकोऽपि दुरन्त एव विषयः, केनात्र सर्वेऽप्यमी,**
**वश्याः स्वस्य कृता न यस्य करणग्रामोऽपि वश्यो निजः ।**
**यश्च क्षेत्रकृतेऽनुरागनिगडैः काराकुटुम्बीकृतो,**
**मोहक्ष्मापतिना क्व तस्य घटते, वार्त्तापि मुक्तिं प्रति ।।१३० ।।** (शार्दूलविक्रीडितम्)

इत्याद्याकर्णनेन प्रतिबुद्धैर्भूयोभिर्भव्यैः प्रव्रज्या प्रतिपन्ना, सम्यक्त्वादिकं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

च स्वीकृतम् । अष्टाशीतिगणभृतो वराहाद्याः स्थापिताः प्रभुणा । प्रभुतीर्थेऽजितो यक्षः । स च श्वेतः कूर्मस्थो मातुलिङ्गाक्षसूत्रिदक्षिणदोर्द्वयः नकुलकुन्तिवामभुजयुगः । सुतारा शासनदेवी । सा च गौरा वृषभस्था वरदाक्षसूत्रिदक्षिणद्विभुजा कलशाङ्कुशिवामभुजयुगा ॥

सर्वपरिवारे च प्रभोः साधूनां द्विलक्षी । साध्वीनां लक्षं विंशतिसहस्री च। अवधिज्ञानिनां चतुरशीतिशती । चतुर्दशपूर्विणां पञ्चदशशती । मनःपर्ययिणां केवलिनां च पञ्चसप्ततिशती । वैक्रियलब्धिमतां त्रयोदशसहस्री । वादिनां षट्सहस्री श्रावकाणां द्विलक्ष्येकोनत्रिंशत्सहस्री च । श्राविकाणां चतुर्लक्षी द्वासप्ततिसहस्राश्च।

अष्टाविंशत्या पूर्वाङ्गैश्चतुर्मास्या च न्यूनः पूर्वलक्षः केवलिपर्यायः । आसन्नमोक्षसमयः साधुसहस्रेण समं सम्मेताद्रौ गत्वा मासमनशन्यूर्ध्व एव स्थितो भाद्रपदशुक्लनवम्यां मूले सर्वकर्मक्षयादक्षयसुखभाजनं प्रभुर्बभूव । कौमारे पञ्चाशत्पूर्वसहस्री । राज्येऽपि सैवाष्टाविंशतिपूर्वाङ्गयुता । व्रते पूर्वलक्षोऽष्टाविंशति-पूर्वाङ्गहीनः । पूर्वलक्षद्वयमेवं प्रभोः सर्वायुः । श्रीचन्द्रप्रभमोक्षात् सागरोपमकोटीनां नवतौ गतायां श्रीसुविधिमोक्षः । मोक्षमहिमा च प्राग्वत् । साधूनामभावाच्च शीतलस्वामितीर्थं यावत्तीर्थोच्छेदो जातः । शीतलात् शान्तिजिनं यावत् षट्सु जिनान्तरेषु तीर्थोच्छेदश्च वक्तव्यः ॥

**सुविधिजिनचरितमेतद्, वसति श्रीवत्समिव हृदि यदीये ।**
**विष्णुरिव भवति जिष्णुः, सगदानुगतस्तु न कदापि ॥१३१॥**(आर्या)

## ॥श्रीशीतलचरित्रम्॥

**श्रीशीतलः स मम शीतलतां प्रदत्तां,**
**नित्योपतप्तहृदयस्य कषायदावैः ।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**येन प्रतापमहिमा परतीर्थिकाणा-**

**मामूलतोऽप्युपशमं गमितः समस्तः ।।१३२।।**(वसन्ततिलका)

पुष्करवरद्वीपार्द्धे प्राग्विदेहे वत्सविजये सुसीमायां पुर्यां पद्मोत्तरो राजा राज्यं पालयति। एकदा रात्रौ प्रदीपे निपततः शलभान् स दृष्ट्वा सदयं चिन्तयामास-

**लोकैरपायपरिहारनिमित्तमेव,**

**संसेव्यते जगति दीप! भवत्समीपम् ।**

**निर्भागधेयतिलकस्य पतङ्गपूग-**

**स्यैतस्य तु त्वमपि हेतुरकालमृत्योः ।।१३३।।**(वसन्ततिलका)

इत्यादिवैराग्यवासनातिरेकेण प्रतिबुद्धः स्वं राज्यं प्रोज्झ्य प्रवव्राज । तप्त्वा दुस्तपं तपोऽर्हद्भक्त्याद्यैः स्थानकैस्तीर्थकरनामकर्मोपार्ज्य समाधिना मृत्वा प्राणते देवो जातः ।।

जम्बूद्वीपे भरतक्षेत्रे भद्रिलपुरे दृढरथराजा । नन्दा पट्टराज्ञी । वैशाखकृष्णषष्ठ्यां पूर्वाषाढानक्षत्रे प्राणतदेवलोकाच्च्युत्वा पद्मोत्तरनृपजीवश्चतुर्दशस्वप्नसूचिततीर्थकरजन्मा नन्दायाः कुक्षाववतीर्णः । माघकृष्णद्वादश्यां पूर्वाषाढायां स्वर्णवर्णः श्रीवत्साङ्को नवतिधनुर्मानः पूर्वलक्षायुर्ज्ञानत्रयधरस्तीर्थकरः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत्। कारितः पूर्यां पित्रा महोत्सवः । गर्भस्थे प्रभौ दाहज्वरतरलं श्रीदृढरथनृपवपुर्नन्दादेव्या स्वपाणिना संस्पृश्य संस्पृश्य शीतलीकृतम्, ततः प्रभोः शीतल इति कृतं पितृभ्यां नाम। समये च कारितः पित्रा राजपुत्र्याः पाणिग्रहणोत्सवः । पूर्वाणां पञ्चविंशतौ सहस्रेषु जन्मतो गतेषु पित्रा प्रभुरभिषिक्तो राज्ये । स्वयं च स्वार्थसाधको जातः ।।

पञ्चाशतं पूर्वसहस्राणि यावद्राज्यं प्रपाल्य दत्तसांवत्सरिकदानः कृतषष्ठो माघकृष्णद्वादश्यां पूर्वाषाढायां शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा नृपसहस्रेण समं कृतपञ्चमुष्टिककेशोत्पाटः पश्चिमेऽह्नि वयसि च सर्वं सावद्यं मया निषिद्धमिति चारित्रं प्रभुः प्रतिपन्नवान् । मनःपर्ययज्ञानं चोत्पन्नम् । शक्रादयोऽपि क्षिराब्धौ प्रभुकेशान् क्षिप्त्वा प्रभुं नत्वा गताः स्वं स्थानम् । प्रभुरपि द्वितीयदिने

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रिष्टपुरे पुनर्वसुनृपगृहे परमान्नेन पारणं कृत्वा विजहाराऽन्यत्र । पञ्चदिव्यानि तत्राविर्भूतानि। त्रीणि वर्षाण्यन्यत्र विहृत्य पुनः सहस्राम्रवणे प्राप्तस्य वटतले कृतषष्ठस्य पूर्वाह्ले पौषकृष्णचतुर्दश्यां पूर्वाषाढायां प्रभोः केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत्। सम्प्राप्ताः शक्रादयः । कृता प्रभुणा देशना–

**अत्यल्पं मितकालमन्तविरसं, सांसारिकं यत्सुखं,**
**केषाञ्चित्तदपीप्सतामपि मना-ग्मात्रं न सम्पद्यते ।**
**नीत्वा केऽपि पुनश्चमत्कृतिकरं, स्वं जन्म सर्वं सुखै-**
**रक्लेशेन लभन्त एव सुखितां, स्वर्गेऽपवर्गेऽपि च ।।१३४।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य प्रतिबुद्धाः प्राणिनो जगृहुर्व्रतम्, सम्यक्त्वादिकं च प्रपेदिरे । एकाशीतिरानन्दाद्याः स्थापिता गणभृतः । प्रभुतीर्थे ब्रह्मनामा यक्षः । स च त्र्यक्षश्चतुर्मुखः पद्मासनः श्वेतो मातुलिङ्गिमुद्गर्यभयदपाशिदक्षिणचतुर्भुजः नकुलगदाङ्कुशाक्षसूत्रिवामचतुर्भुजो। अशोका शासनदेवी। सा च मुद्गवर्णा पद्मस्था वरदपाशिदक्षिणद्विभुजा फलाङ्कुशिवामभुजयुगा।।

त्रिवर्षोनपञ्चविंशतिसहस्राः केवलिपर्यायम् । प्रभोश्च सर्वपरिवारे साधूनां लक्षम् । साध्वीनां षडुत्तरं लक्षम् । चतुर्दशपूर्वभृतां चतुर्दशशती । अवधिज्ञानिनां द्वासप्ततिशती । मनःपर्ययिणां सार्द्धा सप्तसहस्री । केवलिनां सप्तसहस्री । वैक्रियलब्धिमतां द्वादशसहस्री । वादिनामष्टपञ्चाशच्छती । श्रावकाणां द्विलक्षी नवाशीतिसहस्री च। श्राविकाणां चतुर्लक्षी साष्टपञ्चाशत्सहस्री ।।

आसन्नमोक्षश्च साधुसहस्रेण समं सम्मेताद्रौ गत्वा मासमनशन्यूर्ध्वस्थ एव वैशाखकृष्णद्वितीयायां पूर्वाषाढायां क्षीणाशेषकर्मा प्रभुर्मोक्षसुखैकतानो बभूव। कौमारे पूर्वाणां पञ्चविंशतिसहस्री । राज्ये पञ्चाशत्पूर्वसहस्री । व्रते पञ्चविंशतिसहस्री। एवं पूर्वलक्षं प्रभोः सर्वायुः । सुविधिस्वामिमोक्षात् सागरोपमकोटीषु नवसु गतासु श्रीशीतलस्वामिमोक्षः । मोक्षमहिमा च प्राग्वत् ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**जयतु शीतलतीर्थकृतश्चिरं, चरितमेतदुदारसुवर्णकम् ।**
**तनुभृतां श्रवणद्वयमण्डनी, भवतु चोज्ज्वलकुण्डलयुग्मवत् ।।१३५।।**
(द्रुतविलम्बितम्)

## ।।श्रीश्रेयांसचरित्रम्।।

**मुक्तावलीषु कलयन् स्थितिमत्युदारा-**
**मव्याहतं च गुणमत्रुटितं दधानः ।**
**यो नायकत्वपदवीमसमामवाप**
**श्रेयाञ्जिनः सजगतः श्रियमातनोतु ।।१३६।।** (वसन्ततिलका)

पुष्करवरद्वीपार्द्धे प्राग्विदेहे कच्छविजये क्षेमायां पुर्यां नलिनगुल्मो राजा राज्यं पालयति । तेनान्यदा द्यूतव्यसनिनमेकं स्वसामन्तसुतं मार्गे सभिकाद्यैः[१] कदर्थ्यमानं दृष्ट्वा स्वचेतसि चिन्तितम्—

**विद्यां प्रमादाद्धनमक्षवत्याः, प्राणांश्च वैराद्वपुरप्यपथ्यात् ।**
**व्यतीतबाल्या अपि बालिशाः कथं, नयन्ति मानुष्यकमप्यघैर्वृथा ?।।१३७।।**
(उपजातिः)

अनयैव भावनया प्रवर्द्धमानवैराग्यः प्रोज्झ्य राज्यं जग्राह प्रव्रज्याम् । तप्त्वा च दुस्तपं तपोऽर्हद्भक्त्यादिस्थानकैस्तीर्थकरनामकर्म समुपार्ज्य समाधिना च मृत्वा महाशुक्रे देवत्वेनोत्पन्नः ।।

जम्बूद्वीपे भरते सिंहपुरे विष्णुर्नृपः, विष्णुर्नाम्ना च पट्टराज्ञी । सप्तमदेवलोका-ज्ज्येष्ठकृष्णषष्ठ्यां श्रवणर्क्षे च्युत्वा नलिनगुल्मनृपजीवश्चतुर्दशमहास्वप्नसूचिततीर्थकर-

१ द्युतकारकैः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जन्मा विष्णुदेव्याः कुक्षाववतीर्णः। फाल्गुनकृष्णद्वादश्यां श्रवणर्क्षे खड्गिलाञ्छनः स्वर्णवर्णोऽशीतिधनुर्मानश्चतुरशीतिलक्षायुर्ज्ञानत्रयधरः सम्पूर्णलक्षणः पुत्रो जातः । जन्मोत्सवः प्राग्वत् । पित्रा च महोत्सवपूर्वं श्रेयसि दिने जातत्वाच्छ्रेयांस इति कृतं नाम । प्राप्ततारुण्यश्च विवाहितः पित्रा राजकन्याम्। जन्मत एकविंशतौ वर्षलक्षेषु गतेषु पित्रा राज्येऽभिषिक्तः । द्वाचत्वारिंशद्वर्षलक्षान्ते सांवत्सरिकं दानं दत्त्वा फाल्गुनकृष्णत्रयोदश्यां श्रवणर्क्षे पूर्वाह्णे कृतषष्ठो राज्ञां सहस्रेण समं सहस्राम्रवणे गत्वा शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः शक्रादिकृतनिष्क्रमणः पश्चिमवया मयाऽवद्यं निषिद्धमिति प्रभुश्चारित्रं प्रतिपन्नवान् । शक्रादयोऽपि प्रभुकेशान् क्षीराब्धौ क्षिप्त्वा प्रभुं च नत्वा कृतनन्दिश्वरयात्रा गताः स्वं स्थानम् । उत्पन्नमनःपर्ययज्ञानश्च द्वितीयेऽह्नि सिद्धार्थपुरे नन्दनृपगृहे परमान्नेन प्रभुश्चकार पारणम्। जातानि तत्र पञ्चदिव्यानि । प्रभुरप्यऽन्यत्र विजहार । अत्रान्तरे त्रिपृष्ठस्य प्रथमदा[1]शार्हस्योत्पत्तिः ।।

अन्यत्रान्यत्र विहृत्य छाद्मस्थ्ये व[2]र्षद्वयमतिक्रम्य समागत्य पुनः सहस्राम्रवणेऽशोकतरुतले कृतषष्ठतपसः पूर्वाह्णे माघकृष्णपञ्चदश्यां श्रवणर्क्षे प्रभोः केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । संप्राप्ताः शक्रादयः । कृता प्रभुणा देशना–

**वाणिज्यव्यवहारशिल्पविभव-प्राक्पुण्यहीनैर्नरै-**
**रेकोऽयं निजजीवितव्यसमयः, क्लेशेन निर्गम्यते ।**
**येषां जन्मशतं तु याति विविधा-ऽऽधिव्याधिबाधाभृतां,**
**द्रष्टुंताननलंभविष्णुभिरिव, त्यक्तो मुनीन्द्रैर्भवः ।।१३८।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य प्रतिबुद्धाः प्रभूताः प्राणिनो जगृहुर्व्रतं सम्यक्त्वादिकं च। गोशुभप्रमुखाः षट्सप्ततिर्गणधराः स्थापिताः प्रभुणा। कुर्वंश्च विहारं क्रमेण सम्प्राप्तः

१ मास० J पाठः।। २ वासुदेवः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रभुः पोतनपुरे । जातं तत्र समवसरणम् । कृता प्रभुणा देशना । प्रतिबुद्धाभ्यां च तत्राऽचलबलभद्रत्रिपृष्ठाभ्यां गृहीतं सम्यक्त्वम् । जातौ परमश्रावकौ । प्रभुतीर्थे ईश्वरो यक्षः । स च त्र्यक्षो गौरो वृषभस्थो मातुलिङ्गगदाभृद्दक्षिणदोर्द्वयो नकुलाक्षसूत्रिवामभुजयुगः । मानवी च शासनदेवी । सा च गौरा सिंहस्था वरदमुद्गरिदक्षिणद्विभुजा कलशाङ्कुशिवामभुजयुगा ।।

सर्वपरिवारे च प्रभोः साधूनां चतुरशीतिसहस्री । साध्वीनां लक्षं त्रिसहस्री च । चतुर्दशपूर्विणां त्रयोदशशतानि । अवधिमनःपर्ययिणां षट्सहस्री । केवलज्ञानिनां सार्द्धा षट्सहस्री । वैक्रियलब्धिमतामेकादशसहस्री । वादिनां पञ्चसहस्री । श्रावकाणां द्वे लक्षे । श्राविकाणां चतुर्लक्ष्यष्टचत्वारिंशत्सहस्राश्च ।।

आसन्नमोक्षश्च मुनिसहस्रेण समं सम्मेताद्रावूर्ध्व एव मासमनशनेन स्थितः श्रावणकृष्णतृतीयायां धनिष्ठायां प्रभुः क्षीणाशेषकर्मा निर्वाणसुखमवाप । मोक्षमहिमा च प्राग्वत् । कौमार एकविंशतिवर्षलक्षी । राज्ये द्वाचत्वारिंशद्वर्षलक्षी । व्रते एकविंशतिवर्षलक्षी । एवं प्रभोः सर्वायुः चतुरशीतिवर्षलक्षाण्यायुः । श्रीशीतलमोक्षाच्छ्रेयांसमोक्षश्च(स्य?) सागरोपमशतेन न्यूना सागरोपमकोटिः षट्लक्षाणि षड्विंशतिसहस्राश्चान्तरम् ।।

**श्रेयांसतीर्थेशचरित्ररत्ना-लङ्कारपूते श्रवसी यदीये ।**
**तदीयमास्याम्बुजमीक्षमाणा, कल्याणलक्ष्मीर्नयति स्वजन्म ।।१३९।।** (इन्द्रवज्रा)

## ।।अचलत्रिपृष्ठाश्वग्रीवाणां च चरितानि।।

यथा– प्राग्विदेहे पुण्डरीकिण्यां सुबलो राजा वैराग्यात् प्रव्रज्य समाधिना च मृत्वाऽनुत्तरविमाने देवो जातः। ततश्च्युत्वा पोतनपुरे रिपुप्रतिशत्रुभद्रयोरिभेन्दू वृषभः सर इति चतुःस्वप्नसूचितबलजन्मा गौरोऽशीतिधनूच्चः पञ्चाशीतिवर्षलक्षायुः पुत्रो जातः। अचल इति कृतं तस्य नाम । तदनन्तरं मृगावतीति नाम्ना पुत्रिका

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जाता । सा च पित्रैव परिणीता । तत्कुक्षौ विश्वभूतिजीवः सप्तमदेवलोकाच्च्युत्वावतीर्णः। समये सिंहाभिषेककुम्भाब्धिसूर्याग्निरत्नसञ्चय इति सप्तस्वप्नसूचितार्धचक्रिजन्मा-ऽशीतिधनूच्चश्चतुरशीतिवर्षलक्षायुः श्यामः पुत्रो जातः। तस्य च पृष्ठे वंशत्रयं जातमिति पित्रा त्रिपृष्ठ इति कृतं नाम । अचलेन सममसौ ववृधे । अन्योन्यं प्रीतिस्तयोर्जाता। तौ च नीलपिताम्बरौ तालगरुडध्वजौ च ।।

इतश्च रत्नपुरे मयूरग्रीवनीलाञ्जनयोः पुत्रोऽशीतिधनुर्मानश्चतुरशीत्यब्दलक्षायुः श्यामः प्रतिविष्णुरश्वग्रीवो राजा। त्रिखण्डं भरतक्षेत्रं भुञ्जानेन तेन चिन्तितमेकदा-कस्मान्मे मृत्युरिति । नैमित्तिकेनोक्तम्- यस्तव चण्डवेगं दूतं कुट्टयिष्यति, पश्चिमदेशस्थं सिंहं च विदारयिष्यति, स त्वां हनिष्यतीत्यादिकं श्रीमहावीरचरितसत्कषोडशभवा-दारभ्यैकोनविंशं भवयावद् वक्ष्यमाणमत्र ज्ञेयम् । चण्डवेगवधादिष्वभिज्ञानेषु मिलितेष्वश्वग्रीवत्रिपृष्ठयोः जातः सङ्ग्रामः निरस्त्रीकृतेणाऽश्वग्रीवेण क्षिप्तं चक्रम् । तेनैव चक्रेण हतस्त्रिपृष्ठेनाऽश्वग्रीवः । उद्घुष्टं दिवि देवैर्जयत्यर्धचक्री त्रिपृष्ठ इति । साधितभरतार्धो व्यावर्तमानो मगधेषु कोटिशिलां वामदोष्णा भुजाग्रं यावन्नीत्वा पुनर्मुमोच स्वस्थाने । पोतनपुरप्राप्तस्य जातोऽर्द्धचकित्वाभिषेकः ।।

तत्र च सुखासक्तस्य समवसृतोऽन्यदा श्रीश्रेयांसः । अचलेन पौरैः समं समेत्य तत्र श्रुता देशना । प्रतिबुद्धाभ्यां द्वाभ्यामङ्गीकृतः श्रावकधर्मः । स्वायुःप्रान्ते च त्यक्तसम्यक्त्वोऽतिक्रूरकर्मा मृत्वा त्रिपृष्ठस्तृतीयां पृथ्वीं प्राप्तः । अस्य च कौमारे मण्डलिकत्वे च प्रत्येकं वर्षाणां पञ्चविंशतिः सहस्राः । राज्ये त्र्यशीतिर्लक्षाण्ये-कोनपञ्चाशत्सहस्राश्च । दिग्जये सहस्रम्। सर्वायुस्त्रिपृष्ठस्य चतुरशीतिवर्षलक्षाः । अचलोऽपि भ्रातृशोकाद् धर्मघोषसूरिपार्श्वे प्रव्रज्य तपस्तप्त्वा सर्वकर्मक्षयाद् मुक्तिं गतः। अचलस्य पञ्चाशीतिरब्दलक्षाणि सर्वायुः।।

Jain Educationa International　For Personal and Private Use Only　www.jainelibrary.org

# ।।श्रीवासुपूज्यचरित्रम्।।

**पूज्यं पदं स दिशतान्मम वासुपूज्यो,**
**यत्पूजया सकृदनुष्ठितयापि लोकः ।**
**स्वं मन्यते पृथगवस्थितमेव साध्यो,**
**निःसीमभीमभवदुःखपरम्पराभ्यः ।।१४०।।** (वसन्ततिलका)

पुष्करवरद्वीपार्द्धे प्राग्विदेहे मङ्गलावतीविजये रत्नसञ्चयायां पुर्यां पद्मोत्तरो राजा राज्यं पालयति। एकदा तस्मिन् राजन्यास्थानस्थे समागत्यैकेन श्रेष्ठिना स्वकीय एकः सगुणः पुत्रः स्वसमृद्धिभाजनं कारितः। द्वितीयश्चान्यायवर्त्ती दोषवानिति सर्वस्वबाह्यः कारितः । ततो राज्ञा चिन्तितम्—

**तत्पार्श्वे वसतिः श्रियः समुचितै-र्वाम्भोभिरम्भोजिनी**
**पत्राणीव नयन्मनांस्यपि परिस्पृष्टानि दोषैः क्वचित् ।**
**सर्वाङ्गं मलयद्रुवद्विषधरैस्तैर्वेष्टिता ये पुन-**
**र्मूलोच्छेदनिमित्तमेव सकलास्तद्वृद्धयो निष्फलाः।।१४१।।**
(शार्दूलविक्रीडितम्)

अनेनैव भावेन प्रवर्द्धमानवैराग्यः परित्यज्य राज्यं प्रव्रज्य वज्रनाभगुरोः पार्श्वेऽर्हदादिस्थानाराधनेन तीर्थकरनामकर्म समुपार्ज्य समाधिना च मृत्वा प्राणतकल्पे देवो जातः ।।

जम्बूद्वीपे दक्षिणभरतार्द्धे चम्पायां वसुपूज्यो राजा जयादेवी । ज्येष्ठशुक्लनवम्यां शतभिषजि पद्मोत्तरनृपजीवः प्राणताच्च्युत्वा चतुर्दशमहास्वप्नसूचिततीर्थकरजन्मा जयादेव्याः कुक्षाववतीर्णः । फाल्गुनकृष्णचतुर्दश्यां शतभिषजि रक्तवर्णो महिषाङ्कः सप्ततिधनुर्मानो द्वासप्ततिवर्षलक्षायुर्ज्ञानत्रयधरः सम्पूर्णसर्वलक्षणः पुत्रो जातः।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जन्मोत्सवश्च प्राग्वत् । महोत्सवपूर्वं पितृभ्यां कृतं वासुपूज्य इति नाम । प्राप्तस्तारुण्यं परिणायितः पित्रा राजपुत्रीम् ।।

जन्मतो वर्षलक्षेष्वष्टादशसु गतेषु फल्गुनामावस्यायां शतभिषज्यपराह्ने कृतचतुर्थो राज्ञां षड्भिः शतैः समं विहारगृहोद्याने गत्वा शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः शक्रादिकृतनिष्क्रमणोत्सवः सर्वं सावद्यं मया निषिद्धमित्य-कृतराज्यः पूर्ववयस्येव प्रभुश्चारित्रं प्रपेदे । शक्रादयोऽपि क्षीराब्धिक्षिप्तप्रभुकेशाः कृतनन्दीश्वरयात्राश्च गताः स्वं स्वं स्थानम् । उत्पन्नमनःपर्ययज्ञानः प्रभुर्महापुरे गत्वा द्वितीयेऽह्नि सुनन्दनृपगृहे परमान्नेन पारणं चकार । पञ्चदिव्यानि तत्र जातानि। अत्रान्तरे विजयद्विपृष्ठतारकाणामुत्पत्तिर्वाच्या । प्रभुरप्यन्यत्र मासमेकं विहृत्य पुनः सहस्राम्रवणे समायातः। चम्पायाः कृतचतुर्थस्य पाटलितरोरधस्तात् पूर्वाह्ने माघशुक्ल-द्वितीयायां शतभिषजि घातिकर्मक्षयात् प्रभोः केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा देशना–

**को नाम मुह्यति मनाग्विषयेषु नैव,**
**वस्तुस्थितिं तु विमृशन्ति विवेकभाजः ।**
**यद्यज्जडैः सुखमिति प्रतिपद्यते स्म,**
**सा सा रुजां प्रतिकृतिर्भ्रम एव सौख्ये ।।१४२।।** (वसन्ततिलका)

इत्याद्याकर्ण्य प्रतिबुद्धैः प्रभूतैः प्राणिभिर्व्रतसम्यक्त्वयोः कृता प्रतिपत्तिः । सूक्ष्मादयः षट्षष्टिर्गणधराः प्रभुणा स्थापिताः। विहृतवानन्यत्र प्रभुः।।

प्रभुतीर्थे कुमारो यक्षः स च हंसस्थो मातुलिङ्गशरिदक्षिणदोर्द्वयो नकुलधनुर्भृद्वामभुजयुगः । चण्डा शासनदेवी । सा च वरदशक्तिभृद्दक्षिणद्विभुजा पुष्पगदाभृद्वामदिग्बाहुः । विहरंश्चान्यदा प्रभुरायातो द्वारकायाम् । कृतं देवैः समवसरणम्। समागतौ वन्दितुं विजयद्विपृष्ठौ। श्रुत्वा प्रभुदेशनां प्रतिबुद्धौ द्वावपि जगृहतुः सम्यक्त्वम्। विजहार चान्यत्र प्रभुः । प्रभोश्च साधूनां द्वासप्ततिः सहस्राः । आर्यिकाणां लक्षमेकम्। पूर्विणां द्वादशशती। अवधिज्ञानिनां पञ्चसहस्री चतुःशती च । मनःपर्ययिणा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मेकषष्ठिशती। केवलिनां षट्सहस्री । वैक्रियलब्धिमतां सहस्रमेकम् । वादिनां सप्तचत्वारिंशच्छती। श्रावकाणां द्वेलक्षे पञ्चदशसहस्री । श्राविकाणां चतुर्लक्षी षट्त्रिंशत्सहस्री च ।।

आसन्नमोक्षश्च चम्पायां गत्वा षड्भिर्मुनिशतैः समं मासमनशन्यूर्ध्वस्थ एवाषाढशुक्लचतुर्दश्यामुत्तराभद्रपदायां सर्वकर्मनिर्मुक्तः प्रभुर्मुक्तिं प्राप । मोक्षमहिमा च प्राग्वत् । कौमारेऽष्टादश । व्रते चतुःपञ्चाशत् । छाद्मस्थ्यमासममम्। द्वासप्ततिर्वर्षलक्षाः प्रभोः सर्वायुः । श्रेयांसस्वामिनिर्वाणाद् वासुपूज्यमोक्षस्य सागरोपमाणि चतुःपञ्चाशदन्तरमिति ।।

**श्रीवासुपूज्यचरितस्मृतिपूते हृदि सतां वसन्नात्मा ।**
**तीर्थाधिवासपुण्यं लभते पुण्यानुबन्धकरम् ।।१४३।।** (आर्या)

## ।। विजय-द्विपृष्ठ-तारकाणां चरितानि ।।

पृथ्वीपुरे पवनवेगो राजा राज्यं प्रोज्झ्य प्रव्रज्य तपस्तप्त्वा समाधिना च मृत्वाऽनुत्तरविमाने देवो जातः ।।

जम्बूद्वीपे दक्षिणभरतार्द्धे विन्ध्यपुरे विन्ध्यशक्तिर्नृपः । स चास्थानस्थश्चरेण विज्ञप्तः– देव ! साकेते पर्वतकराज्ये यादृशी गुणमञ्जरी वेश्या तादृशी क्वापि नास्तीति। ततो विन्ध्यशक्तिना तद्याचनाय स्वमन्त्री पर्वतकपार्श्वे प्रहितः। तेन च याचितेनापि सा नाऽर्पिता । ततः प्रवर्धमानमत्सरौ द्वावपि योद्धुं स्वस्वदेशसीमान्तमागतौ। युद्ध्यमानश्च भीतः सन् पलायितः पर्वतको राजा । जितं विन्ध्यशक्तिना । गृहीतं तदीयं सर्वम्। गुणमञ्जरीं च गृहीत्वा गतश्च स्वं पुरम् । पर्वतकोऽपि वैराग्यात् सम्भवसूरिपार्श्वे प्रव्रजितः । तप्त्वा तपः स्वायुःप्रान्तेऽनशनं प्रपन्नो विन्ध्यशक्तिकृतं पराभवं सस्मार । ततो विन्ध्यशक्तिवधाय मे तपोऽस्त्विति स निदानो मृत्वा प्राणते देवो जातः ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विन्ध्यशक्तिरपि मृत्वा भवं भ्रान्त्वा जिनधर्ममाराध्य क्रमेण कल्पवासी देवोऽभवत् ।ततश्च्युत्वा विजयपुरे श्रीधरश्रीमत्योः सप्ततिधनूच्चश्यामो द्विशप्तत्यब्द- लक्षायुः पुत्रो जातः। तारक इति च पितृभ्यां कृतं नाम। स च पितुः पार्श्वात् चक्रं प्राप्य भरतार्द्धमसाधयत्।।

इतश्च द्वारकायां ब्रह्मा नाम राजा। तस्य सुभद्रा उमा च द्वे भार्ये। पवनवेगजीवोऽनुत्तरविमानाच्च्युत्वा सुभद्राकुक्षाववतीर्णः। इभेन्दूवृषभसर इति चतुःस्वप्नसूचितबलजन्मा गौरः सप्ततिधनुर्मानः पादोनकोटिवर्षायुः समये पुत्रो जातः। कृतं विजय इति तस्य नाम।।

इतश्च प्रणताच्च्युत्वा पर्वतकजीव उमाकुक्षाववतीर्णः । सिंहाभिषेककुम्भाब्धिसूर्याग्निरत्नसञ्चय इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा श्यामः सप्ततिधनुर्मानो द्वासप्ततिवर्षलक्षायुः पुत्रो जातः । तस्य च द्विपृष्ठ इति कृतं नाम । नीलपीताम्बरयोः तालगरुडध्वजयोस्तयोरन्योऽन्यमतिप्रीतिर्जाता । अन्यदा तयोः कुमारयोः लीलायितं तारकाज्ञासमुल्लङ्घनहेवाकं च दृष्ट्वा हेरिकस्तारकाय गत्वा शशंस । सोऽपि सर्वाभिसारेण तद्वधायाऽऽयातः । ताभ्यामप्यभिमुखमागत्य युद्ध्वा हतश्चक्रेण तारकः। सुरैश्च जयति द्विपृष्ठोऽर्धचक्रीत्युद्घोष्य क्षिप्ता तच्छिरसि पुष्पवृष्टिः ।।

द्विपृष्ठेन च मागधादिषु स्थानेषु दिग्विजयं कृत्वा साधितं भरतार्द्धाम्। व्यावर्तमानेन च मगधेषु दृष्टा कोटिशिला। तां च वामदोष्णा सलीलमुत्पाट्य नीत्वा ललाटतटीं यावत् पुनर्मुमोच स स्वस्थाने। समायातस्य द्वारकायां जातोऽर्द्धचक्रित्वाभिषेकस्तस्य। समये च समवसृतस्य श्रीवासुपूज्यस्य पादमूले गत्वा द्वाभ्यामपि प्रतिपन्नं सम्यक्त्वम्। आयुःशेषश्च द्विपृष्ठोऽधिकतरक्रूरकर्मा मृत्वा षष्ठीं पृथ्वीं प्राप्तः। द्विपृष्ठस्य कौमारे पादोनमब्दलक्षम्। तदेव मण्डलिकत्वेऽपि। दिग्जये वर्षशतम्। राज्ये सप्तत्यब्दलक्षी नवशताधिकैकोनपञ्चाशत्सहस्री च । एवं द्वासप्ततिलक्षी वर्षाणामित्यायुः । इतश्च विजयोऽपि भ्रातृविरहवैराग्याद् विजयसूरिपादान्ते प्रव्रज्य कर्मक्षयाद् मोक्षं गतः। पादोनकोटिः वर्षाणां विजयस्य सर्वायुरिति ।।

## ।। विजय-द्विपृष्ठ-तारकचरितं समाप्तम्।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ।।श्रीविमलनाथचरित्रम्।।

**देवः स वो विमलतां विमलस्तनोतु,**
**चित्तस्य संसृतिविकारमलाविलस्य ।**
**अग्रे यदीयमनसः स्फटिकाश्मनोऽपि,**
**वैमल्यमस्ति किमुपाधिमलीमसस्य ।।१४४।।** (वसन्ततिलका)

धातकीखण्डे प्राग्विदेहे भरतविजये महापुर्यां पद्मसेनो राजा प्रजामनुशास्ति। स चैकदा दुष्कराणि कर्माणि कुर्वाणं प्रसिद्धकार्पण्यं व्यवहारिणमेकं दृष्ट्वा चिन्तितवान्-

**यत्पाणिः करिणीकपोलतलवद्, दानानऽभिज्ञः सदा,**
**पोषो न क्रियते शिशोरिव [१]पिकैः, स्वस्यापि देहस्य यैः ।**
**तीर्थे क्वाप्यतिपावने सुतपसा, केनापि कस्मादपि,**
**ध्यानस्थानलयान्नृजन्मसफलं, किं स्वं न ते कुर्वते ।।१४५।।**
(शार्दूलविक्रीडितम्)

अनयैव भावनया प्रवर्धमानवैराग्यः परित्यज्य राज्यं सर्वगुप्तगुरुपार्श्वे गत्वा प्रवव्राज । तप्त्वातिदुस्तपं तपोऽर्हदादिस्थानाराधनेन समुपार्ज्य तीर्थकरनामकर्म समाधिना च मृत्वा सहस्रारे देवो जातः ।।

जम्बूद्वीपे भरते काम्पिल्ये कृतवर्मा नृपः श्यामा पट्टराज्ञी । वैशाखशुक्लद्वादश्यामुत्तराभाद्रपदासु पद्मसेननृपजीवः सहस्राराच्च्युत्वा तस्याः कुक्षाववतीर्णः। माघशुक्लतृतीयायामुत्तराभाद्रपदासु चतुर्दशस्वप्नसूचिततीर्थकरजन्मा सूकराङ्कः स्वर्णवर्णस्त्रिषष्टिधनुर्मानः षष्ट्यब्दलक्षायुर्ज्ञानत्रयधरः सर्वलक्षणसम्पूर्णः पुत्रो जातः। जन्मोत्सवश्च प्राग्वत् । गर्भस्थे च प्रभौ विशेषतो जननी विमलतमा जाता । ततः

१ कोकिलैः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पितृभ्यां विमल इति कृतं महोत्सवपूर्वं प्रभोरभिधानम् । प्राप्ततारुण्यश्च पितृभ्यां कारितः प्रधानराजपुत्र्याः पाणिग्रहम् । कौमारे पञ्चदशाब्दलक्षान्ते स्थापितः पित्रा राज्ये ।।

त्रिंशतं वर्षलक्षाणि राज्ये निर्गम्य कृतसांवत्सरिकदानः कृतषष्ठतपाः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा माघशुक्लचतुर्थ्यामुत्तरभाद्रपदास्वपराह्ने नृपसहस्रेण समं शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः सर्वं सावद्यं मया निषिद्धमिति चारित्रं पश्चिमवयाः प्रभुः प्रपेदे। शक्रोऽपि क्षीरोदक्षिप्तप्रभुकेशः प्रभुं नत्वा कृतनन्दीश्वरयात्रः प्राप्तः स्वं स्थानम् । प्रभुरप्युत्पन्नमनःपर्ययज्ञानो द्वितीयेऽह्नि धान्यकूटपुरे जयनृपगृहे परमान्नेन पारणं कृत्वाऽन्यत्र विजहार । पञ्चदिव्यानि तत्राविर्भूतानि । अत्रान्तरेभद्रादीनामुत्पत्तिः।।

मास(वर्ष)द्वयं छद्मस्थः प्रभुर्विहृत्य पुनः सहस्राम्रवणे समायातः । जम्बूतरुतलस्थस्य पूर्वाह्ने पौषशुद्धषष्ठ्यामुत्तराभाद्रपदासु षष्ठतपःस्थस्य प्रभोः केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः। कृता प्रभुणा देशना–

**नासाया श्वसितं रुणद्धि सुदृढं पर्यङ्कमभ्यस्यति,**
**स्कन्धे न्यस्यति योगपट्टकमट-न्नश्नाति गायत्यपि ।**
**रागत्यागजितेन्द्रियत्वनिखिला-ऽवद्यक्रियावर्जनात्,**
**यत्साध्यं पदमव्ययं तदबुधा लोकोऽन्यथाऽपीच्छति।।१४६।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य बहुभिः प्रतिबुद्धैर्जनैः प्रव्रज्या सम्यक्त्वादिकं च प्रतिपेदे । मन्दरादयश्च सप्तपञ्चाशद्गणधराः स्थापिताः प्रभुणा । प्रभुतीर्थे षण्मुखो यक्षः । स च शिखिवाहनो गौरः फलचक्रेषुखड्गपाशाक्षसूत्रभृद्भिर्दक्षिणैर्नकुलचक्रधनुः-फलकाङ्कुशभृदभयदैर्वामैर्भुजैर्युक्तः । विदिता शासनदेवी । सा च स्वर्णवर्णा पद्मासना बाणपाशभृद्दक्षिणदोर्द्वया धनुर्नागभृद्वामभुजयुगा । अन्यदा प्रभुर्द्वारवत्यां

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समवसृतः भद्रस्वयंभुवौ च तत्रायातौ वन्दितुम् । श्रुत्वा देशनां च प्रतिबुद्धौ। जगृहतुः सम्यक्त्वधर्मम् । प्रभुरप्यन्यत्र विजहार ।।

सर्वपरिवारे च प्रभोः साधुसहस्रा अष्टषष्ठिः । आर्यिकाणामष्टशताधिकं लक्षमेकम् । चतुर्दशपूर्विणामेकादशशती । अवधिज्ञानिनामष्टचत्वारिंच्छती । मनःपर्ययिणां केवलिनां च पञ्चपञ्चाशच्छती । वैक्रियलब्धिमतां नवतिशती । वादिनां सहस्रत्रयी द्विशती च । श्रावकाणां साष्टशती लक्षद्वयी । श्राविकाणां लक्षचतुष्टयी चतुस्त्रिंशत्सहस्री च ।।

आसन्नमोक्षश्च प्रभुः षड्भिः साधूनां सहस्रैः समं सम्मेतगिरौ गत्वा मासमनशन्यूर्ध्वस्थ एवाऽऽषाढकृष्णसप्तम्यां रेवत्यां मुक्तिसुखभाग् बभूव । मोक्षमहिमा च प्राग्वत् । कौमारे पञ्चदश, राज्ये त्रिंशत्, व्रते पञ्चदशवर्षलक्षाः । एवं षष्ठिरब्दलक्षाः प्रभोः सर्वायुः । श्रीवासुपूज्यमोक्षाद् विमलनाथमोक्षस्य सागरोपमाणि त्रिंशदन्तरमिति।

**दृढगुणं विमलस्य जिनस्य यः, सुचरितं वहते हृदि [१] वर्मवत्।**
**निविडकर्मसमूहचमूवृतं, जयति मोहमहीशमसौ क्षणात्।।१४७।।**

(द्रुतविलम्बितम्)

## ।।भद्र-स्वयम्भू-मेरकाणां चरित्राणि।।

जम्बूद्वीपेऽपरविदेहेषु आनन्दकर्यां पुर्यां नन्दिसुमित्रो राजा राज्यं परित्यज्य सुव्रतसूरिपादान्ते प्रव्रज्य तपस्तप्त्वा समाधिनाऽनसनेन च मृत्वाऽनुत्तरविमानवासी देवो जातः।।

जम्बूद्वीपे भरते श्रावस्त्यां धनमित्रो राजा । तन्मित्रं बलिः । एकदा धनमित्रनृपः स्वं राज्यं पणीकृत्य बलिना समं [२] सारैः क्रीडन् राज्यं हारितवान् । ततो गृहीतं बलिना राज्यम् । निसृतोऽङ्गमात्रेण धनमित्रः । गच्छता च दृष्टः सुदर्शनमुनिः।

१ कवचवत्।। २ अक्षपाशकैः।।

Jain Educationa International	For Personal and Private Use Only	www.jainelibrary.org

श्रुतस्तत्पार्श्वे तेन धर्मः, प्रतिबुद्धश्च। जग्राह स व्रतम् । तप्त्वा च महातपश्चकाराऽन्तेऽनशनम् । स्मृत्वा च राज्यापहारं यद्यस्य तपसः फलमस्ति तदा बलिवधाय भूयासमिति कृत्वा निदानं मृत्वा चाऽच्युतकल्पे देवो जातः । बलिरपि प्रान्ते राज्यं प्रोज्झ्य प्रव्रज्य समाधिना मृत्वा वैमानिके देवो जातः ।।

ततश्च्युत्वा भरते नन्दनपुरे समरकेसरि नृपस्य सुन्दर्यां भार्यायां पुत्रत्वेनोत्पन्नः। समये च श्यामः षष्ठिधनुर्मानः षष्ठिवर्षलक्षायुरर्द्धचक्री पुत्रो जातः । कृतं मेरक इति नाम । प्राप्तयौवनेन साधितं भरतार्द्धम् ।।

अस्मिन्नेव भरतार्द्धे रुद्रो राजा । सुप्रभा-पृथिवी च तस्य द्वे भार्ये। नन्दिसुमित्रजीवोऽनुत्तरविमानाच्च्युत्वा सुप्रभायाः कुक्षाविइभेन्दू वृषभः सर इति चतुःस्वप्नसूचितहलभृज्जन्मा पुत्रो जातः । कृतं च भद्र इति तस्य नाम । धनमित्रनृपजीवोऽच्युताच्च्युत्वा पृथिवीकुक्षाववतीर्य सिंहाभिषेककुम्भाब्धिसूर्याग्नीरत्नसञ्चय- इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा पुत्रो जातः । स्वयम्भूरिति कृतं तस्य नाम । तौ च गौरश्यामौ नीलपीताम्बरौ तालगरुडध्वजौ षष्ठिधनुर्मानौ प्रीत्यान्योन्यमवियुक्तौ वर्तेते।।

अन्यदा स्वपुरीपरिसरे क्रीडद्भ्यां ताभ्यां समावासितं शिबिरं दृष्टम् । पृष्टश्चामात्यः किमेतदिति । तेनोक्तम् । शशिसौम्येन राज्ञा प्रहितमिदं हस्त्यश्वादिकं प्राभृतं मेरकयोग्यमिति । ततः कुपिताभ्यां ताभ्यां तत्सर्वं गृहीतं प्राभृतम् । मेरकोऽपि ज्ञातवृत्तान्तः सर्वसन्नाहेन तयोरुपर्यागतः । तावपि प्रवृत्तौ योद्धुम् । युद्धमानस्य च मेरकस्य क्षीणान्यस्त्राणि । क्षिप्तं तेन चक्रम् । स्वयम्भुवा च तेनैव चक्रेण हतो मेरकः । पपात नभसः स्वयम्भुवः शिरसि पुष्पवृष्टिः। उद्घुष्टं देवैर्जयत्यर्द्धचक्री स्वयम्भूरिति। साधितं भरतार्द्धं स्वयम्भुवा । व्यावृत्तेन च दिग्जयाद् मगधेष्वागतेन दृष्टा कोटिशिला। वामदोष्णा समुत्पाट्य कण्ठं यावत् मुक्ता स्वस्थाने । प्राप्तवांश्च द्वारकाम् । जातस्तत्रार्द्धचक्रित्वाभिषेकः । श्रीविमलनाथपार्श्वे च द्वाभ्यामपि समये प्रतिपन्नं सम्यक्त्वम् । आसन्नावसानश्च क्रूरकर्मा दुष्टाध्यवसायो मृत्वा षष्ठीमवाप पृथ्वीं स्वयम्भूः । अस्य च कौमार्ये माण्डलिकत्वे च प्रत्येकं द्वादशवर्षसहस्राः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दिग्जये नवति वर्षाणि । राज्ये वर्षाणामेकोनषष्ठिलक्षाः पञ्चसप्ततिसहस्राः नवशती दशाधिका । षष्ठिवर्षलक्षायुः सर्वायुरिति । भद्रोऽपि भ्रातृविरहवैराग्याद् मुनिचन्द्रमुनिपादान्ते प्रव्रज्य कर्मक्षयाद् मोक्षं गतः । वर्षाणां पञ्चषष्ठिलक्षाणि भद्रस्यायुरिति।।

**।।समाप्तम्।।**

## ।।श्रीअनन्तनाथचरित्रम्।।

**दृष्टेन येन रविणेव तमःसमस्त-**
**मस्तं व्रजत्युदयते दिनमङ्गभाजाम् ।**
**तस्य प्रशस्यकमलोन्नतिहेतुधाम्नो,**
**नाम्नः स्मृतिर्जगदनन्तजिनस्य पायात् ।।१४८।।** (वसन्ततिलका)

धातकीखण्डे प्राग्विदेह ऐरावते विजयेऽरिष्टायां पुर्यां पद्मरथो राजा राज्यं पालयति । एकदा तेन राज्ञा ध्यानधारणादिभिर्देहः स्थिरो भवतीति कौलमार्गानुगामिनः केचिदेवं गलगर्जि कुर्वाणाः श्रुताः। ततः प्रवृत्तश्चिन्तयितुम्—

**वपुःकारैर्वेदं क इव बहुमानोऽत्र सुधिया-**
**मध्येऽस्मिन्नात्मस्थितिमतिचिरं कः स्पृहयति ।**
**चिराद् वा शीघ्रं वा, भवति यदि कर्मव्यपगम-**
**स्तदा सर्वं सिद्धं, सुखमपरथा केवलभवः ।।१४९।।**

(शिखरिणी)

अनेनैव प्रवर्द्धमानेन भावेन प्रवर्द्धितवैराग्यः सहसैव राज्यं परित्यज्य चित्तरक्षगुरुपार्श्वे प्रव्रजितः । अर्हद्भक्त्यादिस्थानैस्तीर्थकरनामकर्मोपार्ज्य दुष्करं तपस्तप्त्वा समाधिना च मृत्वा प्राणतकल्पे पुष्पोत्तरविमाने देवो जातः ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जम्बूद्वीपे दक्षिणभरतार्द्धेऽयोध्यायां सिंहसेनो राजा । सुयशाः पट्टराज्ञी । श्रावणश्यामसप्तम्यां रेवत्यां प्राणताच्च्युत्वा पद्मरथनृपजीवश्चतुर्दशस्वप्नसूचिततीर्थकर-जन्मा सुयशःकुक्षाववतीर्णः । वैशाखकृष्णत्रयोदश्यां रेवत्यां श्येनलाञ्छनः स्वर्णवर्णः पञ्चाशद्धनूच्चस्त्रिंशद्वर्षलक्षायुर्ज्ञानत्रयधरः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । गर्भस्थे प्रभौ पित्रा परबलमनन्तं जितम् । ततोऽनन्तजित् इति महोत्सवपूर्वं कृतं प्रभोर्नाम । प्राप्ततारुण्यश्च कारितः प्रधानराजपुत्र्याः पाणिग्रहणम् । जन्मतोऽर्द्धाष्टमेषु गतेषु वर्षलक्षेषु स्थापितः पित्रा राज्ये ।।

पञ्चदशवर्षलक्षाणि राज्यं प्रपाल्य सांवत्सरिकं दानं दत्त्वा कृतषष्ठः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा वैशाखकृष्णचतुर्दश्यां रेवत्यामपराह्णे नृपसहस्रेण समं शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः पश्चिमवया मयावद्यं निषिद्धमिति चारित्रं प्रभुः प्रतिपन्नवान् । समुत्पन्नमनःपर्ययज्ञानश्च द्वितीयदिने वर्द्धमानपुरे विजयनृपगृहे परमान्नेन चकार पारणम् । पञ्चदिव्यानि तत्राविर्भूतानि । शक्रोऽपि प्रभुकेशान् क्षीरार्णवे क्षिप्त्वा गतः कृतनन्दीश्वरयात्रः स्वं स्थानम् । अत्रान्तरे सुप्रभादीनामुत्पत्तिर्वाच्या ।।

प्रभुरप्यन्यत्राऽन्यत्र त्रिवर्षी विहृत्य पुनः सहस्राम्रवणमागतः । षष्ठेन तपसा अशोकतरुतले ध्यानस्थस्य पूर्वाह्णे वैशाखकृष्णचतुर्दश्यां रेवत्यां प्रभोर्घातिकर्मक्षयात् केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा देशना–

**प्राग्वत् सम्प्रतिजीवितव्यममितं, नास्त्येव तन्नीयते,**
**निर्भाग्यैर्मितमप्यरैरिव नरै-र्बम्भ्रम्यमाणैर्वृथा ।**
**स्थानस्थैरतिनिर्मलेन लघुना-प्येतेन धन्यैः पुन-**
**र्माणिक्येन वणिग्जनैरिव परं, कल्याणमावर्ज्यते ।।१५०।।**

(शार्दूलविक्रीडितम्)

इत्याद्याकर्ण्य बहुभिः प्रतिबुद्धैः प्राणिभिः प्रव्रज्या सम्यक्त्वादिकं च प्रपेदे।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यशःप्रभृतयः पञ्चाशच्च गणधराः प्रभुणा प्रतिष्ठिताः । प्रभुतीर्थे पातालो यक्षः । स च त्रिमुखो मकरस्थो रक्तवर्णः पद्मखड्गपाशिभिर्दक्षिणैर्नकुलफलकाक्षसूत्रिभिश्च त्रिभिर्वामैर्भुजैर्युक्तः । अङ्कुशा शासनदेवी । सा च गौरा पद्मस्था खड्गपाशिभ्यां दक्षिणाभ्यां फलकाङ्कुशिभ्यां वामाभ्यां दोर्भ्यां युक्ता।।

अन्यदा प्रभुर्द्वारकायां समवसृतः तत्र च समागतौ वन्दितुं सुप्रभपुरुषोत्तमौ गृहीतस्ताभ्यां प्रतिबुद्धाभ्यां सम्यक्त्वमूलो गृहस्थधर्मः । प्रभोरपि सर्वपरिवारे साधूनां षट्षष्ठिसहस्राः । चतुर्दशपूर्विणां नवशती । अवधिज्ञानिनां त्रयश्चत्वारिंशच्छती । मनःपर्यायिणां पञ्चचत्वारिंशच्छती । केवलिनां पञ्चसहस्री। वैक्रियलब्धिमतामष्टसहस्री। वादिनां द्वात्रिंशच्छती । साध्वीनां द्वाषष्ठिसहस्राः । श्रावकाणां लक्षद्वयी षष्ठिशती च । श्राविकाणां चतुर्लक्षी चतुर्दशसहस्री च।।

आसन्नमोक्षश्च सप्तसाधुसहस्र्या समं सम्मेताद्रौ गत्वा मासमनशन्यूद्र्ध्वस्थ एव चैत्रशुक्लपञ्चम्यां रेवत्यां सर्वकर्मक्षयाद् मोक्षसुखमग्नः प्रभुर्बभूव । मोक्षमहिमा च प्राग्वत् । कौमारे वर्षाणां सप्तलक्षी सार्द्धा। राज्ये पञ्चदशलक्षी । व्रते सप्तलक्षी सार्द्धा। एवं त्रिंशद्वर्षलक्षाः प्रभोः सर्वायुः । विमलस्वामिमोक्षान्नवसु सागरोपमेषु गतेषु श्रीमदनन्तजिनस्य मोक्षः ।।

**श्रीमदनन्तजिनेन्दोश्चरितार्थश्चान्दनो रस इवाऽयम् ।**
**हृदि विलसन् पुण्यवतां व्यपनयतां कर्मघर्मरुजम्।।१५१।।** (आर्या)

## ।।सुप्रभ-पुरुषोत्तम-मधु-कैटभानां चरित्रम्।।

जम्बूद्वीपे प्राग्विदेहेषु नन्दपुर्यां महाबलो राजा राज्यं प्रोज्झ्य वृषभमुनिपार्श्वे प्रवव्राज । तपस्तप्त्वा समाधिना च मृत्वा सहस्रारे देवो जातः।।

अस्मिन्नेव भरतार्द्धे कौशाम्ब्यां समुद्रदत्तो राजा । नन्दा पट्टराज्ञी । अन्यदा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मलयभूस्वामी चण्डशासनो नाम राजा तस्य गृहे मित्रमित्यायातः । प्राघुणो निमन्त्रितः समुद्रदत्तेन राज्ञा । कृतं स्वागतम् । भोजनावसरे च दृष्टा तेन नन्दा । क्षुब्धश्चित्ते कृतं नन्दाहरणे मनः । विश्वास्य च समुद्रदत्तं नन्दां हृत्वा गतः स स्वं स्थानं । प्रत्याहर्तुमसमर्थश्च समुद्रदत्तोऽपमानेन वैराग्येण राज्यं हित्वा श्रेयांसमुनिपार्श्वे प्रव्रजितः। अत्युग्रं च तपस्तप्त्वा प्रान्तसमये नन्दाहर्तुर्वधाय स्यामिति कृतनिदानो मृत्वा सहस्रारे देवो जातः ।।

चण्डशासनजीवोऽपि भवं भ्रान्त्वाऽत्रैव भरते पृथ्वीपुरे विलासो नाम राजा। गुणवती तस्य भार्या । तयोः प्रशस्यलक्षणः पुत्रो जातः । स च मधुरिति नाम्ना त्रिंशद्वर्षलक्षायुः पञ्चाशद्धनूच्चः। सर्वोत्कटकैटभश्च तस्य सोदरः।।

द्वारकापुर्यां सोमो राजा । सुदर्शना सीता च तस्य द्वे भार्ये । सहस्राराद् महाबलजीवश्च्युत्वा सुदर्शनाकुक्षाववतीर्णः । इभेन्दू वृषभः सर इति चतुःस्वप्र-सूचितबलभद्रजन्मा पुत्रो जातः । कृतं च सुप्रभ इति तस्य नाम । समुद्रदत्तजीवोऽपि सहस्राराच्च्युत्वा सीताकुक्षाववतीर्णः । सिंहाभिषेककुम्भाब्धिसूर्याग्नीरत्नसञ्चय इति स्वप्नसूचितार्द्धचक्रिजन्मा पुत्रो जातः । कृतं च पुरुषोत्तम इति तस्य नाम । तौ च गौरश्यामौ तालगरुडध्वजौ पञ्चाशद्धनूच्चौ द्वौ स्नेहेन वर्तेते।।

एवं च तौ महाप्राणादिगुणगणालङ्कृताङ्गौ दृष्ट्वा कलहकौतुकी नारदो मधुपार्श्वे गतः । मधुना प्रोक्तम्- मुने ! किं ते प्रियं करोमि ? कं वा देशं ददामीति । तेनोक्तम्– मधो ! मुधैव गर्जसि ! कस्त्वमिदानीं भरतार्द्धे! सम्प्रति सोमसुतौ प्रतिबन्धकौ भवदीयलक्ष्म्या इति । ततः कोपकम्प्रो मधुः सर्वसन्नाहेन गतः सहसैव द्वारकां प्रति । तावप्यागतौ सम्मुखम् । युध्यमानानां च तेषां क्षीणान्यायुधानि । क्षिप्तं मधुना चक्रम् । तेनैव चक्रेण पुरुषोत्तमश्चिच्छेद मधुमूर्द्धानम् । पुरुषोत्तमशिरसि च पपात पुष्पवृष्टिः । जयत्यर्द्धचक्री पुरुषोत्तम इत्यद्धुष्टं देवमागधैः । तस्मादेवस्थानाद्गतः पुरुषोत्तमो दिग्जयार्थम् । साधितभरतार्द्धश्च समागतो मगधेषु मधुद्विट् । दृष्टा तत्र कोटिशिला । समुत्पाट्योरस्थलं यावत् पुनस्तेन मुक्ता स्वस्थाने एव । क्रमेणागतो

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

द्वारकायाम् । कृतस्तत्रार्द्धचक्रित्वाभिषेकः । अन्यदा समवसृतस्तत्रानन्तजिनः । गतौ तौ वन्दितुम् । प्रतिपन्नं द्वाभ्यामपि सम्यक्त्वम् ।।

आसन्नावसानश्च पुरुषोत्तमः शमसंवेगादिकं परित्यज्य क्रुरान्तरात्मा मृत्वा षष्ठिं पृथ्वीं प्राप्तवान् । कौमारे वर्षाणां सप्तशती । मण्डलिकत्वे त्रयोदशशती । दिग्जयेऽशीतिः । राज्य एकोनत्रिंशल्लक्षाः सप्तनवतिसहस्राः नवशती विंशतिश्च । एवं पुरुषोत्तमस्य त्रिंशद्वर्षलक्षाः सर्वायुः । सुप्रभोऽपि भ्रातृविरहवैराग्यात् प्रव्रज्य कर्मक्षयाद् मोक्षं प्राप्तवान् । पञ्चपञ्चाशद्वर्षलक्षाः सुप्रभस्य सर्वायुरिति।।

## ।।समाप्तम्।।

## ।।श्रीधर्मनाथचरित्रम्।।

**लोष्टोऽपि चिन्तितमणिर्द्रुमकोऽपि कल्पः,**
**शाखी जरत्यपि गवी नवकामधेनुः ।**
**यन्नाममन्त्रसततस्मृतितो नृणां स्याद्,**
**देवः कुकर्महतयेऽस्तु स धर्मनाथः ।।१५२।।**(वसन्ततिलका)

धातकीखण्डे प्राग्विदेहे भरतविजये भद्रिलपुरे दृढरथो राजा प्रजामनुशास्ति। अन्यदा स राजा समयान्तरदृष्टतारुण्यां पलितकलितमौलिमेकां नायिकां निरीक्ष्य चिन्तितवान्–

**यस्याः कान्तितिरोहिते वपुषि न, पापु प्रचारं दृशो,**
**यूनां तैर्बहुमन्यते स्म तदपि, स्वात्मा यदालोकनात् ।**
**कन्दर्पोरगमुक्तकञ्चुकनिभान् तान् बिभ्रती मूर्द्धजान्,**
**मूढस्यापि बलादियं नयति मे, चेतो विरक्तिं प्रति ।।१५३।।**

(शार्दूलविक्रीडितम्)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अनेनैव भावेन प्रवर्द्धमानवैराग्यः सहसैव राज्यमुत्सृज्य विमलवाहन-गुरुपार्श्वे प्रव्रजितः । तीव्रं च तपस्तप्त्वाऽर्हद्भक्त्यादिभिः स्थानकैस्तीर्थ-करनामकर्मोपार्ज्य समाधिना च मृत्वा वैजयन्ते विमाने देवो जातः।।

जम्बूद्वीपे भरतार्द्धेऽत्रैव रत्नपुरे भानुर्नृपः । सुव्रता पट्टराज्ञी । वैशाखशुक्लसप्तम्यां पुष्ये वैजयन्ताद् दृढरथनृपजीवश्च्युत्वा सुव्रतादेव्याः कुक्षाववतीर्णः । माघशुक्लतृतीयायां पुष्ये वज्रलाञ्छनः स्वर्णवर्णः पञ्चचत्वारिंशद्धनुर्मानो दशवर्षलक्षायुश्चतुर्दशस्वप्नसूचित-तीर्थकरजन्मा ज्ञानत्रयधरः पुत्रो जातः । जन्मोत्सवः प्राग्वत् । गर्भस्थे प्रभौ जनन्या विशेषतो धर्मोद्यमः समभूदिति पित्रा महोत्सवपूर्वं धर्म इति कृतं नाम प्रभोः । प्राप्ततारुण्यश्च कारितः पित्रा राजपुत्र्याः पाणिग्रहणोत्सवम् । जन्मतो वर्षलक्षद्वये सार्द्धे गते पित्राऽभिषिक्तः स्वराज्ये ।।

पञ्चवर्षलक्षीमतिक्रम्य राज्ये सांवत्सरिकं दानं दत्त्वा शक्रादिकृतनिष्क्रमणो-त्सवः षष्ठेन तपसा वप्रकाञ्चनोद्याने माघशुक्लत्रयोदश्यां पुष्येऽपराह्णे राज्ञां सहस्रेण समं शक्रन्यस्तदेवदूष्यः पश्चिमवया मयावद्यं निषिद्धमिति प्रपन्नवान् प्रव्रज्याम्। मनःपर्ययज्ञानं चोत्पन्नम्। शक्रोऽपि प्रक्षिप्य क्षीराब्धौ प्रभुकेशान् कृतः(-त)-नन्दीश्वरयात्रः सम्प्राप्तः स्वं स्थानम्। द्वितीयेऽह्नि सोमनसे पुरे धर्मसिंहनृपगृहे परमान्नेन चकार प्रभुः पारणम्। पञ्चदिव्यानि तत्राविर्भूतानि। अत्रान्तरे सुदर्शनादीनामुत्पत्तिः।।

प्रभुरपि वर्षद्वयमन्यत्रान्यत्र विहृत्य पुनर्वप्रकाञ्चनोद्याने समायातः। पौषपूर्णिमायां पुष्ये कृतषष्ठस्य दधिपर्णतरुतलस्थस्य पूर्वाह्णे केवलज्ञानमुत्पन्नम् । समवसरणादिकं च प्राग्वत् । समायाताः शक्रादयः । कृता प्रभुणा । देशना—

**लोकोत्तरा मनसि यस्य कृपा त्रपा च,**
**यस्याऽतिनिर्मलतमो विनयो नयश्च ।**
**पापाय यस्य न धनं न च यौवनं च,**
**च्छेकः स एकतम एव नरो नृलोके ।।१५४।।**(वसन्ततिलका)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्याद्याकर्ण्य बहवः प्रतिबुद्धाः प्राणिनः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकम्। अरिष्ठादयस्त्रिचत्वारिंशद् गणधराः स्थापिताः । प्रभुतीर्थे किन्नरो यक्षः । स च त्रिमुखः कूर्मस्थो रक्तवर्णो दक्षिणैर्मातुलिङ्गगदाभृदभयदैर्वामैर्नकुलपद्माक्षमालावद्भिर्दोर्भिर्लक्षितः । कन्दर्पा च शासनदेवी । सा च गौरा मत्स्यस्था उत्पलाङ्कुशभृद् दक्षिणदोर्द्वया पद्मधराभयदवामद्विभुजा।।

अन्यदा प्रभुरश्वपुरे समवसृतः। तत्र वन्दितुमागतौ सुदर्शनपुरुषोत्तमौ। प्रतिबुद्धौ च जगृहतुः सम्यक्त्वम्।।

सर्वपरिवारे च प्रभोः साधूनां चतुःषष्ठिसहस्री । साध्वीनां द्वाषष्ठिसहस्री चतुःशती च । चतुर्दशपूर्विणां पञ्चशती । अवधिज्ञानिनां त्रिसहस्री षट्शती च मनःपर्ययिणां पञ्चचत्वारिंशच्छती । केवलिनामप्येवम् । वैक्रियलब्धिमतां सप्तशती। वादिनामष्टाविंशतिशतानि । श्रावकाणां लक्षद्वयी चत्वारिंशत् सहस्री च । श्राविकाणां चतुर्लक्षी त्रयोदशसहस्री च ।।

आसन्नमोक्षश्च प्रभुर्मुनिवराणामष्टाभिः शतैः समं सम्मेताद्रौ गत्वा मासमनशन्यूर्ध्वस्थ एव ज्येष्ठशुक्लपञ्चम्यां पुष्ये सर्वकर्मक्षयाद् मुक्तिसुखभाग् बभूव। मोक्षमहिमा च प्राग्वत् । अनन्तनाथनिर्वाणाच्चत्वारिसागरोपमानि श्रीधर्मनाथमोक्षस्यान्तरम् । कौमारे वर्षाणां लक्षद्वयं सार्द्धम् । राज्ये पञ्चलक्षाः । व्रते लक्षद्वयी सार्द्धा। एवं दशवर्षलक्षाः प्रभोः सर्वायुः ।।

**श्रीधर्मनाथस्य चरित्रमेत-**
**ज्जागर्ति निर्यामकवद् यदीये ।**
**मनोवहित्रे न हि तस्य पारं,**
**दूरेऽन्तरे संसृतिसागरस्य ।।१५५।।** (उपजातिः)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ।। सुदर्शन-पुरुषसिंह-निशुम्भानां चरितम् ।।

जम्बूद्वीपेऽपरविदेहे विशोकायां पुर्यां पुरुषवृषभो राजा प्रजापालमुनेः पार्श्वे प्रव्रज्य तपस्तप्त्वा समाधिना च मृत्वा सहस्रारे सुरो जातः । अष्टादशसागरोपमाण्यायुरस्य। षोडशसु सागरोपमेषु गतेषु पोतनपुरे विकटो राजा राज्यं कुर्वन् राजसिंहेन राज्ञा भुजयुद्धे निर्जितः। ततो लज्जितो राज्यं परित्यज्य प्रव्रज्य चाऽनशने स्थितः। राजसिंहनृपोच्छेदाय समर्थो भूयासमहमिति सनिदानो मृत्वेशाने द्विसागरोपमायुर्देवो जातः ।।

राजसिंहनृपोऽपि भवं भ्रान्त्वाऽस्मिन्नेव भरतार्द्धे हरिपुरे निशुम्भो नाम श्यामवर्णः पञ्चचत्वारिंशद्धनूच्चो दशवर्षलक्षायुस्त्रिखण्डभोक्ता प्रत्यर्द्धचक्री जातः।।

अस्मिन्नेव भरतार्द्धेऽश्वपुरे शिवो राजा विजया अम्मा च तस्य द्वे भार्ये। पुरुषवृषभनृपजीवः सहस्राराच्च्युत्वा इभेन्दू वृषभः सर इति चतुःस्वप्नसूचितबलजन्मा गौरवर्णः पुत्रो जातः । सुदर्शन इति कृतं तस्य नाम । विकटनरनाथजीवोऽपीशानाच्च्युत्वा सिंहाभिषेककुम्भाब्धिसूर्याग्नीरत्नसञ्चय इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा अम्माकुक्षाववतीर्णः । समये च श्यामवर्णः पुत्रो जातः । पुरुषसिंह इति च कृतं नाम । नीलपीताम्बरौ तालतार्क्ष्यध्वजौ पञ्चचत्वारिंशद्धनूच्चौ द्वौ स्नेहेन वर्तेते ।।

अन्यदा प्रान्तभूपालसाधनाय प्रहितः सुदर्शनः पित्रा । ततः स्नेहातिशयात् पुरुषसिंहोऽपि चलितः । सहसैव द्वितीयप्रयाणे च निर्बंधपूर्वं निवर्तितः सीरिणा । परं तदागमनाकाङ्क्षी स्थितश्चिरतरं तत्र सः। इतश्च दाहज्वरार्तेन पित्रा तत्कालमेव प्रहितमाकारणम् । गतः पितृसमीपे। पुरुषसिंहो मिलितः पित्रोः । परमनिवर्त्तको रोग इति तमनुज्ञाप्य जनन्या वह्निरह्नाय साधितः । ततः पितापि प्राप्तः पञ्चत्वम् । कृतमनेन सर्वमौर्ध्वदेहिकाद्यम् । लब्धविजयश्चागतः सीरी ।।

यावच्छोकाकुलौ तौ तिष्ठतस्तावन्निशुम्भेन प्रहितस्तयोरन्तिकं स्वदूतः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रोक्तं तेन- कुमारौ ! युवयोः पिता सदैवाऽस्मदाश्रित एवाऽभत्, ततस्तदभावे युवां मया पाल्यौ। दूरस्थयोर्युवयोः कस्त्राता ? मत्पार्श्ववर्तिनौ तु वां न कोऽप्यभिभवेदिति शीघ्रमागच्छतामत्रेति । ताभ्यामप्युक्तम्- दूत ! महदाकूतं भवत्स्वामिनो देशत्याजनेन। जनमात्रावावां कर्तुमीहते हतको निशुम्भः। कुम्भदासी कुर्वस्तमेवावामपि । कस्यापि साहाय्येन वर्धिष्यावहे । तद्गच्छ तत्सविधं ब्रूयाच्चैवम्। यदि निशुम्भ! तव रक्षणे शक्तिस्तदा स्वमेवावाभ्यां निशुम्भ्यमानं रक्षेरिति । सोऽपि ज्ञातवृत्तान्तः कृतान्त इव कुपितः सन्नह्य समायातस्तयोरुपरि। प्रवृत्तं तेषां युद्धम्। युध्यमानानां क्षीणान्यायुधानि । क्षिप्तं निशुम्भेन चक्रम् । तेनैव चक्रेण पुरुषसिंहो निशुम्भं न्यशुम्भयत् । जयत्यर्द्धचक्री पुरुषसिंह इत्युद्घुष्टं नभसि सुरमागधैः। पातिता च पुष्पवृष्टिः । साधितमनेन भरतार्धम्। व्यावर्त्तमानेन मगधेषु कोटिशिलां समुत्पाट्य वामदोष्णा हृदयं यावद् विमुच्य स्वस्थाने सम्प्राप्तो स्वपुरे । जातस्तत्राऽर्द्धचक्रित्वाभिषेकः। समवसृतस्तत्राऽन्यदा श्रीधर्मनाथः। तत्पार्श्वे द्वाभ्यामपि प्रतिपन्नं सम्यक्त्वम् । आसन्नावसानः पुरुषसिंहोऽपि हिंस्रकर्मपरो मृत्वा षष्ठीं पृथ्वीं गतः ।।

कौमारे वर्षाणां त्रिंशती। मण्डलिकत्वे द्वादशशती सार्द्धा । दिग्जये सप्ततिः। राज्ये लक्षनवकं सहस्रा अष्टानवतिः त्रिशत्यशीतिश्च । एवं दशवर्षलक्षी सर्वायुः। सुदर्शनोऽपि भ्रातृविरहवैराग्यात् प्रव्रज्य सर्वकर्मक्षयाद् मोक्षं गतः । वर्षाणां सप्तदशलक्षाण्यायुः सुदर्शनस्येति ।।

## ।।मघवचक्रिचरितम्।।

श्रीवासुपूज्यतीर्थेऽत्रैव भरते महीमण्डनपुरे नरपतिनृपो न्यायेन राज्यं प्रपाल्याऽन्ते समये प्रव्रज्ययाऽऽत्मानं तपसा च संशोष्य समाधिना मृत्वा मध्यमग्रैवेयके देवो जातः।।

जम्बूद्वीपेऽत्रैव भरते श्रावस्त्यां समुद्रविजयो राजा । भद्रा महादेवी ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मध्यमग्रैवेयकान्नरपतिनृपजीवश्च्युत्वा भद्रायाः कुक्षाववतीर्णः । चतुर्दशमहास्वप्नसूचित-चक्रिजन्मा स्वर्णवर्णः सार्द्धद्विचत्वारिंशद्धनूच्चः पञ्चवर्षलक्षायुः समये पुत्रो जातः । मघवेवायमवतीर्णः इति पितृभ्यां सान्वयमेव मघवा इति कृतं नाम । प्राप्तः तारुण्यं पितुरनन्तरं च जातो राजा । समुत्पन्नं तस्याऽस्त्रशालायां चक्ररत्नम् । यथास्थानमन्यान्यपि पुरोधःप्रभृतीनि चतुर्दशरत्नानि क्रमेण सम्पन्नानि ।।

चक्रमार्गानुगश्च प्रस्थितश्चक्री दिग्जयाय । वशीकृता मागधवरदामप्रभास-सिन्धुवैताढ्यतमिस्राद्वारस्थकृतमालदेवाः । सेनान्या सिन्धुप्रत्यग्निष्कुटः साधितः, तमिस्राकपाटोद्घाटनं कृतम्, किराताश्चापाताः साधिताः । पूर्वसिन्धुनिष्कुटः साधितः। चक्रिणा हिमवत्कुमारो वशीकृतः । ऋषभकूटाद्रौ स्वनाम लिखितम् । सेनान्या गङ्गायाः पूर्वनिष्कूटः साधितः । चक्रिणा स्वयं गङ्गादेवी वैताढ्यश्रेणिद्वयं खण्डप्रपाताद्वारस्थनाट्यमालदेवश्च वशीकृतः । सेनान्या खण्डप्रपातायाः कृतं कपाटोद्घाटनम् । प्रत्यग्निष्कूटश्च साधितः । चक्रिणाऽपि निःसृत्य गुहायाः साधिता नवनिधयः । ततः सम्प्राप्तः स्वस्थाने । कृतः सदेवैर्नृपैश्चक्रिपदाभिषेकः । सम्पूर्णायामपि चक्रवर्तिलक्ष्म्यां परं न जातु प्रमद्वरश्चक्री सञ्जातः, किन्तु दृढसम्यक्त्व एव स महात्मा बभूव । द्वादशविधमपि श्रावकधर्मं विधिवदपालयच्च । अवसाने च व्रतं परिपाल्य निरतिचारं चानशनं साधयित्वा मृत्वा सनत्कुमारे देवो जातः । मघवतश्च कौमारे मण्डलिकत्वे च प्रत्येकं वर्षाणां पञ्चविंशतिः सहस्राः । दिग्जये दशसहस्राः । चक्रवर्तित्वे लक्षत्रयं नवतिः सहस्राश्च । व्रते पञ्चाशत् सहस्राः । एवं पञ्चवर्षलक्षाणि मघवच्चक्रिणः सर्वायुरिति ।।

## ।।सनत्कुमारचरित्रम्।।

काञ्चनपुरे विक्रमयशा इति राजा । तेनाऽन्तःपुरस्त्रीणां पञ्चशतानि मेलितानि। तथाऽपि तस्य न सन्तोषः । तत्र च पुरे नागदत्तो नाम सार्थवाहः। तस्य विष्णुश्रीर्भार्या। तयोरन्योन्यमवियुक्तयोः सारसयोरिव कालोऽतिक्रामति । एकदा विक्रमयशसा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

राज्ञा सा स्वगृहगवाक्षनिषण्णा दृष्टा विष्णुश्रीः । जातस्ततः प्रभृति कामग्रहग्रहिलोऽसौ। विमुच्य न्यायमार्गं बलादाच्छिद्य तामन्तःपुरे चिक्षेप । रममाणस्तया समं गमयति कालम् । सार्थवाहश्च तद्विरहविह्वलस्तन्मयं जगत् पश्यन्ननाप्नुवंश्च तां रात्रौ दिवा च खिद्यमानोऽस्ति ।।

राजानं चाऽत्यन्तं तदासक्तं दृष्ट्वा प्रकुपिताः सर्वा अप्यन्तःपुराङ्गनाः प्रवृत्ताश्च चिन्तयितुम्–

**पत्यौ न प्रथयन्ति कामपि मनः-प्रीतिं स्त्रियस्तद्गृह-**
**व्यापारे शिथिलाः स्युरेव कुटिला-स्तद्देहकर्मस्वपि ।**
**विश्वासं कुरुतामभीष्टविषये, तस्यापि चेतः क्व वा,**
**पुंसा प्राज्यकलत्रकेण निहितः, स्वात्मात्मनैवासुखे ।।१५६।।**
(शार्दूलविक्रीडितम्)

अपि च–

**प्रायेण पुंसो धनिनोऽपि पत्नी,**
**द्वयं सुखोच्छित्तिनिमित्तमेव ।**
**किमौषधीनामधिपस्य पश्य,**
**क्षयाय न स्यादपरा द्वितीया ।।१५७।।** (उपजातिः)

इत्थमन्योन्यं विरक्ताः सत्यः सम्भूय ताः क्रूरचित्ताश्चक्रुर्विष्णुश्रियं प्रति कार्मणम् । तेन च कार्मणप्रयोगेण विष्णुश्रीः क्रमेण क्षीयमाणतनुर्व्यपद्यत । राजा चाऽत्यन्तमोहमूढस्तद्वपुषोऽग्निसंस्कारं कर्तुं न ददाति । भूतात्त इव विसंस्थुलं केवलं पतति विलपति च । ततोऽमात्यैर्निद्रालौ राजनि विष्णुश्रीकलेवरं श्मशाने त्याजितम्। मुक्ताश्च पार्श्वतः शृगालादिरक्षणाय यामिकाः । प्रबुद्धेन च सता राज्ञा तदपश्यताऽन्नपाननिषेधः कृतः । ततोऽमात्यैः श्मशाने नीतोऽसौ। दर्शितं तत्पतद्गृध्रं चलत्कृमिकुलाकुलं विशरारुदेहावयवम् । ततो राज्ञस्तत्तदवस्थं विलोकयतः सहसैव

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समुत्पन्नं वैराग्यम् । प्रवृत्तः स्वं निन्दितुम्—

**नीतिं व्यतीत्य परिहृत्य सतां च कृत्यं,**
**धिग् धिग्! मयेन्द्रियवशेन कृतं कुकर्म ।**
**शुक्लांशुकस्य नवकज्जलपङ्कवन्मे,**
**हा ! पातकं तदिदमुग्रमपेष्यति क्व?** ।।१५८।। (वसन्ततिलका)

अन्यच्च—

**एकेन राज्ञा जनलज्जयेव,**
**कलङ्किनाग्रेऽस्ति समाश्रितं खम् ।**
**राज्ञो द्वितीयस्य कलङ्किनस्तु,**
**श्वभ्रं विनाऽन्यः क इवाश्रयोऽस्तु** ।।१५९।। (उपजातिः)

एवं च दुष्कृतगर्हाप्रवृत्तस्य राज्ञः समुद्भूतः संवेगः। परित्यज्य राज्यं सुव्रतगुरुपार्श्वे प्रव्रजितः। उग्रतरं तपस्तप्त्वा समाधिना च मृत्वा सनत्कुमारे देवो जातः।।

ततश्च्युत्वा रत्नपुरे श्रेष्ठिपुत्रो जिनधर्म इति नाम्ना समुत्पन्नः । स च बाल्यादपि दयादिगुणनिवासो जिनधर्मवासितान्तःकरणश्च द्वादशविधश्रावकधर्मं विधिवत् पालयति। सार्थवाहनागदत्तोऽपि प्रियाविरहविह्वलो मृत्वा भवं भ्रान्त्वा सिंहपुरेऽग्निशर्मा नाम माहनतनयो जातः । प्राप्तयौवनश्च कालेन त्रिदण्डित्वं प्रपद्य स रत्नपुरे समागतः। तत्र च तदा हरिवाहनो राजा महाभागवतः । स तं परिव्राजं निमन्त्रितवान् । पारणकदिने च कार्यवशेन नृपवेश्मन्यायातं जिनधर्मश्रावकं स त्रिदण्डी पश्यति स्म । प्राग्जन्मवैरानुभावात् क्रुधा ज्वलन् पार्थिवं प्रति प्रोवाच । राजन् ! यद्यस्य श्रेष्ठिनः पृष्ठे स्थालं निवेश्यात्युष्णपायसेन मां भोजयसि तदाहं त्वद्गृहेऽभ्यवहरामि नान्यथेति। राजाज्ञया च दत्तं श्रेष्ठिना पृष्ठम् । क्षिप्तं सूपकारैरत्युष्णं पायसम् । भुक्तं विशेषतस्तेन स्थिरीभूय । जिनधर्मश्रावकेण च सोढः सम्यगुपसर्गः । समुच्चटितपृष्ठत्वग्

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

च विसृष्टो राज्ञा। गतोऽसौ स्वं गृहम् । कृत्वा जिनबिम्बार्चनाद्यम्, परिजनादिभिश्च सह क्षमणं कृतसर्वसङ्गपरित्यागः प्रतिपद्य सुगुरुसमीपे व्रतं नगरान्निर्गत्य समारूढः पर्वते। कृतमनशनम्। पक्षं पक्षमेकैकस्यां दिशि स्थितोऽभिग्रहेण कायोत्सर्गे। [१]काककङ्कादित्रोटीपुटोत्कृत्तकृत्तिकष्टमधिसह्य समाधिना मृत्वा सौधर्मेन्द्रो जातः । त्रिदण्ड्यप्याभियोगिकं कर्मोपार्ज्य मृत्वा च शक्रस्य वाहनमैरावणो जातः । ऐरावणभवाच्च च्युत्वाऽसिताक्षो नाम यक्षो जातः ।।

इतश्च जम्बूद्वीपेऽस्मिन्नेव भरतार्द्धे कुरुजाङ्गलदेशे हस्तिनापुरेऽश्वसेनो राजा। सहदेवी भार्या। सौधर्माज्जिनधर्मजीवश्च्युत्वा सहदेव्याः कुक्षाववतीर्णः। समये च चतुर्दशस्वप्नसूचितचक्रिजन्मा पुत्रो जातः । सनत्कुमार इति कृतं नाम । स चाऽद्वैतरूपपात्रं स्वर्णवर्णः सर्वलक्षणलक्षिताङ्गः सार्द्धैकचत्वारिंशद्धनुर्मानो वर्षलक्षत्रयायुश्च । तस्य च कालिन्दीसूरसुतो महेन्द्रसिंहः परमं मित्रम् ।।

एकदा वसन्ते तेन समं मकरन्दोद्याने गत्वा रन्तुं प्रवृत्तः। तदा चाऽश्वपतिना राज्ञः प्राभृते तुरगाः प्रेषिताः। जलधिकल्लोलो नाम च विशिष्टरयो हयः कुमारयोग्यः प्रहितः। कुमारोऽपि क्रीडां विमुच्यारूढस्तं तुरङ्गमम् । वल्गाचलनमात्रेणाऽप्युत्प्लुत्य गतो दूरतरं तुरङ्गः। यथा यथा कुमारो वल्गां निरुणद्धि तथा तथा विपरितशिक्षत्वा-दधिकमेवाऽभिधावति सः। पृष्ठतश्चाऽश्वसेननृपः कुमारव्यावर्तनाय प्रधावितः, परं न क्वापि दृष्टोऽसौ। ततो महेन्द्रसिंहेन महता निर्बन्धेन व्यावर्त्य नीतो राजा राजधानीम्। स्वयं च राजानमनुज्ञाप्य तमन्वेषयितुं प्रविष्टो महाटवीम्। निरन्तराद्रिष्वद्रिषु अगण्येष्वरण्येषु दुर्गमासु निम्नगासु च तं निरीक्षमाणः श्रूयमाणोन्मदमयूरकेकमेकं सरः स समाससाद। पुरस्ताच्च गच्छन् शुश्राव वेणुवीणाध्वनिस्फीतं सङ्गीतम्। ददर्श च दर्शनीयावधिवधूजनमध्यवर्तिनं कण्ठोपकण्ठलुठन्मुक्ताहारं सनत्कुमारम्। दूराद् दण्डप्रणाममासूत्रयन् समुत्थाय कुमारेण सहर्षं स परिषस्वजे। जातौ द्वावपि हृष्टौ।।

प्राग्वृत्तान्तं च महेन्द्रसिंहेन पृष्टः कुमारः । स्वदयितां बकुलमतिं समादिश्य

१ काककङ्कादिना चञ्चापुटेन कृतं चर्मकर्त्तनादिरूपं दुःखम्।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कथनविषये स्वयमलीकनिद्रया प्रसुप्तः । साप्याह- त्वन्मित्रमसौ हृतोऽश्वेन । द्वितीयेऽह्नि सोऽश्वः स्तम्भिताङ्गः श्रमातिरेकेण निश्चेष्टतां गतः । ततस्तस्मादुत्तीर्णोऽसौ। मुक्तश्चाऽश्वः प्राणैः। आर्यपुत्रोऽपि श्रान्तः प्रान्तरपत्रलतरुतले प्रसुप्तः क्षणम् । तदधिष्ठायकेन च यक्षेण महापुरुषोऽयमिति सिक्तो जलेन, प्रबुद्धश्च पायितः पयो, यक्षोऽहमिति स्वमस्मै स शशंस च । ततोऽनेनोक्तम्- मदीयाङ्गदाहो मानसस्नानं विना न विरंस्यतीति। ततस्तेनोत्पाट्य नीतो मानसे। स्नातः स्वैरम्, जातश्च प्रवणः। तत्र चागतः प्राग्जन्मवैरी असिताक्षयक्षः । मरणान्तानुपसर्गान् कर्तुं प्रवृत्तश्च। लीलयैव निर्जितस्त्वन्मित्रेण । गतः स प्रणश्य क्वापि । मुक्ता सुरस्त्रीभिरस्योपरिष्ठात् पुष्पवृष्टिः । नन्दनवनाच्चागत्य भानुवेगपुत्रीभिरष्टभिः प्राथ्य नीतः स्वनगरे । ताश्च तत्र परिणीय स्थितश्चिरम् ।।

एकदा च सुप्तः सन्नपहृत्य असिताक्षेण क्षिप्तोऽरण्ये । प्रातः प्रबुद्धः परिभ्राम्यन्नेकस्मिन् शून्ये गतः प्रासादे । साकेतस्वामिनः सुराष्ट्रस्य कन्या तत्र परिणीताऽनेन । सा च स्त्रीरत्नं नैमित्तिकैः कथिताऽऽसीत् । ततो मत्प्रभृतयोऽन्या अपि प्रभूताः कन्याः परिणीताः । एकैकमाश्चर्यकरमेतस्य चरित्रम् । गृहीतं चानेन अशनिवेगस्य राज्यम् । जातोऽस्य वैताढ्यविद्याधरचक्रवर्तित्वपदाभिषेकः । शाश्वताश्चार्हत्प्रतिमा- श्चानेन पूजिता वन्दिताश्च । क्रीडार्थं चात्रायातो मिलितश्च भवानिति।।

ततः प्रबुद्धेन कुमारेण नीतोऽसौ वैताढ्ये । तेनापि तत्र चैत्यवन्दनादिकं कृतम् । ततः कुमारः खेचरचक्रपरिवृतः सान्तःपुरः समागतो हस्तिनापुरे । पित्रा च महाप्रमोदेन स्थापितो राज्ये । तेनापि स्थापितः सेनाधिपतित्वे महेन्द्रसिंहः । स्वयं चाश्वसेननृपः श्रीधर्मनाथतीर्थस्थविरान्तके प्रव्रज्य जातः स्वार्थसाधकः ।।

सनत्कुमारस्याऽप्युत्पन्नानि चक्रप्रभृतीनि चतुर्दशरत्नानि । साधितमनेन षट्खण्डमपि भरतक्षेत्रं दशवर्षसहस्र्या । सम्पन्नसम्पूर्णचक्रिवैभवः समायातः स्वपुर-समीपे । तत्रान्तरे सौधर्मेन्द्रेणैकावलिहार-शशिमाला-श्वेतच्छत्र-चामरयुगल-कुण्डलयुग्म-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

-मुकुट-देवदूष्ययुग-सिंहासन-पादुकाद्वय-पादपीठ-दिव्याङ्गराग-रत्न-स्वर्णाद्यं चाऽर्पयित्वोर्वशीतुम्बुरुप्रभृतिभिः समं धनदयक्षः प्रेषितः । तेन शक्रस्येव चक्रिणः पुरप्रवेशः कारितः । चक्रवर्तित्वाभिषेकोत्सवं सविस्तरं समर्थ्य धनदः स्वस्थानं सम्प्राप्तः ।।

चक्रवर्तिश्रिया तस्मिन् षट्खण्डं भरतं न्यायवृत्त्या परिपालयति सत्येकदा सुधर्मायां सभायां नाटकनिरीक्षणाक्षिप्ते शक्रे ईशानकल्पादतिभासुरः सुर एकोऽभ्यागतः तत्तेजसा च तिरोहितानि समस्तनाकिनां तेजांसि । गते च तस्मिन् देवे देवैर्दिवस्पतिस्तत्तेजसां प्राचुर्यकारणं पृष्टः । शक्रेणाऽप्यभिहितम् प्राग्जन्मन्यनेना-ऽऽचाम्लवर्धमानं तपस्तप्तं तत्प्रभावोऽयमिति । पुनस्तैः पृष्टम् । सम्प्रत्यपि कश्चिदस्ति मनुष्यस्तेजस्वी रूपवांश्चेति । ततः शक्रेणोक्तम्- यादृक् सनत्कुमारश्चक्री रूपवांस्तादृग् नरः सुरोऽपि नास्तीति । ततस्तत्प्रत्ययार्थं द्वौ देवौ भूदेवरूपधारिणौ भूत्वा सनत्कुमारद्वारपालसमीपमागतौ । तदानीं च चक्री कृतसर्वाङ्गाभ्यङ्ग आसीत् । विज्ञप्य च द्वारपालेन नीतौ तौ चक्रिसमीपम् । ताभ्यां च निरूपमां रूपसम्पत्तिमवलोक्य विस्मयोद्भूतमूर्द्धभ्यामभ्यधायि—

**दूरस्थाः कति नाम नैव गुणिनः, सन्तोऽर्थवन्तोऽथवा,**
**श्रूयन्ते जनयन्ति के हृदि न चो-त्कण्ठामकुण्ठात्मनाम् ।**
**दृष्टैः स्पष्टतरं पुनर्निकटतः, सम्भावनाप्यग्रिमा,**
**तैर्लोकस्य फलाभिलाषघटना, तालैरिवोन्मूल्यते ।।१६० ।।**

(शार्दूलविक्रीडितम्)

भवतस्तु प्रसिद्धेरधिकं रूपं सर्वथा कृतार्थावावामिति । चक्रिणोक्तम् । केयमभ्यङ्गभङ्गुरलावण्ये वपुषि कान्तिभ्रान्तिः । तन्मज्जनानन्तरमलङ्कृतं मे वपुर्विलोक्यमिति । विसृष्टौ तौ सप्रसादम् । चक्र्यपि स्नात्वा कल्पिताकल्पभूषणो धृतसाडम्बराम्बरस्तरसा तावाकार्य सिंहासनासीनः स्वमदर्शयत् ।।

तौ च तं निध्याय विध्यातदीपाविव श्यामास्यौ सन्तौ परस्परमिति चिन्तयितुं प्रवृत्तौ—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**स्वान्योपकारकरणप्रवणेन विद्या-**
**लोभादिनापि न मदं कुरुते कुलिनः ।**
**रोगैः क्षुधा च जरसापि विनाश्य केन,**
**रूपेण कोऽस्तु भुवने मतिमानहंयुः[१] ।।१६१।।**

(वसन्ततिलका)

चक्री च वैवर्ण्यकारणं पप्रच्छ। तौ च शक्रप्रशंसादिकं रोगसङ्क्रान्तिस्वरूपं चाभिधाय तिरोहितौ। चक्र्यपि वैराग्यात् पुत्रं राज्ये न्यस्य विनयन्धरसूरिपार्श्वे प्रव्रज्य महातपःपरो विजहार। मन्त्रिमण्डलमपि षण्मासीं पृष्ठतः परिभ्रम्य न्यवर्तत। षष्ठतपःपारणे च चीनकक्कूरमजायास्तक्रं च भुक्तवान्। ततः कच्छू-शोष-ज्वर-श्वासा-ऽरुचि-कुक्ष्य-ऽक्षिवेदनाः सप्त युगपदुद्भूताः। सप्तवर्षशतीं यावन्महासत्त्वतया सोऽधिसेहे। अन्यानप्येवमुपसर्गान् सहमानस्य समुत्पन्नाश्च लब्धयो विविधाः। प्राग्वच्च शक्रेण निष्कर्मत्वविषयास्य प्रशंसा कृता। परीक्षार्थं च द्वौ सुरौ भिषग्रूपौ भूत्वा समागत्य तमूचतुः— महामुने ! आवां वैद्यौ स्वौषधैरेव चिकित्सावस्त्वामिति। मुनिनाप्युक्तम्—

**रोगाः सर्वे, प्रकृतिविषमाः, कर्मणोऽमी निदानाद्,**
**दानाद् भोगा इव नियमतः, प्राणभाजां भवन्ति ।**
**छेद्यं वैद्यैः, प्रथममभया—द्यैस्ततः कर्ममर्म**
**त्याज्यं चाज्याद्यपि न भविना-मेवमायान्ति रोगाः ।।१६२।।**(मन्दाक्रान्ता)

ततो यदि युवां कर्मरोगहरौ, तदा मां चिकित्सताम् । अथ बाह्यरोगहरावेव, तदा गलत्पामां ममाङ्गुलीं मयैव निष्यूतबिन्दुपरामर्शेन सुवर्णवर्णीकृतां पश्यतामिति। तौ च तथाविधां दृष्ट्वाऽङ्गुलीं भगवन्नसामान्यस्त्वमावां च शक्रकृतभवत्प्रशंसामसहमानौ तव परीक्षार्थमागतौ- इत्युदीर्य स्वाभाविकेन रूपेण वन्दित्वाऽन्तर्हितौ । मुनिचक्रवर्त्यपि समयेऽनशनेन समाधिना च मृत्वा सनत्कुमारदेवलोके देवो जातः। अस्य च

१ अहङ्कारी।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कौमारे वर्षाणां सहस्राः पञ्चाशत् मण्डलिकत्वेऽपि तावन्तः। दिग्जये दशसहस्राः । चक्रित्वे नवतिः सहस्राः । व्रते लक्षमेकम्। एवं त्रीण्यब्दलक्षाणि सनत्कुमारचक्रवर्तिनः सर्वायुरिति ।।

## ।।श्रीशान्तिनाथचरित्रम्।।

**श्रीमान् समानयतु शान्तिजिनो जनस्य,**
**स ध्वान्तमान्तरमपि प्रशमं समन्तात् ।**
**वृद्ध्यै न यो मकरकेतनदोषयोर्यः,**
**सच्चक्रहर्षजननो मृगलाञ्छनोऽपि ।।१६३।।** (वसन्ततिलका)

**श्रीषेणः पृथिवीपतिः मिथुनक, सौधर्मवासी सुरो,**
**वैताढ्येऽमिततेज इत्यऽवनिपो, गीर्वाणकप्राणते ।**
**एतस्मादपराजितो बल इतो, जातोऽच्युतेन्द्रस्ततः,**
**श्रीवज्रायुधचक्र्यथाऽमरवरो, ग्रैवेयके द्व्यग्रगे।।१६४।।**
(शार्दूलविक्रीडितम्)

**अथ मेघरथो राजा, देवः सर्वार्थसिद्धके ।**
**शान्तिनाथभवा भव्यां दिशन्तु द्वादशश्रियम् ।।१६५।।**

जम्बूद्वीपेऽत्रैव भरतार्द्धमध्यमखण्डे रत्नपुरे श्रीषेणो राजा । अभिनन्दिता शिखिनन्दिता च तस्य द्वे भार्ये । स्वप्ने उत्सङ्गगतसूर्येन्दुदर्शनादभिनन्दिताया द्वौ पुत्रौ जातौ । इन्दुषेणबिन्दुषेणाविति तयोः कृतं नाम । प्राप्ततारुण्यौ च तौ सुखं विलसतः ।।

इतश्च मगधेष्वचलग्रामे धरणिजटो नाम माहनो वसति । तस्य यशोभद्राख्या भार्या । तयोर्नन्दिभूतिः श्रीभूतिश्चेति पुत्रद्वयम् । दास्याः कपिलायाः कुक्षेर्जातस्तृतीयः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कपिलो नाम पुत्रः । स च महाप्राज्ञः। नन्दिभूतिश्रीभूत्योः पठतोः कर्णश्रुत्या चतुर्दशानां विद्यास्थानानां पारगो जातः । स्वदेशे पूजां न लप्स्येऽहमिति गृहान्निःसृत्योत्तमो महामाहनोऽहमित्यात्मानं स्थाने स्थाने प्रकाशयन् पूजां च लोकतो गृह्णन् सम्प्राप्तो रत्नपुरे। वेदपाठकस्य सत्यकेरुपाध्यायस्य पाठशालायां गत्वा निवासमकरोत् । तत्र च छात्रान् व्याख्यानं भाणयता, संशयांश्च पृच्छकानां च्छिन्दता, विनयं च कुर्वता सत्यकेरुपाध्यायस्यावर्जितं चित्तं तेन । ततः सत्यकिना कृतः स्वपदे । प्राप्नोति सर्वत्र विशेषपूजाम् । क्रमेण सत्यकिना सत्यभामाभिधां स्वां कन्यां सगौरवं विवाहितः । विषयासक्तस्य च तया सह तस्यातिक्रान्तो भूयान् कालः ।।

एकदा रात्रौ देवगृहेषु प्रेक्षणादिकं प्रेक्ष्य गृहं प्रतिनिवर्तमाने तस्मिन् मार्गे वृष्टिं कर्तुं प्रवृत्तो मेघः। तेन चिन्तितम्– न कोऽपि मां मेघान्धकारितायां निशि पश्यतीति। ततो नग्नीभूय वस्त्राणि सम्पीड्य कक्षायां च निक्षिप्य गृहद्वारे च परिधाय प्रविष्टो गृहे। समानीतानि गृहिण्यान्यतराणि वस्त्राणि। प्रोक्तं तेन । मुग्धे ! विद्या प्रभावान्न मे वस्त्राणि तिमितानीति। चिन्तितं तया– यदि विद्याप्रभावः स्यात् तदाङ्गमपि न तिम्येत्। तस्मान्नग्न एवायमायातोऽकुलीनश्च। ततः प्रभृति च तं प्रति सा मन्दानुरागा जाता। तस्मिंश्च समये तत्पिता धरणिजटः क्षीणधनः समृद्धं कपिलं श्रुत्वा तत्रागतः। पाद्यस्नानादिकं च कारितः स्वयं कपिलेन। भोजनसमये च न मे वपुः पटुतरमिति विभिन्नं भोजय पितरमिति सत्यभामां समादिदेश। तया च वितर्कितं स्वमनसि– नूनं नाऽयमेकपङ्क्तिक इति। पिता च सगौरवं भोजितः। एकदा धरणिजटं रहसि दृष्ट्वा प्रणम्य ब्रह्महत्यादानपूर्वकं तया पृष्टः– तात ! त्वत्पुत्रोऽयं शुद्धपक्षोद्भवोऽवरुद्धोद्भवो वेति सत्यं ब्रूहि। तेनाप्यवरुद्धोद्भव इति सत्यं कथितम्। ततो विषण्णया तया स्वमनसि चिन्तितम्–

**लुम्पन्ति प्रथमं स्मृतिव्यवहृतिं, गुर्वादिलज्जां ततो**
**दाक्षिण्यं तदनु स्वदारविषयं, शुद्धिं कुलस्याऽप्यथ ।**
**एष्यत् पङ्क्तिबहिस्त्वलाघवमपि, स्वीकुर्वते सन्तते-**
**रुच्छिष्टान्यकलत्रसङ्ग्रहविधौ, ध्यायन्ति किं दुर्धियः ।।१६६।।**

(शार्दूलर्थविक्रीडितम्)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इत्यादि शोचन्त्यां तस्यां कपिलोऽपि सम्मान्य स्वगृहानुसारेण समर्प्य द्रव्यं स्वयं चानुव्रज्य जनकं विससर्ज । सम्प्राप्तः स स्वं ग्रामम् ।।

सत्यभामापि राज्ञः श्रीषेणस्य पार्श्वे गत्वा प्रोवाच– देव ! दैववशादहमकुलीनेनाऽमुना परिणीता, तद् विमोचय माममुष्मात् । राज्ञाऽप्याकार्य भणितः कपिलः– भद्र ! मुञ्चेमां धर्माचरणाय । तेनोक्तम्– नैव मुञ्चामि । तयाऽप्यूचे– यदि न मोक्ष्यसे तदाहं विपत्स्ये । राज्ञोक्तम्– कियन्ति दिनानि पुत्रित्वेन मद्गृहे तिष्ठत्वियमिति। प्रतिपन्नं तेन । राज्ञापि समर्पिता स्वकलत्रयोः । साऽपि विविधतपस्तत्परा स्थिता तत्र ।।

तदानीं च कौशाम्बीस्वामिना राज्ञा महाबलेन स्वदुहिता श्रीकान्ता स्वयंवरात्वेनेन्दुषेणं परिणेतुं प्रहिता सम्प्राप्ता च । तया च सममनन्तमतिरिति नाम्ना रूपपात्रमेका वेश्या समायाता । तन्निमित्तमिन्दुषेणबिन्दुषेणौ कुमारौ कलहायमानौ गतौ योद्धुमुद्याने देवरमणाख्ये। तौ च निवारयितुमपारयन्नभिनन्दिताशिखिनन्दिताभ्यां सह श्रीषेणनृपस्तालपुटविषभावितं पद्ममाघ्राय विपन्नः । सत्यभामापि कपिलादनर्थमाशङ्कमाना तदेवाघ्राय मृता । शुद्धचेतस्तया चत्वारोऽपि ते जीवा जम्बूद्वीपोत्तरकुरुक्षेत्रे युगलिनो जाताः ।।

इन्दुषेणबिन्दुषेणयोश्च युध्यमानयोर्विमानस्थ एको विद्याधरः समेत्य समीपं प्रोवाच–

**नाऽभुक्तपूर्वा गणिका महीव,**
**पत्यन्तरैर्नैव न भाव्यमस्याः ।**
**नाम्नाऽन्वयं चिन्तयताममुष्याः,**
**केषां न हि स्यान्मनसो विरक्तिः ।।१६७।।** (इन्द्रवज्रा)

तद्विरमतं युवां युद्धात्। इयं च वां भगिनी । शृणुतां मद्वचनं मम हि पुण्डरीकिण्यां गतस्य पृष्टस्वप्राग्भवस्य भगवता जिनेन कथितमिदम्– पुष्करवरद्वीपार्द्धे

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वीतशोकायां पुर्यां रत्नध्वजो राजा । कनकश्री हेममालिनी च द्वे भार्ये । कनकश्रियः कनकलता पद्मलता च द्वे पुत्र्यौ । हेममालिन्याः पुनः पद्मा नाम पुत्री। सा चाऽजितसेनायाः प्रवर्तिन्याः पार्श्वे प्रव्रजिता। तप्तमुग्रं तपः । एकदा बहिर्यान्त्या मदनमञ्जर्याः पण्यस्त्रियः कृते द्वौ राजपुत्रौ युध्यमानौ दृष्टौ । तत्सौभाग्यं च प्रशंसितम्। ममाऽपीदृशं सौभाग्यमस्त्विति निदानेन मृत्वा सौधर्मे देवी जाता । कनकश्रीरपि मृत्वा भवं च भ्रान्त्वा जम्बूद्वीपे महाविदेहे पुष्कलावतीविजये वैताढ्योत्तरश्रेण्यामादित्याभे पुरे सुकुण्डलिनृपपुत्रो मणिकुण्डली नाम जातः । स चाहम् । कनकलतापद्मलते च मृत्वा भवं भ्रान्त्वा जम्बूद्वीपे भरतार्द्धे रत्नपुरे श्रीषेणनृपपुत्राविन्दुषेणबिन्दुषेणौ जातौ । सौधर्मात् पद्माजीवश्च्युत्वा च कौशाम्ब्यामनन्तमतिका गणिका जाता । तन्निमित्तं तौ च सम्प्रति देवरमणोद्याने युध्यमानौ तिष्ठत इति एतदाकर्ण्य स्नेहादुत्सुकोऽहमिहायातः । युवयोरहं प्राग्भवे माता, इयं च भगिनी वामिति । ततस्ताभ्यां सभ्रमाभ्यां प्रणतो मणिकुण्डली । युद्धं त्यक्तम् । प्रतिबोधविशेषार्थं च गतौ धर्मरुचिनाम्ना गुरोः पार्श्वे । तेन सविस्तरमुपदिष्टो धर्मः। प्रतिबुद्धौ द्वावपि राजपुत्रसहस्रचतुष्टयेन समं प्रव्रज्य कर्मक्षयं कृत्वा सिद्धौ।।

श्रीषेणप्रमुखाश्चत्वारोऽपि मृत्वा सौधर्मे देवा जाताः । अस्मिन्नेव भरते वैताढ्ये रथनूपुरचक्रवालपुरे ज्वलनजटी विद्याधरेश्वरः। तत्पुत्रोऽर्ककीर्तिः, पुत्री च स्वयम्प्रभा । सा च श्रीमहावीरजीवेन त्रिपृष्ठेन परिणीता । अर्ककीर्तेर्ज्योतिर्माला पत्नी । श्रीषेणजीवः सौधर्माच्च्युत्वा तयोः पुत्रो जातः । अमिततेजा इति कृतं तत्पितृभ्यां नाम । सत्यभामाजीवोऽपि तयोरेव पुत्रीत्वेनोत्पद्य अमिततेजसो भगिनी जाता । सुतारा इति तस्याः कृतं नाम । अभिनन्दिताजीवस्त्रिपृष्ठस्वयम्प्रभयोः पुत्रत्वेनोत्पन्नः । श्रीविजय इति कृतं तस्य नाम । विजयभद्रश्चाऽस्य सोदरः । शिखिनन्दिताजीवस्त्रिपृष्ठस्यैव पुत्री जाता । तस्या ज्योतिःप्रभेति नाम । कपिलोऽपि भवं भ्रान्त्वा चमरचञ्चायां विद्याधरेश्वरोऽशनिघोष इति नाम्ना जातोऽस्ति । अर्ककीर्तिसुता सुताराऽमिततेजोभगिनी त्रिपृष्ठपुत्रेण श्रीविजयेन परिणीता । त्रिपृष्ठपुत्री ज्योतिःप्रभा महामहोत्सवपूर्वममिततेजःकुमारेण परिणीता ।।

Jain Educationa International  For Personal and Private Use Only  www.jainelibrary.org

एवं सत्येकदा रथनूपुरोद्यानेऽभिनन्दन-जगन्नन्दन-ज्वलनजटिनस्त्रयो महर्षयः समवसृताः । गतोऽर्ककीर्तिर्गुरुं पितरं च वन्दितुम् । श्रुत्वा धर्मोपदेशं विरक्तोऽर्ककीर्तिरमिततेजसं पुत्रं राज्येऽभिषिच्य प्रव्रजितस्तत्पार्श्वे। विजहार च तैः समम् । त्रिपृष्ठे कालधर्मं प्राप्तेऽचलबलेन गृहीता प्रव्रज्या । त्रिपृष्ठपुत्रः श्रीविजयः पोतनपुरे राजा जातः।।

एकदाऽमिततेजःक्ष्मापालः सुताराश्रीविजयदर्शनार्थमुत्कण्ठितो गतः पोतनपुरे। तत्र नगरमुत्पताकं सोत्सवं दृष्ट्वाऽमिततेजसा श्रीविजयः कारणं पृष्टः। सोऽप्युवाच- इतः प्रागष्टमे दिने नैमित्तिक एकः समेत्य पोतनपुरस्वामिशिरसि मध्याह्ने विद्युत्पतिष्यतीत्युवाच । मन्त्रिणा चैकेन सोल्लुण्ठमुक्तम्– दैवज्ञ ! त्वच्छिरसि तस्मिन् दिने किं किं पतिष्यतीति । तेनोक्तम्– रत्नस्वर्णवृष्टिः । मया मन्त्रिणं निवार्य ज्ञानसम्प्रदायमूलोत्पत्तिं सम्पृष्टः। तेनोक्तम्– अचलबलेन सममहमपि प्रव्रजितः । चिरकालमधीतं श्रुतम् । कर्मदोषात् प्रतिपतितोऽस्मीति । मयाऽप्यर्हदागमज्ञानं नाऽन्यथेति विचार्य रक्षोपायं मन्त्रिणः पृष्टाः। एकेनोक्तम्– यद्भावि तन्नाऽन्यथेति।

तथा हि– विजयपुरे कदाचिदेको राक्षसः प्रवृत्तो मनुष्यभक्षणे। ततो राज्ञा पूजादिभक्त्यतिशयात् परितोषितस्तथापि न विरमति । ततः महाकष्टेन प्रतिदिनमेकैकमनुष्याऽर्पणेन निवर्तितः सर्वोपद्रवात् । गोलकनामनिर्दिष्टमेकैकं मानुषं राजाज्ञया तस्य दीयते । एकदा रुद्रसोमाग्निशिखयोः सुतस्य शिखिनाम्नो वारकः समायातः । प्रवृत्ता क्रन्दितुमग्निशिखा । कृपया तुष्टानि प्रत्यासन्नानि कान्यपि भूतानि । तैरागत्योक्तम्– वृद्धे ! न तव सुतो विपत्स्यते, राक्षसाद् वयमाकृष्यानयिष्याम इति । स च नीतो राजमानुषै राक्षसान्तिकम् । भूतैश्चाकृष्यानीय चार्पितोऽग्निशिखायाः तया च पुनरपहारभयाद् गिरिगुहायां नीत्वा मुक्तः। तत्र सुप्तः सन्नजगरेण गिलितः । तस्माद् भाव्यस्यान्यथात्वं नास्ति । किञ्च–

**न वृत्तेन न वित्तेन, नार्चया न च चर्चया ।**
**न यन्त्रेण न मन्त्रेण, प्राणिनां त्राणमन्तकात् ।।१६८।।**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ततोऽन्यतरमन्त्रिणा प्रोक्तम्– देव ! नैमित्तिकेन पोतनपुरस्वामिनः सामान्येनारिष्टं दृष्टम्, न तु श्रीविजयस्य । तस्मादन्यः सप्ताहं यावन्नृपः सूत्र्यते । नैमित्तिकेन चिन्तितम् । महदेव मतिज्ञानमत एवागमे प्रथममस्योपन्यासः ।।

**अस्त्येव शास्त्रं सकलार्थदर्शि,**
**विशेषबोधस्तु धियैव पुंसः ।**
**रूपोपलब्धिक्षममक्षि सम्यक्,**
**प्रमाणमन्तःकरणं तु तत्र ।।१६९।।** (उपजातिः)

राज्ञा च क्षणं विमृश्योक्तम्– महामात्य ! निःप्रत्यूह एव भवदूहः । कथमहं परमात्मप्राणरक्षणार्थमन्यं प्राणैर्वियोजयामि । तेनोक्तम्– तर्हि यक्षोऽभिषिच्यताम्। यदि दिव्यशक्त्या स स्वस्योपसर्गं स्खलयिष्यति ततो भव्यम् । अथ न, तथापि पापं न कस्यापीति । देवश्च कृतपौषधस्तिष्ठतु देवगृहे । राज्ञा च कृतं तथा । सप्तमे चाह्नि निर्दिष्टे समये तडत्कारबधिरिताखिलजनं सहसैव वज्रं यक्षस्य मूर्ध्नि निपतितम् । अन्तःपुरादिना च लोकेन नैमित्तिकस्य शिरसि कृता रत्नस्वर्णादिभिर्वृष्टिः । राज्ञा च दत्तं तस्य पद्मिनीखण्डपत्तनम् । विसृष्टश्च स सगौरवम् । यक्षप्रतिमा च कारिता नव्या । तदर्थं चाऽयमुत्सवः पौरैः प्रारब्ध इति ।।

अमिततेजा अपि कृतमाङ्गल्यव्यवहारः स्थित्वा चिरं तमनुज्ञाप्य गतः स्वं स्थानम् । अन्यदा श्रीविजयनृपः सुतारया सह गतः क्रीडावने । तदा च कपिलजीवोऽशनिघोषः प्राग्जन्मसंस्कारादनुरागं वहन् विद्याबलात् प्लवमानं स्वर्णवर्णं मृगं विचक्रे । सुतारयापि तद्ग्रहणकृते श्रीविजयोऽभ्यर्थितः । सोऽपि स्त्रीग्रह इति गतो ग्रहीतुं प्राप्तश्च दूरम् । ततोऽशनिवेगेन हृता सुतारा । प्रतारिण्या च विद्यया सर्पदष्टा व्याहरन्ती महता शब्देन दर्शिता कृत्रिमा सुतारा । वलितः श्रीविजयः । कृतं मणिमन्त्रादिकम् । क्षणेन विपन्ना सा । श्रीविजयश्च मूर्च्छितः संश्चन्दनाद्युपचारेण जातः स्वस्थः । तां चादाय स्वयमप्यारूढश्चितायाम् । प्रज्वालितो ज्वलनः । तदानीं चागतौ द्वौ विद्याधरौ । विध्यापिता ताभ्यां चिता । पलायिता साट्टहासं प्रतारिणी।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

विस्मितो राजा किमेतदिति । ततस्ताभ्यामभिहितम्– आवां विद्याधरपतेरमिततेजसोऽनुचरौ । तीर्थवन्दनार्थं गच्छद्भ्यामावाभ्यां हा नाथ ! श्रीविजय ! हा बान्धव ! अमिततेज ! इत्यादीन् स्वस्वामिजामिविलापान् श्रुत्वा शब्दानुसारेण गत्वा दृष्टोऽशनिघोषः सुतारामपहरन् । यावदावामुत्खातखड्गौ तं हन्तुमुद्यतौ तावत्सुतारया प्रोक्तम्– भो भो विद्याधरौ ! श्रीविजयनृपः प्रतारिण्या वञ्चितः सन् स्ववधायोद्यतोऽधुना वर्तते। ततस्तदन्तिकं गत्वा तद्रक्षणे यत्नं कुरुतम् । न तं विनाऽहमपि जीविष्यामीति ।।

ततश्चिन्तापरः सन् श्रीविजयस्ताभ्यामात्मनैव सह नीतो वैताढ्ये । कृता सगौरवं प्रतिपत्तिरमिततेजसा। दत्ताः प्रभूताः स्वविद्याः। सम्मान्य च स्वपुत्रैः समं प्रहितः पोतनपुरे। अमिततेजा अपि महाज्वालां विद्यां साधयित्वा श्रीविजयं चात्मना सह नीत्वा गतश्चमरचञ्चायाम्। अशनिघोषश्रीविजययोर्जातं युद्धम्। श्रान्तः श्रीविजयः। प्रवृत्तो योद्धुममिततेजाः। प्रणश्याऽशनिघोषोऽपाग्भरतार्द्धसीमाद्रौ तत्कालोत्पन्नकेवलज्ञानस्याचलबलमुनेः समवसृतस्य शरणं गतः। तत्र च ज्ञानिनोऽतिशयादप्रभवन्ती विद्या व्यावृत्याऽमिततेजसः स्वरूपं कथितवती। अमिततेजःश्रीविजयौ गतौ तत्र ज्ञानिनं वन्दितुम्। मारीचोऽशनिघोषजननी च पृष्ठतः सुतारां गृहीत्वा तत्रागतौ। अभिनन्दन-जगन्नन्दन-ज्वलनज्वट्यर्ककीर्त्तिप्रभृतयोऽपि चारणर्षयस्तत्रायाताः। मुनिना कृता देशना–

**प्राविण्यं विनये नये निपुणता, प्रारब्धनिर्वाहणे,**
**वैचक्षण्यमहर्निशं रसिकता, दानादिके कर्मणि ।**
**स्वश्लाघासु पराङ्मुखत्वमपर-स्तुत्यामनीर्ष्यालुता,**
**दाक्षिण्यप्रकृतित्वमुत्तमतम-श्रीदायिनोऽमी गुणाः ।।१७०।।**

(शार्दूलविक्रीडितम्)

इत्यादिदेशनया प्रतिबुद्धाः सर्वे । अशनिघोषः समुत्थाय श्रीविजयामिततेजसौ सविनयं प्रणम्य स्वाविनयं क्षमयित्वा सुतारां समर्पयामास । पप्रच्छ च केवलिनम्।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भगवन् ! कुतः सुतारायां मेऽनुराग इति ।।

केवलिना सत्यभामाभववृत्तान्तः सविस्तरं कथितः । अमिततेजसोऽपि श्रीषेणाद्याः प्राग्भवा आगामिनश्च श्रीशान्तिनाथभवं यावत् सर्वे सविस्तरं कथिताः। श्रीविजयश्च श्रीशान्तिनाथस्य प्रथमः पुत्रः प्रथमश्च गणधरो भविष्यति इति कथितम्। प्रतिपन्नोऽमिततेजःश्रीविजयाभ्यां श्रावकधर्मः । अशनिघोषेण गृहीतं व्रतम्। श्रीविजयमाता स्वयम्प्रभाऽपि प्रव्रजिता । केवलिनं नत्वा गताः सर्वेऽपि स्वं स्वं स्थानम् ।।

अन्यदाऽमिततेजःश्रीविजययोर्नन्दनवनगतयोर्ज्ञानिना षड्विंशतिदिनावशेषमायुः कथितम् । तत स्वं स्वं स्थानं गत्वा चैत्याऽष्टाह्निकादानादिपूर्वं राज्यं परित्यज्याऽभिनन्दनजगन्नन्दनयोः पार्श्वे प्रव्रज्य द्वाभ्यामप्यनशनं गृहीतम् । श्रीविजयेन च पितृवैभवादाऽऽत्मवैभवं हीनं स्मृत्वाऽर्द्धचक्रित्वलाभाय निदानं कृतम् । समाधिना च द्वावपि मृत्वा प्रणते कल्पे विंशतिसागरोपमायुष्कौ देवौ जातौ।।

जम्बूद्वीपे पूर्वविदेहे रमणीयविजये शुभायां पुर्यां स्तिमितसागरो राजा। वसुन्धराऽनुद्धरा च द्वे भार्ये । प्रणतादमिततेजो जीवश्च्युत्वा वसुन्धरायाः कुक्षाववतीर्णः। इभेन्दू वृषभः सर इति चतुःस्वप्नसूचित-बलभद्रजन्मा समये जातः सुतः। कृतमपराजित इति तस्य नाम । श्रीविजयजीवोऽपि प्रणताच्च्युत्वाऽनुद्धरायाः कुक्षाववतीर्णः । सिंहाभिषेककुम्भाब्धिसूर्याग्निरत्नसञ्चय इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा समये जातः सुतः । कृतमनन्तवीर्य इति नाम। प्राप्तौ द्वावप्यन्योन्यप्रीतिं यौवनं च । राजापि स्तिमितसागरस्तुरगवाह्यालीं गतः सन्नुद्यानं प्रविष्टः तत्र दृष्टः साधुः । प्रतिबोधितस्तेन धर्मदेशनया । ततोऽनन्तवीर्यं विन्यस्य राज्ये स्वयं स्वयम्प्रभमुनिसमीपे प्रव्रजितः । कृतमनुष्ठानप्रभृतिकम् । अन्ते पुनर्विराधितश्रामण्यो मृत्वा जातश्चमरेन्द्रः।।

अनन्तवीर्योऽपि अपराजितेन समं राज्यं पालयन्नेकेन विद्याधरेण बर्बरीचिलातीति विद्याद्वयं शिक्षितः । ते च सिद्धे सत्यौ रम्भादिभ्योऽप्यभ्यधिकं गीतं नृत्तं(-तं) च कुरुतः । साधिते विधिपूर्वमनेन। कुरुतश्च ते तदग्रे प्रत्यहं सङ्गीतम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तयोश्च तत्प्रेक्षणक्षणनिरीक्षणाक्षिप्तयोरेकदाभ्यागतो नारदः। ताभ्यां च न तथा सत्कृतः। ततः कुपितो निर्गत्य गतो वैताढ्ये दमितारेर्नृपस्य पार्श्वे । सत्कृत्य तेन महत्या प्रतिपत्त्या दृष्टं किमपि क्वाप्याश्चर्यमिति पृष्टः । तेनोक्तम्– शुभायां पुर्यामनन्तवीर्यस्य नृपस्य गृहे सम्प्रत्यप्रतिमं यादृग् बर्बरीचिलात्यौ सङ्गीतमभिनयतस्तादृग् देवलोकेऽपि नास्तीति । ततो दमितारिणापि प्रहितः स्वदूतस्तदानयनायानन्तवीर्यसमीपे । अनन्तवीर्यापराजितयोश्च प्राग्जन्माराधिता इव सिद्धाः सन्ति भूयस्यो विद्याः । दूतेन याचिते चेट्यौ । ततोऽनन्तवीर्यापराजितौ चेटीरूपौ भूत्वा तेन समं गतौ । प्रारब्धं स्वप्रतिबद्धमेव नाटकम् । पठितमुपाध्यायस्थित्या–

**जल्पन्तोऽद्भुतमाक्षिपन्ति हृदयं, केचित्क्रियायां न तु,**
**प्रीणन्ति क्रियया च केऽपि सरसाः स्युर्नैव वाचा पुनः ।**
**वाचापि क्रिययापि येऽतिसुभगाः, प्रारम्भनिर्वाहयो-**
**र्ये चैकस्थितयः क्व ते सुकृतिनो, द्वित्रा अपि क्ष्मातले ।।१७१।।**

(शार्दूलविक्रीडितम्)

अन्यच्च–

**वाग्मी कश्चिदुदाररूपकलितः, कश्चित्प्ररोहन्मति-**
**प्रागल्भ्यप्रसरोऽस्ति कोऽपि सुकृती, दाक्षीण्यवान् कश्चन ।**
**एकैकेन गुणेन लब्धमहिमा, भूयान् जनः प्राप्यते,**
**सर्वैरेव गुणैर्नरः परिचितो, नानन्तवीर्यात् परः।।१७२।।**

(शार्दूलविक्रीडितम्)

**शृङ्गारैकरसा रसातलभुजो, भूयस्तमाः क्षत्रिया,**
**द्वित्रास्त्यागकलासु शौर्यसुरभिः, कश्चिद् भवेद् वा न वा।**
**आमूलाद् गुणसञ्चयेन घटितो, राजीववद् भानुवत्,**
**तेजोधाम न नाम सोऽस्ति भुवने, योऽनन्तवीर्यात् परः ।।१७३।।**

(शार्दूलविक्रीडितम्)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एवं च वारं-वारमनन्तवीर्यगुणानाकर्णयन्ती दमितारेः कन्या समीपोपविष्टा कनकश्रीर्जाता श्रुतानुरागहतहृदया । अभिलषति स्म चेतसि यदि मामपहृत्य कोऽपि तदन्तिकं प्रापयतीति । अनन्तवीर्योऽपि तदभिप्रायमभिज्ञाय गीतान्तरेष्व-पवार्यापवार्य स एवाहं रूपान्तरितस्त्वदपहारायैवागतोऽस्मीति तच्चेतसि निवेश्य वैक्रियविमानमारूढः प्रकटमेव तामपहृत्य सममपराजितेन च प्रचलितः स्वस्थाने । दमितारिणा च पृष्ठतः प्रेषिताः स्वसुभटाः। ते च तेन विनाशिताः। ततः स्वयमागत्य दमितारिः प्रवृत्तो योद्धुं ताभ्यां सह । तयोश्चोत्पन्नानि रत्नानि । दमितारिणा क्षीणास्त्रेण क्षिप्तं चक्रम् । तेनैव चक्रेणानन्तवीर्यस्तं जघान । जातौ तौ बलार्द्धचक्रिणौ । मुक्ता दिवो देवैस्तच्छिरसि पुष्पवृष्टिः ।।

ततः शाश्वततीर्थानि वन्दित्वा वैताढ्यतो निवर्तमानौ तौ वर्षोपवासिनं महाज्ञानिनं मुनिमेकं ववन्दाते । श्रुता च तद्देशना । समये च पृष्टं कनकश्रिया– भगवन् ! कथं मे पितृबन्धुविरह इति । मुनिरुवाच—

धातकीखण्डे प्राग्भरते शङ्खपुरं नाम ग्रामम्। तत्र श्रीदत्ता नाम दरिद्रास्त्री । सा भ्रमन्ती गता श्रीपर्वते । दृष्टस्तत्र सत्ययशा नाम महामुनिः । श्रुता तस्य देशना। उपदिष्टं तेन धर्मचक्रवालं नाम तस्याः तपः तस्मिंश्च द्वे त्रिरात्रे सप्तत्रिंशदहानि चतुर्थं कार्यमिति । तच्च तपः सबहुमानं प्रतिपद्य गता सा स्वग्रामे । प्रारब्धं च तप्तुम् । तपःप्रभावाच्च समुदितं तदीयं लाभोदयं कर्म । पतितस्तद् गृहैकदेशः । मध्यान्निसृतं सुवर्णम् । विशेषतस्ततःप्रभृति चैत्यपूजादानादिकं कर्तुं प्रवृत्ता । कियत्यपि गते काले जातो विपरिणामस्तस्याः किमस्य धर्मस्य फलमस्ति न वेति । विचिकित्सा-मनालोच्य सा मृता । जम्बूद्वीपे पूर्वविदेहे वैताढ्ये शिवमन्दिरपुरे कनकपूज्यो राजा। वायुवेगा तद्भार्या । तयोः पुत्रोऽहं कीर्तिधर इति नाम्ना । अनिलवेगा मे पत्नी । तत्कुक्षिजातोऽर्द्धचक्री दमितारिः मया च दमितारिः राज्ये न्यस्य गृहीतं व्रतम् समुत्पन्नमद्यैव मे केवलज्ञानम् । सा च श्रीदत्ता मृत्वा त्वं कनकश्रीर्जाता । विचिकित्साफलं चेदं नानादुखैर्विपरिणमति, ते पितृबन्धुविरहश्च त्वयानुभूत एवेति।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ततः प्रतिबुद्धा सा। विरक्ता च कामभोगेभ्यः। अनुज्ञापितौ तया बलार्द्धचक्रिणौ ताभ्यां च शुभायां गत्वा त्वां प्रव्राजयिष्याव इत्युक्तम्। मुनिमनुज्ञाप्य गतौ सपरिच्छदौ शुभायाम्। जातस्तत्रार्द्धचक्रित्वाभिषेकोऽनन्तवीर्यस्य। अन्येद्युश्च समवसृतस्तत्र स्वयम्प्रभजिनः। गतौ तौ वन्दितुम्। श्रुता तद्देशना। महाविभूत्या च प्रव्राजिता कनकश्रीः। सा च कनकावल्यादीनि दुस्तपानि तेपे तपांसि। निहत्य कर्माष्टकं सम्प्राप्ता च शिवम्। अनन्तवीर्योऽपि स्वायुःप्रान्ते क्रूराध्यवसायो मृत्वा प्रथमां पृथ्वीं गतः। अपराजितश्च राज्ञां षोडशसहस्र्या सह प्रव्रज्य मृत्वा चाऽच्युतेन्द्रो जाताः।६-७।

जम्बूद्वीपे वैताढ्योत्तरश्रेण्यां गगनवल्लभे पुरे विद्याधरपतिर्मेघवाहनो राजा। मेघमालिनी भार्या । अनन्तवीर्यजीवः प्रथमनरकादुद्धृत्य तस्याः कुक्षाववतीर्णः । समये जातः सुतः । कृतं मेघनाद इति नाम । प्राप्तयौवनश्च पित्रा स्थापितो राज्ये। स च श्रेणिद्वयराज्यान्यात्मायत्तानि सर्वाणि चकार। दशोत्तरं देशानां शतं विभज्य पुत्राणां प्रदत्तवान् । अन्यदा गतोऽसौ प्रज्ञप्तिविद्यया मन्दराद्रौ । नन्दनवनचैत्यानां च पूजां कर्तुं प्रवृत्तः । तदानीं च तत्रायाता कल्पवासिनो देवाः । प्राग्भवसौहार्दाच्चाऽच्युतेन्द्रस्तं दृष्ट्वा स्वमज्ञापयत् । प्राबोधयच्च तम् । तत्रैवाऽमरगुरुनाम्न-श्चारणमुनेः समीपे प्रव्रजितः । एकदा नन्दनगिरिशिखर एकरात्रिकीं प्रतिमां प्रतिपद्य स्थितः कायोत्सर्गे । प्राग्जन्मवैरिणा चाश्वग्रीवजीवेन प्राप्तदैत्यत्वेन दृष्टस्तथास्थितः सः । कृताश्चोपसर्गाः । महात्मना च तेन सम्यगधिसोढाः सर्वेऽपि । गतो दैत्यः । एवमन्यानपि परिसहोपसर्गानधिसह्य पर्यन्ते चानशनं कृत्वा समाधिना मृत्वाऽच्युतेन्द्र-सामानिको जातो देवः ।।

जम्बूद्वीपे प्राग्विदेहे मङ्गलावतीविजये रत्नसञ्चयायां पुर्यां क्षेमङ्करो राजा । रत्नमाला भार्या । अपराजितजीवोऽच्युतेन्द्रः च्युत्वा तस्याः कुक्षाववतीर्णः । चतुर्दशमहास्वप्नाः पञ्चदशं वज्रं च रत्नमालया स्वप्ने दृष्टम् । समये च जातः पुत्रः । स्वप्ने वज्रदर्शनाद् वज्रायुध इति कृतं पितृभ्यां नाम । प्राप्ततारुण्यः परिणीतवान् लक्ष्मीवतीं नाम राजपुत्रीम् । मेघनादजीवोऽप्यच्युताच्च्युत्वा लक्ष्मीवत्याः कुक्षाववतीर्णः।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समये जातः सुतः । सहस्रायुध इति च कृतं नाम । प्राप्ततारुण्यश्च कनकश्रियं राजपुत्रीं परिणीतवान् । कियत्यपि गते काले सहस्रायुधस्य जातः पुत्रः । कृतं महाबल इति नाम । वज्रायुधश्च बाल्यादपि जिनधर्मभावितात्मा दृढसत्त्वश्च । एकदा क्षेमङ्करमहाराजः पुत्रपौत्र मन्त्रिभिः परिवृतः स्वसभायामासीनो यावदस्ति तावदेकः सुरः सहसैवाऽऽयातः । सोल्लुण्ठवचनैर्धर्मनिन्दां च कर्तुं प्रवृत्तः । ततो वज्रायुध-कुमारेणोक्तम्—

**कः किल्बिषैस्त्रिदशतां समुपागतोऽस्ति,**
**को वा गतोऽस्ति नरके सुकृतानि कुर्वन् ।**
**पश्यन् पुरातनशुभं निजमात्मनोऽपि,**
**किं नास्ति धर्मफलमित्यसकृद् ब्रवीषि ।।१७४।।**

(वसन्ततिलका)

इत्यादिप्रत्यक्षलक्षया युक्त्या प्रतिबुद्धः सः । ततः स देवो दिव्यालङ्करणैस्तमभ्यर्च्येशानेद्रकृतां तव सम्यक्त्वस्थैर्यप्रशंसामसहमानः परीक्षार्थमागतोऽहमित्युदीर्य हृष्टः सन् गतः स्वं स्थानम् ।।

एकदा वसन्तोत्सवे लक्ष्मीवतीप्रमुखान्तःपुरीसप्तशतीपरिवृतो गतो बाह्योद्याने कुमारः। यावद् वाप्यां जलक्रीडाप्रवृत्तोऽस्ति, तावदागतः प्राग्जन्मवैरी दमितारिजीवः प्राप्तदेवत्वो विद्युद्दंष्ट्राऽभिधः। क्रुधाभिधाय सपरिवारस्याऽपि कुमारस्योपरि पर्वतमेकमुत्पाट्य क्षिप्रं चिक्षेप। नागपाशैश्चैनं चरणयोर्बबन्ध । कुमारेणापि वज्रमुष्ट्या हत्वा सर्वतोऽपि स पर्वतो नीतो विशरारुताम् । विच्छोटिताश्च नागपाशाः । तदा च विदेहचैत्यानि वन्दित्वा व्यावृत्तेन दृष्टः शक्रेण । भावी तीर्थंकर इति पूजितश्च ।।

क्षेमङ्करनृपस्य सारस्वतादिदेवैः कृतं समयनिवेदनम् । प्रतिपन्नचारित्रश्चोत्पन्नकेवलज्ञानः प्रवृत्तो भव्यप्रबोधनेऽसौ । वज्रायुधस्यापि चक्रप्रभृतीन्युत्पन्नानि चतुर्दशरत्नानि। साधितोऽनेन षट्खण्डोऽपि मङ्गलावतीविजयः । यौवराज्ये

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्थापितः सहस्रायुधः । एकदा स्थानोपविष्टे चक्रिणि गगनाद् विद्याधर एक सहसैवागत्य शरणं प्रपन्नः । तन्पृष्ठतश्चैका नायिका पुरुषश्चैकः, तयोस्तस्य वधं विधित्सतोश्चक्रिणाऽवधिज्ञानेन ज्ञात्वा प्रोक्तम्– भो ! भो ! श्रुणुतं मद्वचनम् ।।

जम्बूद्वीप ऐरावते क्षेत्रे विन्ध्यपुरे विन्ध्यदत्तो राजा। सुलक्षणा पत्नी । नलिनकेतुस्तत्सुतः । तत्र च धर्ममित्रो नाम सार्थवाहः। श्रीदत्ता तस्य भार्या। दत्तः सुतः। तत्पत्नी प्रभङ्करा । अन्येद्युरुद्याने नलिनकेतुना कुमारेण स्वदयितेन समं तत्र क्रीडन्ती दृष्टा प्रभङ्करा । ततोऽपहृत्य तेनाऽन्यत्र नीता सा रन्तुम् । तद्विरहेण जातश्चोन्मत्तो दत्तः । भ्रमता च तेन दृष्टः सुमनोऽभिधानः केवली । तद्देशनया व्यावृत्तं तस्य चैतन्यम् । विरक्तो भवात्। प्रव्रज्य समाधिना च मृत्वा पूर्वविदेहे सुकच्छविजये वैताढ्ये स्वर्णतिलके पुरे विद्याधरेन्द्रमहेन्द्रविक्रमानिलवेगयोः पुत्रो जातः। तस्याजितसेन इति कृतं नाम । समये साधितास्तेन विद्याः । इतश्च विन्ध्यदत्ते मृते नलिनकेतुर्जातो राजा। चिरं राज्यं प्रपाल्याऽन्ते प्रव्रज्याऽष्टकर्मनिर्मूलनात् सिद्धः । प्रभङ्करापि दीक्षां विना चान्द्रायणं तपस्तप्त्वा मृत्वा च जम्बूद्वीपे विदेहे सुकच्छविजये वैताढ्ये शुक्लपुरे विद्याधरराजशुक्लदत्तयशोधरयोः पुत्रस्य पवनवेगस्य तवैव सुकान्तायां पत्न्यां पुत्रीयं शान्तिमतीति नाम्ना समुत्पन्ना । स च दत्तजीव एवाऽयमजितसेनः। ततोऽनेन प्राग्जन्मस्नेहादियमद्य विद्यां साधयन्ती हृता । ततो मा कुपस्त्वमिति । एतच्चाकर्ण्य प्रतिबुद्धास्त्रयोऽपि क्षमयामासुः परस्परमाशु । पुनश्चक्रवर्तिना प्रोक्तम्- शान्तिमती सहितौ युवां व्रती भविष्यथः । शान्तिमती मृत्वेशानेन्द्रो भविष्यति । युवां च शिवं प्राप्स्यथः । भवद्वपुर्महिमानमीशानेन्द्रोऽयं करिष्यतीति । एवमतीतमनागतं च ज्ञानमतिशायि श्रुत्वा सर्वेऽपि चमत्कृताः । ते च विरक्तमनसः तदानीमेव गत्वा क्षेमङ्करतीर्थकरपार्श्वे प्रव्रजिताः । कृतं रत्नावलीतपः । मृत्वानशनपूर्वं शान्तिमतीशानेन्द्रो जातः । तावपि केवली भूत्वा सिद्धौ । तद्वपुर्महिमेशानादागत्येशानेन्द्रेण स्वयं कृतः।।

सहस्रायुधस्यापि जयनादेव्यां पुत्रो जातः । स्वप्ने कनकशक्तिदर्शनात्

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कनकशक्तिरिति कृतं नाम । प्राप्तस्तारुण्यम्। परिणीतवान् कनकमालाख्यां राजपुत्रीम्, द्वितीयां च मशक्गसारपुरस्वामिनोऽजितसेननृपस्य प्रियसेनाकुक्षिजातां वसन्तसेनाम्। इयं चाग्रेऽपि कनकमालायाः सख्याऽऽसीत् । तस्याश्च परिणयनेन पितृष्वस्रीयो भ्राता रुष्टः । एकदा कनकशक्तिरेकाकी विहरन्नुद्याने नरमेकमुत्पतन्तं निपतन्तं च ददर्श। पप्रच्छ च कारणम्। तेनोक्तम्– मम विस्मृतं पदमेकं विद्यायाः। कुमारेणोक्तम्- पठ। तेन पदहीना पठिता । पदानुसारिप्रज्ञेण कुमारेण सम्पूर्णीकृत्य पाठितः सः । तेनापि सर्वा अपि विद्याः स्वकीयाः कुमारस्य प्रदत्ताः । वसन्तसेनायाश्च पैतृष्वस्रीयः कनकशक्तेरप्रभवन् लज्जया संन्यस्य मृत्वा हिमचूल इति नाम्ना देवो जातः । कनकशक्तिरपि भार्याद्वयसहितो हिमवद्गिरौ विपुलमतिपार्श्वे प्रतिबुद्धः प्रवव्राज । एकदा सिद्धिपदे गिरौ प्रतिमास्थः कनकशक्तिमुनिर्हिमचूलेन सुरेण विविधैरुपसर्गैः कदर्थितः । मुनिनापि सम्यगधिसह्य क्षपितानि घातिकर्माणि । तत्कालं समुत्पन्नं केवलज्ञानम् । समायाताः केवलिमहिमानं कर्तुममर्त्याः । विलक्षीभूय गतः सः ।।।

अन्यदा सहस्रायुधं राज्ये न्यस्य श्रीवज्रायुधः क्षेमङ्करतीर्थपार्श्वे राज्ञां राज्ञीनां च चतुःसहस्र्या सुतानां च सप्तत्या सह प्रव्रजितः । अन्यदा सिद्धिगिरौ गत्वा वैरोचने स्तम्भे वार्षिकीं प्रतिमां स्थितः । ततश्चाश्वग्रीवसुतौ मणिकुम्भमणिकेतू कृतबालतपःप्राप्तासुरत्वौ अमिततेजोभववैरादागत्य वज्रायुधमुनेर्विविधानुपसर्गान् कर्तुं प्रवृत्तौ । स च महासत्त्वतया–

**यद्यत् पुरा परजनेष्वसुखं त्वयैव,**
**क्षेत्रेषु बीजमिव रोपितमात्मनोऽस्ति ।**
**तत्तत् फलं प्रकटयिष्यति मा स्म जीव,**
**क्लीबो भवः प्रमुदितस्त्वमभूस्तदा यत् ।।१७५।।**(वसन्ततिलका)

इत्यादि भावनया सम्यगधिसेहे । तदानीं च तं वन्दितुं रम्भातिलोत्तमाप्रभृतयो देव्यः सम्प्राप्ताः। ताभिर्वित्रासितोऽसौ ।।

सहस्रायुधोऽपि पिहिताश्रवमुनिपार्श्वे प्रदत्तसुतराज्यः प्रवव्राज । एकदा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मिलितौ द्वावपि मुनी वज्रायुधसहस्रायुधौ पितृपुत्रौ । ततोऽतिसंवेगरङ्गादङ्गमप्युत्स्रष्टुकामौ गतावीषत्प्राग्भारगिरौ । तत्र पादपोपगमनमनशनं कृत्वा समाधानेन मृत्वा च द्वावपि तृतीये ग्रैवेयके पञ्चविंशतिसागरोपमायुषौ देवौ जातौ ।।८।।९।।

जम्बूद्वीपे प्राग्विदेहे पुष्कलावतीविजये पुण्डरीकिण्यां घनरथो राजा प्रियमतिर्मनोरमा च तस्य द्वे भार्ये । तृतीयाद् ग्रैवेयकाच्च्युत्वा वज्रायुधजीवः प्रियमत्याः कुक्षाववतीर्य पुत्रो जातः । स्वप्ने मेघदर्शनाद् मेघरथ इति कृतं नाम । सहस्रायुधजीवोऽपि ततश्च्युत्वा मनोरमायाः कुक्षाववतीर्य पुत्रो जातः । रथस्वप्नदर्शनाद् दृढरथ इति कृतं नाम । द्वावपि प्राप्तौ यौवनं कलाकलापं च ।।

एकदा सुमन्दिरपुरस्वामिनो निहतशत्रुनृपस्यामात्यः समेत्य घनरथं राजानं विज्ञप्तवान्– देव ! मत्स्वामिनस्तनयाद्वयं कुमारमेघरथो, दृढरथकुमारः पुनरेकां कन्यामुद्वहतामिति । ततः सम्मान्य तं राज्ञा प्रहितौ प्रधानपरिवारौ कुमारौ सुमन्दिरं पुरं प्रति । गच्छतोश्च तयोरवान्तरे सुरेन्द्रनृपदूतः समेत्याऽस्मद्देशमध्ये न गन्तव्यमिति प्रोवाच । ताभ्यामप्युक्तम्– नान्यदीयोऽयं देशः । यद्यन्योऽपि स्वाम्यस्ति तदा स समेत्यावां निवारयत्विति । ततस्तद्वचनकुपितः समायातः सर्वाभिसारेण सुरेन्द्रदत्तः । युध्यमानश्च जितः ताभ्याम्। गृहीतः पातयित्वा, नीतस्तस्यैव पुरे । घोषिता तत्र निजाज्ञा। ततः सहैव नीतः सुमन्दिरं पुरम् । महत्या च प्रतिपत्त्या निहतशत्रुणा कारितौ तौ स्वपुत्रीणां पाणिग्रहणम् । प्रियमित्रा मनोरमा च मेघरथेन परिणीते । सुमतिश्च दृढरथेनोदूढा । सगौरवं सम्मानितौ विसृष्टौ च तौ प्रचलितौ स्वनगरीं प्रति। आसन्नपुरश्च स्थापितः सुरेन्द्रदत्तस्तथैव स्वे राज्ये । सम्प्राप्तौ प्राप्ताभ्यधिकप्रतापसिद्धिवैभवौ स्वं पुरम् । दानभोगसुखमयं कालं गमयतः । जातः प्रियमित्राया नन्दिषेणो नाम पुत्रः । मनोरमायाश्च जातो मेघसेनो नाम सुतः । सुमत्याश्च रथसेनो नाम सञ्जातस्तनयः।।

एकदा महाराजघनरथे मेघरथदृढरथादिपरिवारसहिते सभामध्यमध्यासीने सुसेना नाम वेश्या कुक्कुटमेकमादाय समायातवती । विज्ञप्तं तया– देव ! यद्ययं मदीय कुक्कुटोऽन्यैः कुक्कुटैर्जीयते तदा दीनारलक्षमहं ददामीति भणित्वा मुक्त सभायां

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुक्कुटः । ततो राज्ञा पठितम्–

**क्षेत्रं कलत्रमपि नात्र विरोधहेतु–**
**नैवात्मनो विजयतः फलमस्ति किञ्चित् ।**
**पक्षक्षयः किमपरं कलहः कुटुम्बे,**
**निष्कारणो रणरसस्तव ताम्रचूड! ।।१७६।।** (वसन्ततिलका)

ततश्च मनोरमया स्वकुक्कुटः समानीतस्तेन सह योधयितुम् । युध्यमानयोश्च तयोर्घनरथेन राज्ञा ज्ञानत्रयधरेणोक्तम्– अनयोर्मध्यादेकोऽपि न जेष्यते(-ति)। श्रुणुत प्राग्भववृत्तमनयोः ।।

प्रथमं द्वौ वाणिजकौ महारम्भौ निर्दयौ परस्परं युद्ध्वा मृत्वा गजौ जातौ । तत्राप्यन्योन्यं युद्ध्वा मृत्वा च महिषौ सञ्जातौ । ततोऽपि प्राग्वद् मृत्वा मेषौ जातौ। ततश्च मृत्वा कुक्कुटाविमावुत्पन्नौ। अनयोर्भवान्तरवैरमस्ति, ततो द्वयोरपि न जय इति। ततो मेघरथकुमारेणोक्तम्— देव ! न इमावेकाकिनौ किन्तु विद्याधराधिष्ठितौ स्तः । तथा हि— धातकीखण्डे पूर्वैरवते वज्रपुरेऽभयघोषो राजा। सुवर्णतिलका भार्या। विजयो वैजयन्तश्च द्वौ पुत्रौ । अन्यदा वसन्ततौ सान्तःपुरे राजन्युद्यानं गते शङ्खपुत्री पृथ्वीसेनाख्या राज्ञी समाकर्ण्य मुनिदेशनां प्रतिबुद्धा प्रव्रजिता च । राजापि ततः प्रभृति भावितमना दानादिधर्मरतोऽनन्तनाथपार्श्वे विजयवैजयन्ताभ्यां सह प्रव्रजितोऽर्हद्भक्त्यादिभिः स्थानैस्तीर्थकरकर्मोपार्ज्य मृत्वा चाऽच्युते गतः। ततश्च्युत्वा पुण्डरीकिण्यां हेमाङ्गदवज्रमालिन्यां पुत्रस्तीर्थकरस्तत्र भवान् घनरथो जातः । विजयवैजयन्तौ च जम्बूद्वीपे वैताढ्ये स्वर्णपुरे गरुडवेगनृपधृतिसेनयोश्चन्द्र-तिलकसूर्यतिलकनामानौ पुत्रौ जातौ । तौ च ज्ञानिनः पार्श्वात् प्राग्भवपितरं तत्रभवन्तं ज्ञात्वा भवद्दर्शनोपायं कुक्कुटशरीरसङ्क्रमणं कृत्वैतौ समायातौ । इमौ च इतो गत्वा प्रव्रज्य च सेत्स्यतः । इमां कथामाकर्णयन्तौ कुक्कुटावपि प्रतिबुद्धौ । सम्यक्त्वमनशनं च श्रीघनरथपार्श्वे प्रतिपद्य मृत्वा व्यन्तरौ जातौ । तौ च तत्कालं विमानं विकृत्य सम्प्राप्तौ मेघरथसमीपे । स्ववृत्तान्तं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कथयित्वा सपरिवारमपि मेघरथं विमानमारोप्य सद्वीपसागरां वसुन्धरां विलोकयितुं तीर्थानि च वन्दयितुं नीतवन्तौ । सर्वं प्रदर्श्य स्वस्थानमानीय स्वर्णरत्नवृष्टिं च कृत्वा जग्मतुः स्वं स्थानम् ।।

श्रीघनरथोऽपि प्रव्रज्य तीर्थं प्रवर्त्य क्षीणाशेषकर्मा सिद्धिं प्राप्तः । मेघरथोऽपि राज्यं पालयन्नेकदा प्रियमित्रया प्रियया समं गत्वा सभायां सङ्गीतं कारयितुमुपविष्टः। तदानीं च भूतैरागत्य कृतः पूर्वरङ्गः । ततश्च विमानस्थो विद्याधर एकः सभार्यः सन् समेत्य क्षमयित्वा चागतः । ततः प्रियमित्रया पृष्टम्– किमेतदाश्चर्यान्तरमिति । ततः मेघरथः प्रोवाच– पुष्कराद्धभरते सङ्घपुरे राज्यगुप्तो नाम दुस्थित एकः कुलपुत्रकः। शङ्खिका नाम तत्पत्नी । ताभ्यामेकदा सङ्घगिरौ गताभ्यां समवसृतकेवलिपार्श्वे प्रतिपन्नो जिनधर्मः । कृतं च द्वे त्रिरात्रिके त्रिंशत् त्रिरात्राणि इति द्वात्रिंशत्कल्याणं[१] तपः । सर्वगुप्तमुनिपार्श्वे प्रव्रज्याऽऽचाम्लवर्धमानं तपः कृतम्। समाधिना च मृत्वा द्वावपि ब्रह्मलोके देवौ जातौ । ततोऽपि च्युत्वा जम्बूद्वीपे भरते वैताढ्येऽलकायां विद्युद्रथनृपमानसवेगयोः पुत्रः सिंहरथनामा जातः कुलपुत्रकजीवः। वेगवतीनाम्ना चाऽस्य पत्नी । विद्युद्रथस्तं राज्येऽन्यस्य प्रव्रज्य च कर्मक्षयात् सिद्धः । सिंहरथराजाऽपि विमानारूढस्तीर्थकरं वन्दित्वा व्यावर्तमानो नभसि ममोपर्यागतः । स्खलितमस्य विमानम् । ततः कोपाद् मामुत्क्षेप्तुमसौ प्रवृत्तो मया

---

**१– उपवासत्रयं कृत्वा, द्वात्रिंशदुपवासकाः। एकभक्तांतरास्तस्मादुपवासत्रयं वदेत्।।१।।**

બત્રીશ ઉપવાસ વડે જણાતાં કલ્યાણકોને 'બત્રીશકલ્યાણક' કહે છે. તેમાં પ્રથમ અટ્ઠમ કરીને પારણું કરવું, પછી એકાંતરા એકાસણાના પારણાવાળા બત્રીશ ઉપવાસ કરવા તથા છેડે અટ્ઠમ કરીને પારણું કરવું. એમ કરવાથી આ તપ આડત્રીશ ઉપવાસ અને ચોત્રીશ પારણા વડે એટલે બોંતેર દિવસે પૂર્ણ થાય છે. આ તપનુ ફળ તીર્થંકરનામકર્મની પ્રાપ્તિ થાય તે છે. આ સાધુ તથા શ્રાવકને કરવાનો આગાઢ તપ છે.

આ તપ જંબૂદ્વીપમાં રહેલા મહાવિદેહમાં ઉત્કૃષ્ટ કાળે થયેલા ૩૨ પ્રભુના કેવળજ્ઞાન પ્રાપ્તિરૂપ કલ્યાણકના આરાધન સંબંધી જાણવો.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

च वामेन दोष्णा समाक्रान्तः। ततो विरसं रसित्वा मामेवानुनयाय सङ्गीतकं कारितवानसौ । क्षमयित्वा मां गतः। स्वस्थाने गत्वासौ पुत्रं राज्ये न्यस्य मत्पितुस्तीर्थकरस्य पार्श्वे प्रव्रज्य कर्मक्षयात् सेत्स्यतीत्यस्य वृत्तान्तः ।।

अन्यदा पौषधशालायां धर्मं व्याख्यानयतः सतो मेघरथनृपस्योत्सङ्गे भयत्रस्तः पारापत एकः पपात । मनुष्यवाचा स्वस्याऽभयं तस्मिन् याचमाने मा भैषीरिति प्रतिपन्नं मेघरथनृपेण तद्रक्षणम् । क्षणाच्च मुञ्च मुञ्च मद्भक्ष्यममुमिति ब्रुवाणस्तस्यानुमार्गं चागतः। श्येनः । प्रोक्तं राज्ञा- नायं शरण्यः समर्प्यते । तवापि परप्राणापहारादात्मवपुःपोषःशोष एव पारमार्थ्येन। किञ्च-

**क्षुधो निरोधः क्रियते स्वमृत्यो-र्निवृत्तये सर्वजनेन तावत् ।**
**कृत्यः स चेदन्यवधेन यैस्तत् त एव भूतप्रलयो न चान्यः ।।१७७।।**

(उपजातिः)

यदि चावश्यं नैनं विमुञ्चसि तदा मदङ्गमांसं भक्षयेति । तेनाऽप्यस्त्विति प्रोक्ते राज्ञा तुलायामेकतः पारापतोऽन्यतः स्वाङ्गादुत्कृत्योत्कृत्य प्रक्षिप्तं मांसम् । दिव्यशक्त्या तस्मिन् [१]लघयत्यपि मांसम्, न मनाग्मात्रमपि राजा विरमति दीनमनाश्च न भवति । ततः प्रत्यक्षीभूय देवः प्रोवाच-

**भवद्गुणानां पयसामिवाब्धेः, कः पारमाप्नोति निरीक्ष्यमाणः ।**
**तेषामुपर्येव तरन्ति [२]तृण्या, इव प्रशंसाश्च [३]मरुत्वतोऽपि ।।१७८।।**

(उपजातिः)

अन्यच्च-

**अल्पोऽपि जन्तुः परिपीडितो यै-**
**स्तेऽप्येनसां यान्ति परं न पारम्।**

१ लघयति-नामधातुः।। २ तृणपुञ्जः।। ३ इन्द्रतोऽपि।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**पात्रं पवित्रं तु निपीडितं यै-**
**स्तेषां क्व शुद्धिः? क्व शिवं? क्व सौख्यम्?।।१७९।।**
(उपजातिः)

अपरं च-

**विनोद इत्यन्यजनेषु दुःखं,**
**दुःशिक्षिताः केऽप्यधिरोपयन्ति।**
**हृष्टाश्च केचित् प्रदिशन्त्यनुज्ञाम्,**
**यास्यन्ति धिक् ते क्व नु दुर्विनीताः?।।१८०।।** (उपजातिः)

इत्यादिना दुष्कृतगर्हां कृत्वा संहृत्य सर्वविकृतं सज्जशरीरं च राजानं कृत्वा त्वामीशानेन्द्रे प्रशंसत्यहमसहमानस्त्वत्परीक्षार्थमागतः क्षन्तव्य एव मदीयोऽयमविनय इत्युदीर्य च गतो देवो दिवम्।।

पृष्टममात्यादिभिः— किमनयोः श्येनपारापतयोर्वैरकारणम् ? कुतो वा देवस्य देवेनाऽनेन कष्टमाहितमिति। प्रोवाच राजा— पद्मिनीखण्डे पत्तने सागरदत्तस्य पुत्रौ धनो नन्दनश्च। वाणिजकौ वणिज्यार्थं गतौ देशान्तरे। उपार्जितानि प्राज्यानि रत्नानि। एकस्य च रत्नस्य कृते जातस्तयोः परस्परं कलहः। प्रवर्धमानकषायौ द्वावपि युद्ध्वा मृत्वा च जातौ खगावेतौ। इत्यनयोर्वैरानुबन्धः। देवजीवश्च मयाऽपराजितभवे दमितारिर्यो हतः सोऽयं बालतपःप्रभावादस्मत्प्रशंसामसहमानः समागत्य मम कष्टं जनितवानिति।।

श्येनपारापतावपि तदाकर्ण्य जातिस्मरणेन सञ्जातप्रत्ययौ वैराग्यात् सम्यक्त्वपूर्वमनशनं प्रतिपद्य समाधिना मृत्वा च जातौ भुवनपती देवौ । मेघरथनृपोऽपि खगयोर्मृत्युना विशेषोद्भूतवैराग्यः प्रतिमामास्थाय स्थितः। पुनरपीशानेन्द्रेण तस्य ध्याननिश्चलताविषया कृता प्रशंसा । ततः सुरूपाऽतिरूपा च तन्महिष्यौ मेघरथनृपस्य प्रतिमास्थस्य क्षोभायोपसर्गान् कर्तुमाजग्मतुः। स्वशक्तिसामग्र्येणापि तत्समाधिं भङ्क्तुमपारयन्त्यौ च ते परस्परमूचतुः—

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**तपःकृशतमवपुर्मनसि विस्मृतिर्योषिताम्,**
**पुराणमुनिसत्कथाश्रुतिरशीलल्लीलोज्झनम्**
**निजेन्द्रियजयः शमो गतकषायता ध्यानमि-**
**त्यमीषु किल हेतुषु स्फुरति कामना कापि न।।१८१।।** (पृथ्वी)

अयं च कारणकलापः सम्पूर्णः साधुनामेव सम्पत्तिमर्हति । अस्य पुनर्गार्हस्थ्यसौख्येऽप्यन्यैव कापिलिपि(?)रित्युदीर्य व्यर्थीभूय च जग्मतुः स्वं स्थानम्।।

अन्यदार्हन् श्रीघनरथस्तत्र समवसृतः। ततो मेघरथनृपः पुत्रे मेघसेने राज्यं रथसेने च यौवराज्यं निधाय दृढरथेन पुत्राणां सप्तशत्या राज्ञां चतुःसहस्त्र्या च समं प्रव्रजितः । दुस्तपं तपस्तप्त्वा तीर्थकरनामकर्मोपार्ज्य पूर्वलक्षं यावत् प्रव्रज्यां प्रपाल्याऽम्बरतिलकगिरौ दृढरथेन सममनशनेन समाधिना च मृत्वा सर्वार्थसिद्धविमाने त्रयस्त्रिंशत् सागरोपमायुष्कौ द्वावपि जातौ देवौ ।।१०-११।।

जम्बूद्वीपे दक्षिणभरतार्द्धे कुरुक्षेत्रे हस्तिनापुर इक्ष्वाकुवंश्यः श्रीविश्वसेनो राजा । अचिरादेवी पट्टराज्ञी । सर्वार्थसिद्धविमानाद् भाद्रपदकृष्णसप्तम्यां भरण्यां च्युत्वा मेघरथनृपजीवोऽचिरादेव्याः कुक्षाववतीर्णः । ज्येष्ठकृष्णत्रयोदश्यां भरण्यां चतुर्दशस्वप्नसूचितार्हज्जन्मा स्वर्णवर्णो मृगलाञ्छनश्चत्वारिंशद्धनुर्मानो वर्षलक्षायुर्ज्ञान-त्रयधरः सर्वलक्षणसम्पूर्णः समये जातः पुत्रः । तदानीं नारका अपि सुखमवापुः । जन्मोत्सवश्च प्राग्वत् । गर्भस्थप्रभौ चिरकालजमशिवं रोगाश्च सर्वेऽप्युपशमन्ति स्म। ततः शान्तिरिति प्रभोः पितृभ्यां नाम कृतम् ।।

प्राप्ततारुण्यश्च पित्रा यशोमतीप्रभृतीनां राजकन्यानां कारितः पाणिग्रहणम्। पञ्चविंशत्यब्दसहस्रान्तेऽभिषिक्तः पित्रा राज्ये । स्वयं चाऽश्वसेननृपः स्वकार्यसाधको जातः । दृढरथजीवोऽपि सर्वार्थसिद्धाच्च्युत्वा यशोमतीकुक्षाववतीर्णः । समये च चक्रस्वप्नसूचितोत्तमत्वः पुत्रो जातः । कृतं चक्रायुध इति नामास्य । प्राप्तयौवनः प्रधानराजपुत्रीं परिणायितो महोत्सवेन । प्रभोरथायुधशालायां पञ्चविंशत्यब्दसहस्रान्ते

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समुत्पन्नं चक्ररत्नम् । ततः साधितं तेन षट्खण्डमपि भरतक्षेत्रम् । जातस्तस्यैव हस्तिनापुरे चक्रवर्तित्वाभिषेकः ।।

पञ्चविंशत्यब्दसहस्रीं यावच्चक्रवर्तित्वपदं प्रपाल्य दत्त्वा सांवत्सरिकं दानं कृतषष्ठतपाः शक्रादिकृतनिःक्रमणोत्सवः सहस्राम्रवणे गत्वा ज्येष्ठकृष्णचतुर्दश्यां भरण्यां पश्चिमेऽह्नि वयसि च नृपसहस्रेण समं शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिक केशोत्पाटः प्रभुः सावद्यं मया निरस्तमिति चारित्रं प्रतिपन्नवान् । समुत्पन्नं मनःपर्ययज्ञानं प्रभोः । शक्रोऽपि क्षीराब्धौ क्षिप्त्वा प्रभुकेशान् कृतनन्दीश्वरयात्रः सम्प्राप्तः स्वं स्थानम् । द्वितीयदिने मन्दिरपुरे सुमित्रनृपगृहे परमान्नेन चकार प्रभुः पारणम् । वसुधारादिपञ्चदिव्यान्याविष्कृतानि देवैः । अनासीनोऽशयानश्च द्वादशमासान् (?) यावदन्यत्र विहृत्य पुनरपि तस्मिन्नेवोद्याने समेत्य नन्दितरुतलस्थः कृतषष्ठतपाः पौषशुद्धनवम्यां भरण्यां क्षीणघातिकर्मा पूर्वाह्ने केवलज्ञानमुत्पादितवान् । समवसरणादिकं च प्राग्वत्। समायाताः शक्रादयश्चक्रायुधनृपप्रभृतयश्च । कृता प्रभुणा देशना—

**नित्यत्वांबुमरुः सुखाद्रिकुलिशं वैरस्यकन्दाम्बुदः,**
**खेदाम्भोजलधिः पराभवतरुद्रोणीवसन्तागमः ।**
**श्रेयःसम्भवविन्ध्यभूधरसमुल्लासैककुम्भोद्भवः,**
**कं संहर्तुमलं भवो न भववज्जागर्ति तज्जाग्रत ।।१८२।।** (शार्दूलविक्रीडितम्)

इत्याद्याकर्णयतां जातः प्राज्यानां जनानां प्रतिबोधः । चक्रायुधनृपेण च पुत्रं कुरुचन्द्रं राज्ये न्यस्य नृपाणां पञ्चत्रिंशता समं गृहीतं व्रतम् । अन्यैश्च भूयोभिर्जनैः प्रतिपन्नं प्रव्रज्यासम्यक्त्वादिकम् । प्रभुणाऽपि स्थापिताश्चक्रायुधादयः षट्त्रिंशद् गणधराः ।।

प्रभुतीर्थे गरुडो यक्षः । स च गजस्थोऽसितः सूकरमुखो बीजपुराब्जभृद्दक्षिण-दोर्द्वयो नकुलाक्षसूत्रिवामभुजयुग्मः। निर्वाणी शासनदेवता। सा च गौरा पद्मस्था पुस्तकाब्जभृद्दक्षिणदोर्युगा कमलकमण्डलुमद्वामभुजयुग्मा।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

एवं सपरिवारपरिवृतः प्रभुरन्यत्राऽन्यत्र विहृत्य पुनरप्यागतो हस्तिनापुरे। तत्र च वन्दित्वा समये पृष्टं कुरुचन्द्रेण राज्ञा । भगवन्! केन कर्मणा मम राज्यं सम्पन्नं, प्रतिदिनं च पञ्चानां वस्तूनां समागमः? केन च कर्मणा तेषां मध्यादेकस्यापि वस्तुनो भोगं त्यागं वा कर्तुं न लभे इति । प्रभुरप्युवाच– पूर्वं श्रीपुरनगरात् सुधनो धनपतिर्धनदत्तो धनेश्वरश्चेति चत्वारः सोदरः। धनोपार्जनार्थं द्रोणस्य कर्मकरस्य शिरसि शम्बलमारोप्य रत्नद्वीपे प्रचलिताः । महाटवीतीरगतानां च तेषां त्रुटितप्रायं जातं शम्बलम् । तत्र च ध्यानस्थो मुनिरेकः परतटमाक्रमद्भिस्तैर्दृष्टः। प्रणतः सबहुमानं तैः चिन्तितं च हृदये । यदि कृतपारणको मुनिरटवीं प्रविशति तदायं नखिद्यते वयं चोत्तीर्णाः– इत्यालोच्य चतुर्भिर्भणितो द्रोणो, भद्र ! कारय महामुनिं पारणमिति । ततस्तेनानुमोदमानेन चिन्तितम्–

**स्वाम्यादेशः पेशलोऽपेशलो वा,**<br>
**कार्यः सर्वः सेवकैर्निर्विचारम् ।**<br>
**स स्याद् दैवात् पेशलश्चेत् कथञ्चित्,**<br>
**तत्तद्भाग्यं केवलं जागरूकम् ।।१८३।।** (शालिनी)

ततो भक्तिसारं सारवस्तुनाऽन्नादिकेन तेन कारितो मुनिः पारणम्। महाभोगफलमुपार्जितं तदा तेन कर्म । तेषां च रत्नद्वीपे गतानां सम्पन्नानि चिन्तितानि रत्नानि । स्वस्थानगतानां च जातो मनःसमीहिताभ्यधिको लाभः । दानभोगपराश्च गमयन्ति ते कालम् । परं धनेश्वरधनपती किञ्चिन्मायाबहुलौ स्वभावेन ।।

प्रथमं च द्रोणको विपद्य दानप्रभावाद् हस्तिनापुरस्वामिनः पुत्रः कुरुचन्द्र इति नाम्ना त्वं जातः । ततः सुधनधनदत्तौ मृत्वा काम्पील्ये कृत्तिकापुरे च वसन्तदेवकामपालाख्यौ व्यवहारिणः पुत्रौ जातौ। धनपतिधनेश्वरौ च मृत्वा शङ्खपुरे जयन्त्यां च मदिराकेसराख्ये व्यवहारिणो पुत्र्यौ जाते । चत्वारोऽपि क्रमेण प्राप्ता यौवनम्। काम्पील्याद् वसंतदेवो व्यवहर्तुं जयन्त्यां गतः । कामायतने तेन दृष्टा केसरा । तयापि स प्रेक्षितः । प्रादुर्भूतो द्वयोरपि स्नेहानुबन्धः । अन्योन्यप्रतिपन्नविवाहौ

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

द्वावप्यनुरागपरौ दिनानि गमयतः । अन्यदा श्रुतमिदं **वसन्तदेवेन– यत्केसरा** वरदत्तनाम्नेऽन्यस्मै वराय पित्रा प्रदत्ता । ततः केसरया– त्वामेवोद्वहामि म्रिये वा तत्रैवोद्याने इति कथयित्वा तस्य पुनरपि धृतिरुत्पादिताऽस्ति।।

एवं च सति सम्प्राप्तो विवाहदिवसः । सम्प्राप्तो वरदत्तः परिणेतुम् । ततो वसन्तदेवोऽत्याकुलतया गत्वा प्रथममेवोद्याने वृक्षशाखायां स्वमुद्बन्ध्य मुक्तवान् । क्षणेन मूर्च्छितः स । भवितव्यतावशेन तत्र पर्यटता केनापि पुरुषेण दृष्टस्तथास्थितः। सहसैव क्षुरिकया पाशमपास्य जलाद्यैः स्वस्थीकृत्य पृष्टो मरणाध्यवसायहेतुः । कथितः केसरावृत्तान्तस्तेन । ततो वसन्तदेवेनापि स पृष्टः। ततः स **प्रोवाच– कृत्तिकापुरवास्तव्यः** कामपालाभिधानोऽहम्। शङ्खपुरे चूतनिकुञ्जोद्याने कामायतने मया दृष्टा कन्यकैका। तयाऽप्यहं दृष्टः । स्पृष्टौ द्वावप्यनुरागेण। तदानीं चालानमुन्मूल्य प्रसृतो राजकुञ्जरः। पलायितो दिशो दिशां तस्याः परिच्छदः। तां च यावद् गजो गृह्णाति। तावन्मया प्रहतः[१] पेचके । वञ्चयित्वा च तं तामादायाऽन्यत्र निर्भये स्थाने नीत्वाऽहममुचम्। तत्राऽप्यायातः करी। ततः कोऽपि क्वापि गत। ततः प्रभृति च-

**नादौ धूमो न भस्मान्ते, यस्य प्रज्वलतः सतः ।**
**लक्ष्योऽङ्गशेषतः सैष, विरहाग्निर्ददाह माम् ।।१८४।।**

तदुपशमाय परिभ्रमाम्यहम् । साम्प्रतं च त्वं मे मित्रम् । ततस्त्वत्कार्याय त्वरिष्ये ।।

तत्र चायमुपायः । आवां कामायतने स्थास्यावः । सा च समेष्यति । तन्नेपथ्योऽहं भूत्वा केसरैवेयमिति निर्विकल्पैस्तल्लोकैः समं तद्गृहे गत्वा केनापि व्याजेन निर्गमिष्यामि । त्वं तु केसरां गृहीत्वा स्वेच्छं गच्छेरिति । द्वाभ्यामपि कृतं तथा । क्षणान्तरे सम्प्राप्ता केसरापि कामपूजार्थाम् । वसन्तदेवेन केसरासत्कं नेपथ्यादिकं कामपालाय दापितम् । कामपालनेपथ्यं च कारिता केसरा । द्वावपि निसृत्य गतौ समीहितस्थानम् । कामपालोऽपि केसरावेषो भूत्वा पञ्चनन्दिगृहे

१ पुच्छमूले।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गतः। इतश्च केसराया मातुलसुता जन्ययात्रायां निमन्त्रिता सती मदिराभिधाना शङ्खपुरात् तत्र समागतास्ति । सा च कामपालस्याग्रतो भूत्वा रह इति वक्तुं प्रवृत्ता। भगिनि! केसरे ! विषमं विधिविलसितम्। सर्वथा न भवति चिन्तितम् । तथापि त्वं धन्यैव यया हृदयवल्लभो जनः स्वदृग्भ्यां दृष्टः सम्भाषितश्च । मया त्वधन्यया शङ्खपुरे हस्तिवृत्तान्ते दृष्ट्वा स्वदयितः पुनर्न दृष्ट इति । कामपालेनोक्तम्- – मुग्धे ! स एवाहं कामायतनदृष्टः कुञ्जरविपत्त्राता तव भविष्यन् भर्ता मित्रकार्याय कृतस्त्रीवेष इति । तयाप्युपलक्ष्य सस्नेहमालोक्य भणितश्च–

यावत् कोऽप्यत्र नान्यः सञ्चरति तावच्चल । गम्यते समिहितं स्थानमिति । गतोऽसौ तया सह । क्रमेण मिलिताश्चत्वारोऽपि हस्तिनापुरे । सुखं विलसन्ति तत्र ते । ते च पूर्वभवस्नेहेन भवतः पञ्चानां वस्तूनामुपानयनं कुर्वन्ति । त्वं च तान्नोपलक्षयसि व्यक्त्या । समुदायार्जितत्वाच्च वस्तूनि नोपभोक्तुं लभसे इति । एतच्च प्रभुवचनमाकर्णयतां पञ्चानामपि सञ्जातं जातिस्मरणम् । ततः पञ्चभिरपि श्रीशान्तिनाथपार्श्वे प्रतिपन्नः श्रावकधर्मः। राज्ञा नीताश्च चत्वारोऽपि गृहम् । सोदर्याणामिव तेषां प्रणयसारं कृता प्रतिपत्तिः । ततः प्रभृति च समुदितैः पञ्चभिरपि कृतो विशिष्टतरो धर्मः । पञ्चाऽपि जाताः सुगतिसाधकाः क्रमेण ।।

प्रभोरपि सर्वपरिवारे साधूनां द्वाषष्ठिसहस्राः । साध्वीनां सहस्रा एकषष्ठिः षट्शती च । चतुर्दशपूर्विणामष्टशती । अवधिज्ञानिनां त्रिसहस्री । मनःपर्ययिणां चतुःसहस्री । केवलिनां त्रिचत्वारिंशच्छती । वैक्रियलब्धिमतां षट्सहस्री । वादिनां चतुर्विंशतिशती । श्रावकाणां द्वेलक्षे नवतिसहस्राः । श्राविकाणां त्रिलक्षी त्रिनवति सहस्राश्च।।

आसन्नमोक्षश्च प्रभुर्मुनीनां नवभिः शतैः समं सम्मेताद्रौ गत्वा मासिकेनानशने-नोर्ध्वस्थ एव ज्येष्ठकृष्णत्रयोदश्यां भरण्यां निर्वाणसुखभाग् बभूव । मोक्षमहिमा च प्राग्वत् । कौमारे मण्डलिकत्वे चक्रित्वे व्रतित्वे च प्रत्येकं प्रत्येकं पञ्चविंशतिवर्षसहस्राः। एवं प्रभोर्वर्षलक्षमेकं सर्वायुः । श्रीधर्मनाथनिर्वाणात् पादोनपल्यन्यूनेषु त्रिषु सागरोपमेषु

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गतेषु श्रीशान्तिनाथस्य मोक्षः ।।

**विद्योतते हृदयवेश्मनि यस्य दीप्रः,**
**श्रीशान्तिनाथसुचरित्रमणिप्रदीपः ।**
**तद्दर्शनस्य महिमा प्रसरन् कदापि,**
**व्यालुप्यते न खलु मोहमहान्धकारैः ।।१८५।।** (वसन्ततिलका)

## ।। श्रीकुन्थुनाथचरित्रम् ।।

**कन्दर्पदर्पहरणप्रवणं शरीरम्,**
**श्रीर्दानभोगसुभगा पदमर्त्यमैन्द्रम् ।**
**निःशेष एष यदयत्नतः प्रभावो**
**जीवेषु वल्गति स कुन्थुजिनोऽवताद् वः ।।१८६।।**
(वसन्ततिलका)

जम्बूद्वीपे प्राग्विदेहे आवर्त्तविजये खड्गिपुर्यां सिंहावहो राजा राज्यं करोति। अन्येद्युः सदस्यासीने तस्मिन् राजनि मात्सर्यादेकेन जनेनागत्य निर्दोषस्यापि दूषणमारोपितम् । ततश्चिन्तितं राज्ञा—

**दोषानेवो—च्चरितुमसकृत् स्वामभिज्ञां रसज्ञा-**
**मिभ्यानभ्यर्थयितुमपरान् पाणिमुत्तानमेव ।**
**प्रज्ञामज्ञा—नभिभवितुमे—वात्मजन्मापि पाप्मा**
**रम्भायैवोद्वहति किल यो मूर्तमेनः स मर्त्यः।।१८७।।** (मन्दाक्रान्ता)

इत्यादिभावनया प्रवर्द्धमानवैराग्यः सहसैवोत्सृज्य राज्यं प्रव्रजितः संवरसूरिपार्श्वे। दुश्चरं तपश्चरणं कृत्वाऽर्हद्भक्त्यादिभिः स्थानैस्तीर्थकरनामकर्मोपार्ज्य मृत्वा च समाधिना सर्वार्थसिद्धिविमाने देवो जातः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जम्बूद्वीपेऽत्रैव भरते हस्तिनापुरे शूरो राजा । श्रीः पट्टराज्ञी । श्रावणकृष्णनवम्यां कृत्तिकायां सिंहावहनृपजीवः सर्वार्थसिद्धविमानाच्च्युत्वा तस्याः कुक्षाववतीर्णः। वैशाखकृष्णचतुर्दश्यां कृत्तिकायां चतुर्दशस्वप्नसूचितचक्रभृत्तीर्थकृज्जन्मा स्वर्णवर्णच्छगल- लाञ्छनः पञ्चत्रिंशद्धनुर्मानः पञ्चनवतिवर्षसहस्रायुर्ज्ञानत्रयधरः सर्वलक्षणसम्पूर्णः पुत्रो जातः। जन्मोत्सवश्च प्राग्वत् । गर्भस्थे प्रभौ जनन्या स्वप्ने कुन्थुनामा रत्नसञ्चयो दृष्टः। ततः पितृभ्यां कुन्थुरिति कृतं नाम । प्राप्ततारुण्यश्च कारितो राजपुत्र्या पाणिग्रहणोत्सवं महाविभूत्या । वर्षाणां त्रयोविंशतिसहस्रेषु सार्द्धाष्टमशतेषु गतेषु पित्रा स्थापितो राज्ये । एतावत्सु च वर्षेष्वतिक्रान्तेष्वायुधशालायामुत्पन्नं चक्ररत्नम् । साधितं षट्खण्डमपि भरतक्षेत्रम् । जातश्चक्रवर्तित्वाभिषेकः ।।

पूर्वोक्तमेव कालं यावच्चक्रिपदं प्रपाल्य सांवत्सरिकं दानं दत्त्वा कृतषष्ठतपाः शक्रादिकृतनिष्क्रमणोत्सवो वैशाखकृष्णपञ्चम्यां कृत्तिकायां सहस्राम्रवणे गत्वा पश्चिमेऽह्नि वयसि च राज्ञां सहस्रेण समं शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः सर्वं सावद्यं मया निषिद्धमिति चारित्रं प्रतिपन्नवान् । मनःपर्ययज्ञानं चोत्पन्नं प्रभोः। क्षिराब्धिक्षिप्तप्रभुकेशः कृतनन्दीश्वरयात्रो गतः शक्रः स्वस्थानम् । द्वितीयेऽह्नि चक्रपुरे व्याघ्रसिंहनृपगृहे परमान्नेन चकार प्रभुः पारणम् । वसुधारादिकं तत्राविर्बभूव। षोडशाब्दीं यावदन्यत्र विहृत्य पुनः सहस्राम्रवणमेवागतः प्रभुः। तिलकद्रुमतले कृतषष्ठस्य प्रभोश्चैत्रशुक्लतृतीयायां कृत्तिकायां घातिकर्मक्षयादुत्पन्नं पूर्वाह्ने केवलज्ञानम्। समवसरणादिकं च प्राग्वत् । सम्प्राप्ताः शक्रादयः। कृता प्रभुणा देशना—

**अनादिभवसम्भवा विषयवासना काप्यसौ,**
**तथा कथमपीन्द्रियैर्निविडमात्मनो योजिता ।**
**यथास्य निशि निद्रया प्रतिहतेन्द्रियव्यापृते-**
**रपि स्फुटमनिद्रवद्विषयपञ्चकासेवनम् ।।१८८।।** (पृथ्वी)

इत्यादिदेशनया प्रतिबुद्धाः प्राज्याः प्राणिनो जगृहुः सर्वविरतिं देशविरत्यादिकं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

च। स्वयम्भूप्रमुखाः पञ्चत्रिंशत् स्थापिताः प्रभुणा गणभृतः।।

प्रभुतीर्थे च गन्धर्वो यक्षः । स च श्यामो हंसस्थः वरदपाशिदोर्द्वयः । मातुलिङ्गाङ्कुशिवामभुजयुगः । बला शासनदेवी । सा च गौरा मयूरस्था । शूलबीजपुरकभृद्दक्षिणदोर्द्वया मुषण्ठिपङ्कजिवामभुजयुगा।।

सर्वपरिवारे च प्रभोः षष्टिसहस्राः साधूनाम् । साध्वीनामेत एव षट्शताधिकाः। चतुर्दशपूर्विणां षट्शती सप्ततिः च । अवधिज्ञानिनां पञ्चविंशतिशती । मनःपर्ययिणां त्रयस्त्रिंशच्छती चत्वारिंशच्च । केवलिनां द्वात्रिंशच्छती । वैक्रियलब्धिमतामेकपञ्चाशच्छती। वादिनां द्वासहस्रा । श्रावकाणां लक्षमेकमशीत्या न्यूनः सहस्रश्च । श्राविकाणां त्रिलक्षी एकाशीतिसहस्री च।।

आसन्नमोक्षश्च मुनिसहस्रेण समं सम्मेताद्रौ गत्वा मासमनशनेन स्थित्वा वैशाखकृष्णप्रतिपदि कृत्तिकायामूर्द्ध्वस्थ एवाऽक्षयं सुखं मुक्तौ प्रभुरवाप्तवान्। मोक्षमहिमा च प्राग्वत्। कौमारे राज्ये चक्रित्वे व्रते च प्रत्येकं सार्द्धाष्टमशतास्त्रयोविंशतिसहस्राः। वर्षाणां पञ्चनवतिसहस्राः प्रभोः सर्वायुः। श्रीशान्तिनाथनिर्वाणादर्द्धपल्योपमे गते श्रीकुन्थुनाथमोक्षः।।

**जागर्ति यन्मानसकाननान्तः,**
**श्रीकुन्थुतीर्थेशचरित्रसिंहः ।**
**अह्नाय तस्माद् विघटन्त एव,**
**कुकर्ममातङ्गघटाः समस्ताः ।।१८९।।** (इन्द्रवज्रा)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ।। श्रीअरचरित्रम् ।।

**सम्पूरयत्वभिमतान् स मनोरथान् वः**
**श्रीमानरो जिनवरोऽभिनवोरकोयम् ।**
**यः सर्वथा कुविषयं निखिलं निषेध्य,**
**सञ्चक्रमीहितगतिं नयति क्षणेन।।१९०।।** (वसन्ततिलका)

जम्बूद्वीपे प्राग्विदेहे वत्सविजये सुसीमायां पुर्यां धनपतिर्नृपो राज्यं पालयति। तदीयमण्डलीकेनैकेन स्वदेशे समुपद्रुताः। प्रजास्तदन्तिकं समायातांताभिर्विज्ञप्तं स्वदेशासौ ख्यम् । ततो राज्ञा चिन्तितम्–

**अन्यायेन धनाढ्यता परवधूसङ्गाद्विलासोत्सवः,**
**कारुण्योचितकारुलोककलहाद् दोर्विक्रमोपक्रमः।**
**आदेशैकवशंवदस्वविषय–ग्रामाकरोल्लुण्ठन,**
**व्यापाराज्जितकाशितात् क्व कुशलं यत्रेदृशाः स्युर्गुणाः ?।।१९१।।**

(शार्दूलविक्रीडितम्)

अनेनैव ध्यानेन प्ररूढवैराग्यः सहसैव राज्यमृत्सृज्य प्रव्रजितः । दुष्करं च तपस्तप्त्वाऽर्हदादिस्थानकैस्तीर्थकरनामकर्मोपार्जितवान् । चतुर्मासकोपवासपारणे च जिनदासश्रेष्ठिना कारितः पारणकम् । एवमनेकतपःपरः समये समाधिना मृत्वा नवमग्रैवेयके देवो जातः।।

जम्बूद्वीपे भरतेऽस्मिन्नेव हस्तिनापुरे सुदर्शनो राजा । देवीनामपट्टराज्ञी । फाल्गुनशुक्लद्वितीयायां रेवत्यां नवमग्रैवेयकाच्च्युत्वा धनपतिनृपजीवस्तस्याः कुक्षाववतीर्णः । मार्गशुक्लदशम्यां रेवत्यां चतुर्दशस्वप्नसूचिततीर्थकृच्चक्रिजन्मा स्वर्णवर्णो

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नन्द्यावर्तलाञ्छनस्त्रिंशद्धनूच्चश्चतुरशीतिवर्षलक्षायुर्ज्ञानत्रयधरः सर्वलक्षणसम्पूर्णः पुत्रो जातः । जन्मोत्सवश्च प्राग्वत् । स्वप्ने सौवर्णारकदर्शनात् प्रभोरर इति कृतं नाम। प्राप्तयौवनः प्रधानराजपुत्रीं पित्रा महोत्सवपूर्वं परिणायितः । जन्मतो वर्षाणामेकविंशतौ सहस्रेषु गतेषु पित्राऽभिषिक्तो राज्ये । एतावतश्च कालस्यान्तेऽस्त्रशालायां चक्ररत्नमुत्पन्नम्। अन्यान्यपि त्रयोदशरत्नानि यथास्थानमुत्पन्नानि । साधितं लीलयैव षट्खण्डमपि भरतक्षेत्रम्।।

पूर्वोक्तमेवकालं चक्रित्वेऽतिक्रम्य सांवत्सरिकं दानं दत्त्वा कृतषष्ठः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वा राज्ञां सहस्रेण सह मार्गशुक्लैकादश्यां रेवत्यां पश्चिमेऽह्नि वयसि च शक्रन्यस्तदेवदूष्यधारी कृतपञ्चमुष्टिककेशोत्पाटः सर्वं सावद्यं मया निषिद्धमिति चारित्रं प्रतिपन्नवान् प्रभुः। समुत्पन्नं मनःपर्ययज्ञानं प्रभोः। शक्रोऽपि क्षीराब्धिक्षिप्तप्रभुकेशः कृतनन्दीश्वरयात्रः प्राप्तवान् स्वं स्थानम् । राजपुरेऽपराजितनृपगृहे द्वितीयेऽह्नि परमान्नेन चकार प्रभुः पारणम्। जातानि तत्र पञ्चदिव्यानि। प्रभुश्चाऽन्यत्राऽनासीनोऽशयानश्च वर्षत्रयीं यावद् विहृत्य पुनः सहस्राम्रवणमायातः। कृतषष्ठस्य च सहकारमूले ध्यानस्थस्य कार्तिकशुक्लद्वादश्यां रेवत्यां प्रभोः पूर्वाह्णे घातिकर्मक्षयात् केवलज्ञानमुत्पन्नम्। समवसरणादिकं च प्राग्वत्। समायाताः शक्रादयः। कृता प्रभुणा देशना–

**अयनर्तुदिननिशानामिव भूयो जन्तुजीवितस्यापि।**
**आगतिरास्ते यदि तद् धर्मविधौ युक्तमालस्यम् ।।१९२।।**

इत्याद्याकर्ण्य प्राज्याः प्राणिनः प्रवव्रजुर्जगृहुश्च सम्यक्त्वादिकम् । कुम्भप्रभृतयश्च त्रयस्त्रिंशद् गणधराः प्रभुणा स्थापिताः ।।

प्रभुतीर्थे षण्मुखो यक्षः । स च त्र्यक्षः श्यामः शङ्खस्थः । मातुलिङ्गी शङ्खी खड्गी मुद्गरी पाश्यभयदश्चेति दक्षिणषड्भुजाः । नकुल–चाप–वर्म[1]–शूला–ऽङ्कुशा–ऽक्षसूत्रिणोऽस्य वामाः षड्भुजाः । धारणी शासनदेवता, नीलवर्णाभा

१ ०कवच०।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पद्मस्था मातुलिङ्गोत्पलभृद्दक्षिणदोर्द्वया, पद्माक्षिसूत्रिवामभुजयुगा ।।

सर्वपरिवारे च साधूनां पञ्चाशत्सहस्राः । साध्वीनां षष्टिसहस्राः । चतुर्दशपूर्विणां दशाधिका षट्शती । अवधिज्ञानिनां षड्विंशतिशती । मनोविदां सपञ्चाशत् पञ्चविंशतिशती । केवलिनामष्टाविंशतिशती । वैक्रियलब्धिमतां त्रिसप्ततिशती । वादिनां षोडशशती । श्रावकाणां लक्षमेकं चतुरशीतिसहस्राः । श्राविकाणां त्रिलक्षी द्वासप्ततिसहस्राः ।।

आसन्नमोक्षश्च प्रभुर्मुनिसहस्रेण समं सम्मेताद्रौ गत्वा मासमनशनेन स्थित्वा मार्गशुक्लदशम्यां रेवत्यामूर्ध्वस्थ एव कर्मक्षयादक्षयं मोक्षसुखमाससाद । मोक्षमहिमा च प्राग्वत् । कौमारे राज्ये चक्रित्वव्रतित्वेषु प्रभोः प्रत्येकमेकविंशतिवर्षसहस्राः। चतुरशीतिवर्षसहस्राः प्रभोः सर्वायुः । श्रीकुन्थुनाथमोक्षाद् वर्षकोटिसहस्रोने पल्योपमतुर्यांशके गते श्रीअरनाथस्य मोक्षः ।।

**यस्योज्ज्वले हृदयमन्दिरभित्तिभागे-**
**न्यस्तं समस्त्यरजिनेशचरित्रचित्रम् ।**
**तद्वीक्षणैकरसिकेव कदापि वक्षो,**
**लक्ष्मीः परित्यजति नैव नरस्य तस्य।।१९३।।** (वसन्ततिलका)

## ।। आनन्द-पुरुषपुण्डरीक-बलीनां चरित्रम् ।।

विजयपुरे सुदर्शनो राजा दमधरमुनिपार्श्वे प्रव्रज्य तपस्तप्त्वा सहस्रारे सुरो जातः।।

भरतक्षेत्रे पोतनपुरे प्रियमित्रो राजा । तस्य भार्यां सुकेतुर्जहार । तत्पराभवात् प्रियमित्रः प्रव्रज्य तपस्तप्त्वा सुकेतुवधाय कृतनिदानो मृत्वा माहेन्द्रे कल्पे देवो जातः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वैताढ्येऽरिञ्जयपुरे भवं भ्रान्त्वा सुकेतुजीवः प्रतिविष्णुर्बलिनामा जातः । स च पञ्चषष्टिवर्षसहस्रायुः श्याम एकोनविंशद् धनूच्चस्त्रिखण्डभोक्ता सम्पन्नः ।।

जम्बूद्वीपे दक्षिणभरतार्द्धे चक्रपुरे महाशिरो नृपः । तस्य वैजयन्ती लक्ष्मीवती च द्वे भार्ये । सुदर्शनजीवः सहस्राराच्च्युत्वा वैजयन्त्याः कुक्षाववतीर्णः । इभेन्दूवृषभसर इति चतुःस्वप्नसूचितबलजन्मा गौर एकोनत्रिंशद्धनुर्मानः पुत्रो जातः । तस्य कृतमानन्द इति नाम ।।

प्रियमित्रजीवोऽपि माहेन्द्राच्च्युत्वा लक्ष्मीवत्याः कुक्षाववतीर्णः । सिंहाभिषेक-कुम्भाब्धिसूर्याग्नीरत्नसञ्चय इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा श्याम एकोनत्रिंशद्धनूच्चः पुत्रो जातः । कृतं तस्य पुरुषपुण्डरीक इति नाम । प्राप्ततारुण्यौ तालतार्क्षध्वजौ नीलपीताम्बरौ द्वावप्यन्योन्यमतिस्नेहेन वर्तेते । पुरुषपुण्डरीकेण च परिणीता उपेन्द्रसेननृपपुत्री पद्मावती । तां च परिणीतां श्रुत्वा प्रत्यर्द्धचक्री बलिरपहर्तुमागतः । जातं चान्योन्यं तयोर्युद्धम् । युध्यमानयोश्च क्षीणान्यायुधानि। क्षिप्तं बलिना चक्रम् । पुरुषपुण्डरीकेण तेनैव चक्रेण हतो बलिः । उद्घुष्टं देवैर्दिवि जयत्यर्द्धचक्री पुरुषपुण्डरीक इति। क्षिप्ता च शिरसि पुष्पवृष्टिः । साधितं भरतार्द्धम्। व्यावृत्तेन कटीं यावदुत्पाटिता मगधेषु कोटिशिला।।

कौमारे वर्षाणां सार्द्धे द्वे शते । मण्डलिकत्वे तदेव । दिग्जये षष्टिः। राज्ये चतुःषष्टिः सहस्राश्चतुःशती च चत्वारिंशच्च । सर्वायुरस्य पञ्चषष्टिसहस्राः। स्वायुः प्रान्ते मृत्वा षष्टिं पृथ्वीं प्राप्तः । आनन्दोऽपि भ्रातृविरहवैराग्यात् प्रव्रज्य सर्वकर्मक्षयाद् मोक्षं गतः। पञ्चाशीतिसहस्राः सर्वायुरस्येति।।

## ।। अरतीर्थे सुभूमचक्रिकथा ।।

अत्रैव भरते विशाले पुरे भूपालो राजा । स कदाचिद् बहुभिर्नृपैः पराभूतः। स्वेनैव वैराग्येण सम्भूतमुनिपादान्ते प्रवव्राज । अनन्यसामान्यप्रभुत्वविषयं निदानं कृत्वा मृतः। जातश्च महाशुक्रे देवः।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इतश्च कश्चिदुच्छन्नवंशोऽग्निर्नाम पुमान् जमकुलपतेः शिष्यत्वं प्रपन्नः । कृतं जमदग्निरिति तस्य नाम। स च महातपःपरः सन् गमयन्नस्ति । अत्रान्तरे वैश्वानरनाम्नः सम्यग्दृष्टेर्देवस्य मिथ्यादृष्टिना धन्वन्तरिनाम्ना देवेन सह धर्माधर्मविषये वादो जातः। सम्यग्दृष्टिनाँ प्रोक्तम्– यल्लिङ्गिमात्रस्याऽपि जैनमुनेः सत्त्वं निश्चयश्च धर्मविषये, स मिथ्यादृष्टेर्महामुनेरपि नास्तीति । ततो द्वयोरपि गच्छतोस्तत्कालगृहीतव्रतः श्रीवासुपूज्यशिष्यो राजर्षिः पद्मरथो नाम दृष्टिपथमायातः । तस्यानुकूलाः प्रतिकूलाश्चोपसर्गाः प्राज्याः कृताः । स च यदा स्थाणुवन्न चलितस्ततः क्षमयित्वाऽग्रतो गतौ । दृष्टो जमदग्निः। तस्य श्मश्रुमध्ये चटकमिथुनरूपाभ्यां भूत्वा कृतं नीडम् । प्रारब्धा वार्ता । प्रोक्तं पक्षिणा– प्रिये ! याम्यहं कार्याय । यदि नागच्छामि तदा देवस्य शपथः । पक्षिण्याभिहितम्– यदि शीघ्रं न समेष्यसि तदास्य मुनेः पापेन ग्रहीष्यस इति । ततः कुपितेन मुनिना तन्मिथुनं हस्ते धृत्वा पृष्टम् । किमित्यहं पापीयानिति । तयोक्तम्– अपुत्रस्य गतिर्नास्तीति । ततो मुनेर्मनो गार्हस्थ्यायोत्सुकं जातम् ।। इदं च न तेन चिन्तितम् यत्–

**चेतश्चिन्तितमर्थजातमखिलं न क्वापि सम्पत्स्यते,**
**प्रत्याशां परिहृत्य कृत्यविषये–ष्वात्मन्न किं लीयते ।**
**सम्पत्तेर्विरहेण धर्मरहितः, प्राच्यो भवो निश्चितः,**
**कुध्यानेन विमूत्र्यते किमयम-प्येष्यंस्तु नामुं विना।।१९४।।**

(शार्दूलविक्रीडितम्)

गतश्च शतपुत्रीकस्य जितशत्रुनृपस्य समीपे। याचिता कन्यैका। राज्ञाप्यविमृश्यैव स्वपदमपरिज्ञायैव वस्तुसद्भावं प्रायः शलभानामिव रूपे दृक् पतति नारीणामिति परिभाव्य प्रसन्नमुत्तरं कृतम्– या काचित् त्वां स्पृहयति सा तवैव मत्पुत्रीति । ततः स वार्द्धकदूषितो यां यां भाषयति तया तया स निन्द्यते । ततः कुपितेन ताः सर्वाः कुब्जीकृताः । बहिश्च रेणुभिः क्रीडन्ती दृष्टा मुनिना कन्यैका। तदीयकन्ययाऽपि मुनिपाणिस्थबीजपूरकस्य ग्रहणाय हस्तो वाहितः।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तेन स एव हस्तो हस्तेन गृहीत एव न मुक्तः। ततो राज्ञा विवाहितः । सतां रेणुकेति च स्थापितं तस्या नाम । कलत्रप्रार्थनया च मुनिना सर्वा अपि श्यालिकाः सज्जीकृताः। तां च प्राप्तयौवनामुद्दिश्य मुनिना ब्राह्मचरुः प्रारब्धः । रेणुकाप्रार्थनया च हस्तिनापुरपतेरनन्तवीर्यस्य गृहीण्यास्तद्भगिन्याः कृते क्षात्रश्चरुरारब्धः । रेणुकया क्षात्रश्चरुः स्वयं भक्षितो ब्राह्मश्चरुर्भगिन्याः प्रदत्तः । ततो रेणुकाया जातो रामः पुत्रः। तद्भगिन्याश्च जातः कार्तवीर्यः।।

अन्यदा तत्र कश्चिद् विद्याधरः समायातः । तस्यातीसाररोगार्त्तस्य रामेण कृता परिचर्या । तेन तुष्टेन रामस्य दत्ता परशुविद्या । साधिता तेन। ततः प्रभृति च स परशुराम इति प्रसिद्धिं प्राप्तः । अन्यदा स्वस्वसुर्मिलनाय गता हस्तिनापुरे रेणुका। तत्रानन्तवीर्येण रेणुकायामुपपतित्वेन जनितः पुत्रः । सपुत्राप्यङ्गीकृता सा जमदग्निना। परं परशुरामेणासहमानेन परशुना परासुः कृता सा । एतच्चानन्तवीर्येण श्रुत्वा कृतं परशुरामं प्रति प्रयाणम् । परशुरामेण च हतो युद्धेऽनन्तवीर्यः । तत्सुतः कार्तवीर्यो जातो राजा हस्तिनापुरे । तेन मातुर्मुखात् पितृमरणवृत्तान्तं श्रुत्वा समागत्य हतः कुपितेन जमदग्निः । परशुरामश्च पितृवधामर्षात् कार्तवीर्यं मारयित्वा स्वयं हस्तिनापुरे राजा जातः । नामवीर्यभार्या सगर्भा सती प्रणश्य गता तापसाश्रमे। तत्र च प्रसूता पुत्रम् । स च चतुर्दशस्वप्नसूचितचक्रिजन्माष्टाविंशतिधनुर्मानः षष्टिवर्षसहस्रायुर्भूमिं च मुखेन गृह्णान् जातः। ततस्तस्य सुभूम इति कृतं नाम । प्रवर्धमानश्चास्ति ।।

इतश्च परशुरामेण प्रारब्धा निःक्षत्रिया कर्तुं पृथिवी । यत्र यत्र नष्टोऽपि क्षत्रियो भवति तत्र तत्र परशुर्ज्वलति । ततोऽभिज्ञानात् संशोध्य व्याकृष्य स निहन्ति । एवं च कुर्वन्नेकदा तत्राश्रमे समायातः परशुरामः। तत्र च सुभूमो भूमिगृहस्थः सन् महायत्नेन ध्रियते । ज्वलन्तं च परशुं दृष्ट्वा परशुरामेण पृष्टास्ते मुनयः । किमत्र कोऽपि क्षत्रियोऽस्तीति । तैरुक्तम्– पूर्वोपात्तव्रता वयमेव क्षत्रि नान्योऽत्रेति । ततोऽन्यत्र गतोऽसौ । तेनैव सप्तवारान् निःक्षत्रिया कृता पृथ्वी ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

क्षत्रियदंष्ट्राश्च स्थाले निक्षिप्य परशुरामेण धृताः सन्ति । एकदा परशुरामेण कुतो मे मृत्युरिति पृष्टो नैमित्तिकः । तेनोक्तम्– यो दंष्ट्रा एताः पायसीभूताः सतीर्भोक्ष्यते स ते वधक इति। तं चार्थं परिज्ञातुं परशुरामेण स्वशस्त्रागारे पुरः स्थापितक्षत्रियदंष्ट्रास्थाले सिंहासने नित्यं नित्यमुपवेश्यते । भोक्तुं समायातोऽभिनवोऽतिथिः ।।

इतश्च प्राप्ततारुण्यस्य सुभूमस्य मेघनादो नाम विद्याधरः स्वं (स्वां) कन्यां दत्त्वा स्वयं च तस्यैव सेवको जातः। अन्यदा सुभूमेन भूमिगृहस्थेन स्वमाता पृष्टा। किमेतावानेव जीवलोकोऽयमुताऽन्योऽप्यस्तीति । ततो जनन्या परशुरामकृतो राज्यापहारः पत्युर्मृत्युश्च सव्यक्तिकं कथितस्तस्य । ततः सुभूमः कुपितो गतो हस्तिनापुरे। शस्त्रागारसिंहासने चोपविश्य पायसीभूतास्ताः क्षत्रियदंष्ट्राः सर्वा अपि बुभुजे । तद्रक्षकान् ब्राह्मणांश्च हतवान् । तद्वधादभिधावितः सक्रोधः परशुरामः । प्रक्षिप्तः क्षिप्रं तं प्रति परशुः । स च जातो विफलः । सुभूमेन तु दंष्ट्रास्थालमुत्पाट्य चक्रवत् प्रक्षिप्तम् । तेन च्छिन्नमौलिर्मृतः परशुरामः । जातः सुभूमश्चक्री । साधितं षड्खण्डमपि भरतक्षेत्रम् । एकविंशतिवारान् निर्माहना कृता मेदिनी पितृवैरात् । तेन कृतश्च मेघनादो वैताढ्यश्रेणिद्वयनायकः । अस्य च कौमारे वर्षाणां सहस्रपञ्चकम्। तदेव मण्डलिकत्वे । पञ्चशती च दिग्जये । पञ्चशती न्यूनं लक्षस्याऽर्द्धं चक्रित्वे। एवं षष्टिवर्षसहस्राः सर्वायुरस्य । अन्ते च क्रूरतरकर्मा महापातकी सन् मृत्वा सप्तमीं पृथ्वीं प्राप्तवानिति।।

## ।। अरतीर्थे नन्दन-दत्त-प्रह्लादानां चरित्रम् ।।

जम्बूद्वीपे प्राग्विदेहे सुसीमायां वसुन्धरो राजा राज्यं प्रोज्झ्य सुधर्ममुनिपार्श्वे प्रव्रजितः। तपस्तप्त्वा मृत्वा च ब्रह्मलोके देवो जातः ।।

जम्बूद्वीपे भरतार्द्धेऽत्रैव शीलपुरे मन्दिरधीरो राजा, पुत्रो ललितमित्रः । अयमन्यायीति राज्ञो निवेद्य खलनाम्ना मन्त्रिणा निर्वासितः पुरात् । दत्तमन्यस्य

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुमारस्य यौवराज्यम् । ललितमित्रोऽपि पराभव इति विरक्तो घोषसेनमुनिपार्श्वे प्रव्रज्य तपश्च तप्त्वा खलवधं प्रति कृतनिदानोऽनशनेन मृत्वा सौधर्मे देवो जातः।।

खलोऽपि भवं भ्रान्त्वा जम्बूद्वीपे वैताढ्ये सिंहपुरे विद्याधरेन्द्रः प्रह्लादनाम (-मा) षड्विंशतिधनूच्चः पञ्चषष्टिवर्षसहस्रायुः प्रत्यर्द्धचक्री जातः ।।

अत्रैव भरतार्द्धे वाराणस्यामग्निसिंहो राजा । जयन्ती शेषवती च तस्य द्वे भार्ये । ब्रह्मलोकाद् वसुन्धरजीवश्च्युत्वा जयन्तीकुक्षाववतीर्णः । इभेन्दू वृषभः सरः इति चतुःस्वप्नसूचितबलभद्रजन्मा पुत्रो जातः। कृतं च नन्दन इति तस्य नाम । ललितमित्रजीवोऽपि सौधर्माच्च्युत्वा शेषवतीकुक्षाववतीर्णः। सिंहाभिषेककुम्भाब्धि-सूर्याग्नीरत्नसञ्चय इति सप्तस्वप्नसूचितार्द्धचक्रिजन्मा पुत्रो जातः। कृतं च दत्त इति तस्य नाम । तौ च गौरश्यामौ तालगरुडध्वजौ षड्विंशतिधनूच्चौ द्वौ स्नेहेन वर्तेते।।

एकदाग्निसिंहनृपस्याऽऽलानशालायामैरावणसदृशहस्तिनं दृष्ट्वा कलहकौतुकी नारदः प्रह्लादपार्श्वे गतः । सत्कृत्य तेन महत्या प्रतिपत्त्या दृष्टं किमपि क्वाप्याश्चर्यमिति पृष्टः— तेनोक्तम्— वाराणस्यामग्निसिंहस्य नृपस्य हस्तिशालायामैरावणतुल्यहस्त्यस्तीति। तच्छ्रुत्वा प्रह्लादेन प्रहितः स्वदूतस्तदानयनायाऽग्निसिंहसमीपे । आनन्ददत्ताभ्यां तिरस्कृतो दूतः । ततः कोपकम्प्रप्रह्लादः सर्वसन्नाहेन गतः सहसैव वाराणसीं प्रति। तावप्यागतौ सम्मुखम् । युध्यमानानां च तेषां क्षीणान्यायुधानि । क्षिप्तं प्रह्लादेन चक्रम् । तेनैव चक्रेण दत्तश्चिच्छेद प्रह्लादमुर्द्धानम् । दत्तशिरसि च पपात पुष्पवृष्टिः। जयत्यर्द्धचक्री दत्त इत्युद्घुष्टं देवमागधैः । साधितमनेन भरतार्द्धम् । व्यावर्तमानेन जङ्घां यावदुत्पाटिता मगधेषु कोटिशिला ।।

कौमारे वर्षाणां द्वे शते, मण्डलिकत्वे पञ्चाशत् , दिग्जये तदेव । राज्ये पञ्चपञ्चाशत् सहस्रा सप्तशती च । सर्वायुरस्य षट्पञ्चाशत्सहस्राः । स्वायुःप्रान्ते मृत्वा पञ्चमीं पृथ्वीं प्राप्तवान् । नन्दनोऽपि भ्रातृशोकाद् भुवनशोचमुनिपार्श्वे प्रव्रज्य केवली च भूत्वा पञ्चषष्ट्यब्दसहस्रायुः सिद्धः ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

## ।। श्रीमल्लिनाथचरित्रम् ।।

**भूयादुरन्तभववल्लिविकर्त्तनाय,**
**देवः सुदर्शनधरस्तव मल्लिनाथः ।**
**सन्नन्दकं नरकभेदकरं चरित्रम्,**
**स्त्रीत्वेऽपि यस्य पुरुषोत्तमतां शशंस ।।१९५।।** (वसन्ततिलका)

जम्बूद्वीपेऽपरविदेहे सलिलावत्यां विजये वितशोकायां पुर्यां बलो राजा । धारिणी पत्नी । तयोः पुत्रो महाबलः । स चैकस्मिन्नेव दिने पित्रा कन्यानां पञ्चशतानि कमलश्रीप्रभृतीनि परिणायितः । अचल-धरण-पूरण-वसु-वैश्रवणा-ऽभिचन्द्राख्याः षट् सुहृदा जाताः कुमारमहाबलस्य । अन्यदा नृपस्याऽऽरामे समवसृतः सूरिरेको महाज्ञानी। गतस्तद्वन्दनाय बलनृपः । सूरिदेशनया जातसंवेगेनाऽपि पित्रा बालो मे महाबलकुमारः कथमसौ मां विना भविष्यतीति कृता चिन्ता । ततो विज्ञातसकल्पेन सूरिणा प्रोक्तम्-

**तिरश्चामज्ञानां वनवसतिभाजां जलतृणो,**
**पनेता कस्तेषां क इव शरणं प्राप्तविपदाम्।**
**परं तेऽपीक्ष्यन्ते समुपचितदेहाः प्रमुदिता-**
**स्ततः चिन्ता चान्ताः किमिति मतिमन्तोऽपि मनुजाः।।१९६।।**
(शिखरिणी)

इत्याकर्ण्य छिन्नविकल्पस्तत्रैव महाबलं राज्ये समादिश्य प्रव्रजितः । तपस्तप्त्वा घातितदुःखक्षीणाष्टकर्मा शर्माद्वैतपदं समाससाद । महाबलनृपोऽपि राज्यं पालयति। तस्य च कमलवत्यां पत्न्यां बलभद्रो नाम जातः पुत्रः । प्राप्त तारुण्यश्च स्थापितोऽसौ यौवराज्ये । अतिक्रान्ते च कियत्यपि काले षड्भिर्मित्रैः सममेकदा बहिर्गच्छन् जनैः पर्युपास्यमानः पाखण्डिनमेकं दृष्ट्वा महाबलनृपश्चिन्तितवान्-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**शास्त्रज्ञानतपःशमेन्द्रियजयप्रायैर्गुणैर्गौरवम्**
**यत्राऽयुर्मुनयः स कुत्र समयः काऽयं शठैकालयः ।**
**सम्बन्धोऽपि न यत्र चेतसि जनैः श्रोतादिको गुण्यते**
**लुब्धैः....मन्त्रतन्त्रशकुना जीवा.....केवलम्।।१९७।।**(शार्दूलविक्रीडितम्)

अनेनैव वैराग्येण भावितमनाः शीघ्रमेव बलभद्रं राज्ये न्यस्य वरधर्ममुनिपार्श्वे तैरपि षड्भिः समं प्रव्रजितः । सप्तापि समानभावनाः सन्तः सदैवाऽनुष्ठानं कुर्वन्ति। परं महाबलो विशिष्टतरफलार्थी पारणदिने रोगाद्युत्तरेण न करोति पारणकम्, तप एव करोति । एवं मायाविना महाबलेनाऽधिकतरं तपः कुर्वताऽपि स्त्रीवेदं कर्मोपार्जितम्। अर्हद्भक्त्यादिभिस्तीर्थकरनामकर्म चोपार्जितम् । चतुरशीतिपूर्वलक्षायुषस्ते सप्तापि कृतानशना मृत्वा वैजयन्तविमाने देवा जाता ।।

जम्बूद्वीपेऽस्मिन्नेव भरतार्द्धे मिथिलायां पुर्यां इक्ष्वाकुवंश्यः कुम्भो राजा । प्रभावती पट्टराज्ञी । फाल्गुनश्वेतचतुर्थ्यामश्विन्यां वैजयन्ताद् महाबलनृपजीवश्च्युत्वा प्रभावत्याः कुक्षाववतीर्णः । प्रभावतीदेव्याश्च माल्येषु शयितुं दोहदो जातः । पूरितश्च देवैः । मार्गशुक्लैकादश्यामश्विन्यां प्राग्जन्मकृतमायाजनितस्त्रीवेदत्वाच्चतुर्दशस्वप्नसूचिततीर्थकरजन्मा सा कुम्भलाञ्छना नीलवर्णा पञ्चविंशतिधनूच्चा पञ्चपञ्चाशद्वर्षसहस्रायुर्ज्ञानत्रयधरा सर्वाद्भुतलक्षणा जाता कन्या । जन्मोत्सवश्च प्राग्वत् । मातुर्माल्यदोहदाद् मल्लिरिति कृतं नाम । प्राप्ता च तारुण्यम् ।।

इतश्चात्रैव साकेतेऽचलजीवो वैजयन्ताच्च्युत्वा प्रतिबुद्धिर्नाम नृपो जातः । तस्य च पद्मावती भार्या । अन्यदा तया समं राजा दृष्टप्रत्यययाया नागप्रतिमायाः पूजार्थं गतः। तत्र पुष्पमण्डपिकां पुष्पमुद्गरं स्वां च प्रियां प्रेक्ष्य सुबुद्धिनामानं पचिवं प्रोवाच– इदृग् रत्नत्रयं क्वाऽप्यस्ति नो वेति । तेनोक्तम्– कुम्भभूपतेर्यादृशी कन्या मल्लिनाम्नी तादृक् त्रैलोक्येऽपि नास्तीति । ततः प्रतिबुद्धिनृपेण मल्लिं वरीतुं प्रहितः कुम्भनृपपार्श्वे स्वदूतः ।।

इतश्च धरणजीवोऽपि वैजयन्ताच्च्युत्वा चम्पायां चन्द्रच्छायो नाम नृपः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सञ्जातोऽस्ति । तस्यां च पुर्यां नयो नाम श्रावकः समुद्रे वणिज्यार्थं गतः । तदानीं च श्रावकत्वविषये शक्रेण तदीया प्रशंसा कृता । ततोऽसहमानेन देवेनैकेन समेत्य वहनं व्याकुलीकृतम् । भणितश्च नयश्रेष्ठी– यदि जिनधर्मं विमुञ्चसि तदा क्षेमेण त्वद्वहनमुत्तारयामीति । तथापि न चलितोऽसौ । ततः प्रत्यक्षीभूय शक्रप्रशंसास्वरूपं कथयित्वा कुण्डलचतुष्टयं च तस्य दत्त्वा गतो देवः । क्षेमेण प्राप्तो मिथिलां श्रेष्ठी। ढौकितं कुम्भनृपस्य कुण्डलद्वयम् । राज्ञापि समर्पितं श्रीमल्लेः । विक्रीतभाण्डश्च चम्पायां गतः श्रेष्ठी । समर्पितं चन्द्रच्छायनृपस्य द्वितीयं कुण्डलयुग्मम् । कथिता च प्रसङ्गागता तस्याग्रे श्रीमल्लिरूपवार्ता श्रेष्ठिना । तेनापि राज्ञा प्राग्भवानुरागविह्वलेन तां वरीतुं कुम्भनृपपार्श्वे प्रहितः स्वदूतः ।।

पुरणजीवोऽपि वैजयन्ताच्च्युत्वा श्रावस्त्यां रुक्मीनाम नृपो जातोऽस्ति । तस्य धारिणी पट्टराज्ञी । अन्यदा राज्ञा निजोत्सङ्गस्थां स्वपुत्रीं धारयता पृष्टः कञ्चुकी । यादृशी मत्पुत्रिकायाः स्नानोपकरणसामग्री विभूतिश्च तादृशी यद्यन्यस्याः कस्याश्चिदस्ति तदा वदेति । तेनोक्तम्–

**बहुमान एव मूर्द्धा-भिषिक्ततां वहतु गुणगणेष्वेकः ।**
**अगुणेऽपि गुणीति मतिः, स्फुरति जने यत् प्रसादेन ।।१९८।।** (आर्या)

यदि गुणपक्षपाती महाराजः पृच्छति तदा कुम्भनृपपुत्र्याः श्रीमल्लेर्यादृक् रूपं वैभवं चास्ति तादृक् सहस्रांशेनापि नान्यस्या इति । रूक्म्यपि प्राग्जन्मानुरागपरवशस्तां वरीतुं कुम्भनृप समीपे स्वदूतं प्राहिणोत् ।।

वसुजीवोऽपि वैजयन्ताच्च्युत्वा वाराणस्यां शङ्खो नाम नृपो जातोऽस्ति । इतश्च श्रीमल्लेः कुण्डलद्वयी सन्निवेशाद् विघटिता । ततो राज्ञा समादिष्टाः सौवर्णिकाः समारचयतेति । तैरुक्तम्– देव ! दिव्याभरणस्याऽस्य समारचने नाऽस्माकं योग्यतेति। ततः कुम्भनृपेण कुपितेन निर्वासितास्ते सर्वेऽपि गता वाराणस्याम् । प्रसङ्गागतं च तैरपि कृतं राज्ञः पुरः श्रीमल्लिरूपवर्णनम् । तेनापि प्राग्भवानुरागरक्तमनसा तां वरीतुं प्रेषितः कुम्भनृपसमीपे स्वदूतः ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वैश्रवणस्यापि जीवो वैजयन्ताच्च्युत्वा हस्तिनापुरेऽदीनशत्रुर्नाम नृपः सम्पन्नोऽस्ति । इतश्च श्रीमल्लेरनुजेन मल्लनाम्ना स्वावासे कारिता चित्रशालिका । चित्रकराणां च मध्ये एकाङ्गदर्शनात् सर्वाङ्गलेख्यलब्धिमानेकश्चित्रकरोऽस्ति । तेन जवनिकान्तःस्थितायाः श्रीमल्लेः पादाङ्गुष्ठो दृष्टः । ततः सर्वाङ्गोपाङ्गसहितं तद्रूपं तेन यथावस्थितं तत्र लिखितम् । यदा च तत्र क्रीडितुं मल्लः समायातस्तदा चित्रस्थां मल्लिमालोक्य सहसैव लज्जितोऽपसृतः । ततो धात्र्या सम्यग् निरूप्य प्रोक्तम्– देव ! चित्रप्रतिकृतिरियं मान्यथा सम्भावयतु स्वामीति । ततः कुपितेन मल्लेन तच्चित्रकारकस्य शिल्पिनः करसन्दंशकोऽकर्त्यत निर्वासितश्च स्वपुरात् । स च क्रमेण गतो हस्तिनापुरे। अदीनशत्रुणा तन्मुखादखिलमपि श्रीमल्लिससत्त्वं रूपप्रभृतिकं स्वरूपमधिगतम्। सोऽपि प्राग्जन्मानुरागप्रभावविवशस्तां वरीतुं कुम्भनृपपार्श्वे प्रजिघाय स्वदूतम् ।।

अभिचन्द्रजीवोऽपि वैजयन्ताच्च्युत्वा काम्पिल्यपुरे जितशत्रुर्नाम नृपो जातोऽस्ति। मिथिलायां च चोक्षा नाम परिव्राजिकाऽन्तःपुरस्त्रीणां स्वधर्ममुपदिशन्ती मल्लिस्वामिन्या निर्जित्य निर्वासिता । सा च काम्पिल्ये गत्वा जितशत्रुनृपस्य पुरः प्रसङ्गागतं श्रीमल्लिवर्णनं चक्रे । सोऽपि प्राग्जन्मानुरागात् तां वरीतुं कुम्भनृपपार्श्वे स्वदूतं प्रेषितवान् ।।

श्रीमल्लिरपि तेषां षण्णामपि राज्ञां नेसुहृदां प्रतिबोधमवधिना ज्ञात्वाऽशोकवनिकायां स्वसौधस्याऽपवरकस्य मध्ये रत्नपीठप्रतिष्ठितामात्मनः प्रतिकृतिं स्वर्णमयीं नानारत्नखचितां तालुप्रदेशे च सच्छिद्रां स्वर्णकमलपिधानां रम्यतरां सजीवामिव कारयामास । प्रतिमापवरकस्य चाऽग्रभित्तौ षट्द्वाराणि सजालककपाटानि कारितवती। प्रतिमापृष्ठभित्तौ च छिद्रमेकं कारितमस्ति । तेन छिद्रेण प्रतिदिनमसौ सर्वाहारपिण्डी-प्रतिमायास्तालुछिद्रे क्षेपयति, स्थगयति च स्वर्णकमलपिधानेन च छिद्रम् ।।

इतश्च तैः दूतैः कुम्भनृपस्याग्रतो वर्णितः स्वः स्वः स्वामी । याचिता च श्रीमल्लिः । राज्ञापि– देवा अपि नाप्नुवन्ति मत्कन्यां किमुत ते नृपशव इत्युदीर्य

निर्वासिताः सर्वेऽपि। तेऽपि सत्वरं गत्वा स्वस्य स्वस्य स्वामिनः कुम्भभाषितं सर्वं कथितवन्तः। राजानश्च समानापमानाः षडपि समेत्य सर्वाभिसारेण समेत्य मिथिलां रुरुधुः। कुम्भनृपोऽपि खिन्नः पुरीरोधात्। प्रोक्तं मल्लिस्वामिन्या– तात ! मल्लिं दास्यामि तुभ्यमित्युक्त्वा प्रत्येकमेकाकिनः सन्ध्यायां स्वर्णप्रतिमाया अपवरके पृथक् पृथग् द्वारेण समानेतव्याः षडपि। राज्ञापि कारितं तथा। समागतास्ते। कपाटजालकैर्दर्शिता षण्णामपि सा प्रतिमा । रञ्जितास्ते विस्मिताश्च। तथाऽस्थितेषु तेषु व्यपनीतं छिद्रपिधानम्। ततः समुच्चलितः स कोऽपि दुर्गन्धः, येन सहसैव पराङ्मुखीभूतास्ते। ततोऽभिहिता श्रीमल्लिस्वामिन्या– भो भोः स्वर्णमय्या अप्यमुष्या यदीदृग् दुर्गन्धस्तदा शुक्रासृग्मांसमेदोऽस्थिवत्यां मादृश्यां कुतः पावित्र्यम्।।

**वक्राः केशाश्चञ्चलं नेत्रयुग्मं तुङ्गोऽत्यर्थं सुभ्रुवां मध्यदेशः।**
**यासामेवं दोष एवाऽङ्गभूष्यतासामस्ति क्वावकाशो गुणानाम् ?।।१९९।।**

(इन्द्रवज्रा)

इत्यादिदेशनया प्राग्भववृत्तान्तकथनेन च प्रतिबोध्य सञ्जातजातिस्मरणाः समये मयैव सार्द्धं युष्माभिः परिव्रज्या ग्राह्येत्युक्त्वा विसृष्टाः सर्वे। तेऽपि क्षमयित्वा समेत्य सन्तः सम्प्राप्ताः स्वे स्वे नगरे।।

मल्लिस्वामिन्यापि जन्मतो वर्षशते पूर्णे सांवत्सरिकं दानं दत्त्वा कृताष्टमतपाः शक्रादिकृतनिष्क्रमणोत्सवः सहस्राम्रवणे गत्वाऽन्तरपरिवारे स्त्रीणां त्रिभिः शतैः समं मार्गशुक्लैकादश्यामश्विन्यां शक्रन्यस्तदेवदूष्यधारिणी पूर्वाह्ने पूर्वे वयसि राज्यमकृत्वापि चारित्रं प्रतिपेदे श्रीमल्लिः। मनःपर्ययज्ञानं चोत्पन्नम् । तस्मिन्नेव दिने श्रीमल्लेरशोकतरुतलस्थस्य कृताष्टमस्य पूर्वाह्ण एवोत्पन्नं केवलज्ञानम् । समवसरणादिकं च प्राग्वत् । तत्रैव कृता देशना–

**चलः स्थास्नुप्रायः सततमहितो वल्लभतमः,**
**सजागर्या निद्रा निगडरहितो बन्धनविधिः।**
**विनोन्मत्तास्वादं भ्रमिरनगदा कार्मणकला,**

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**विमन्त्रो दृग्बन्धः किमपि भववासोऽतिविषमः ।।२००।।** (शिखरिणी)

इत्यादिदेशनया प्रतिबुद्धाः प्रभूताः प्राणिनः प्रवव्रजुर्जगृहुश्च ससम्यक्त्वादिकम्। प्रतिबुद्धिप्रभृतयश्च ते षडपि नृपाः समागत्य प्रव्रजिताः। कुम्भमुखप्रमुखाः श्रावका जाताः। भिषगाद्या अष्टाविंशतिर्गणधराश्च स्थापिताः। तत्रैव द्वितीयेऽह्नि विश्वसेनगृहे परमान्नेन च जातं प्रभोः पारणम्। पञ्चदिव्यानि तत्राविर्भूतानि।।

प्रभुतीर्थे कुबेरो यक्षः। स च (इन्द्रायुधद्युतिः) चतुर्मुखो गजस्थो वरदपरशुशूल-भृदभयदैर्दक्षिणैर्भुजैर्बीजपूरशक्तिमुद्गराक्षसूत्रिभिर्वामैर्भुजैर्युक्तः। वैरोट्या शासनदेवता। सा च कृष्णाङ्गिःपद्मस्था वरदाक्षसूत्रिदक्षिणदोर्द्वया। मातुलिङ्गशक्तिभृद्वामभुजयुगा।।

सर्वपरिवारे च प्रभोः साधूनां चत्वारिंशत्सहस्राः। साध्वीनां पञ्चाशत्सहस्राः। चतुर्दशपूर्विणां सप्तशत्यष्टषष्टिश्च। अवधिज्ञानिनां द्वाविंशतिशती । मनोविदां सप्तदशशती पञ्चाशच्च। केवलिनां द्वाविंशतिशती। वैक्रियलब्धिमतामेकशतोना त्रिसहस्री च। वादिनां चतुर्दशशती। श्रावकाणां लक्षं त्र्यशीतिः सहस्राः। श्राविकाणां त्रिलक्षी [ [1]सप्ततिसहस्राश्च।।

आसन्नमोक्षश्च प्रभुः साध्वीनां पञ्चाशत्या साधूनां पञ्चासत्या समं पृथक् पृथक् सम्मेताद्रौ गत्वा मासिकेनानशनेनोद्ध्वस्थ एव फाल्गुनशुक्लदशम्यां भरण्यां निर्वाणसुखभाग् बभूव। मोक्षमहिमा च प्राग्वत्। अरनाथनिर्वाणात् कोटिसहस्राणि श्रीमल्लिनाथमोक्षस्याऽन्तरम् । कौमारे वर्षशती। व्रते चतुःपञ्चाशत् सहस्री नवशती च। एवं पञ्चपञ्चाशत् सहस्राः प्रभोः सर्वायुः।।

**जिनाभिवन्द्यानतनाकिनाथः,**
**जय क्षितौ त्वं जितवैरिजातः।**
**श्रीमल्लिनाथो भवमित्रबोधः,**
**मोक्षं प्रशान्तं ददतां जनानाम् ।।२०१।।**
(उपजातिः) ]

१. एतच्चिह्नान्तर्गतपाठो नोपलभ्यते ।।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# परिशिष्ट-१

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यकृतत्रिषष्टिशलाकापुरुषचरित्रेण सह श्रीविमलाचार्यकृतत्रिषष्टिशलाकापुरुषचरित्रस्य पाठभेदाः

| | श्रीविमलाचार्याः | | श्रीहेमचन्द्राचार्याः | |
|---|---|---|---|---|
| १ | सप्तानां पुत्रीणामुपर्यष्टमी | ८-३ | उपर्युपरि कन्यां षट् | १-१-५३१ |
| २ | ०प्रियङ्गुरिति | १६-१४ | प्रतिरूपेति पुत्र्यपि | १-२-१८१ |
| ३ | अमृतकलशेन | २४-२१ | अभिषिच्य पयस्कुम्भै० | १-३-२४५ |
| ४ | पुरिमतलोद्याने | २६-१७ | उद्यानं शकटमुखं | १-३-३९० |
| ५ | अशोकतरुतले | २२-२४ | न्यग्रोधस्य तरोरधः | १-३-३९१ |
| ६ | स चाक्षमालाभृद् दक्षिणदोर्द्वयः | २९-२३ | वराक्षमालाशलिभ्यां दोर्भ्यां दक्षिणपार्श्वतः | १-३-६८० |
| ७ | गतोऽन्यत्र ग्रामे द्रव्यार्जनाय | ५३-९ | विशेषविद्याध्ययनहेतोर्ग्रामन्तरं गतः | २-६-९३ |
| ८ | रक्षामानाय | ५३-१२ | ततोऽग्निं मङ्गलगृहात् | २-६-१०५ |
| ९ | अष्टादशशति वैक्रियलब्धिमताम् | ६०-१ | वैक्रियलब्धिसहस्रा विंशतिर्द्विशतोनिता | ३-१-३९४ |
| १० | कुसुमो यक्षः स च श्यामे | ६९-५ | कुसुमो निलाङ्गो | ३-४-१८० |
| ११ | वरदबाणभृद्दक्षिणद्विभुजा | ६९-६ | दक्षिणौ बाहुदण्डौ वरदपाशिनौ | ३-४-१८२ |
| १२ | ससप्ततिसहस्री | ६९-११ | षट्सप्ततिसहस्र्यपि | ३-४-१८९ |
| १३ | षोडशाब्द्या चोनं | ६९-१३ | षोडशाङ्ग्योनं | ३-४-१९० |
| १४ | त्रिपृष्ठस्तृतीयां पृथ्वीं प्राप्तः | ८३-१७ | त्रिपृष्ठोऽगात् सप्तमीं नरकावनिम् | ४-१-८८६ |
| १५ | परिणायितः पित्रा राजपुत्रीम् | ८५-२ | न मे भोगफलं कर्म किंचिदप्यवशिष्यते | ४-२-१०२ |
| १६ | चण्डाशासनदेवी | ८५-२० | तथोत्पन्ना श्यामवर्णा चन्द्रा नामाश्ववाहना | ४-२-२८८ |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| १७ | वैक्रियलब्धिमतां सहस्त्रमेकम् | ८६-१ | वैक्रियलब्धीनां सहस्राणि दशैव | ४-२-३५६ |
| १८ | ०फलकाङ्कुश० | ८९-२३ | ०फलकांशुकैः | ४-३-१७९ |
| १९ | साष्टशती | ९०-६ | सहस्राष्टकसंयुते | ४-३-२२२ |
| २० | श्मशाने | १०२-२० | अरण्ये | ४-७-२५ |
| २१ | प्रान्तरपत्रलतरुतले | १०५-३ | सप्तपर्णतरुमूले | ४-७-१८५ |
| २२ | प्राग्जन्मवैरिणा चाश्वग्रीवजीवेन | ११८-१६ | प्राग्जन्मवैर्यश्वग्रीवनन्दनः | ५-२-४१७ |
| २३ | वैरोचने | १२१- | विरोचने | ५-३-२०३ |
| २४ | धनदत्तो | १२९-२० | धनदः | ५-५-३८८ |
| २५ | मनोविदां सपञ्चाशत् पञ्चविंशतिशती | १३७-३ | सार्धे सहस्रे द्वे एकपञ्चाशच्च मनोविदाम् | ६-२-३७९ |
| २६ | एकोनविंशद्धनूच्चः | १३८-२ | षड्विंशतिधनूत्तुङ्गः | ६-३-११ |
| २७ | कार्तवीर्यो | १४०-१३ | कृतवीर्यो | ६-४-७० |
| २८ | नयो नाम | १४५-१ | अर्यन्नयाभिधः | ६-६-६८ |
| २९ | कुम्भमुखप्रमुखाः | १४८-३ | कुम्भप्रभृतयः | ६-६-२४७ |
| ३० | पञ्चाशद् | १७-१० | पञ्चपञ्चाशद् | ६-६-२५६ |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# परिशिष्ट-२

## ग्रन्थान्तर्गतानां श्लोकानामकारादिक्रमेण सूचिः


| आदि० | श्लो० |
|---|---|
| **अ** | |
| अचलो विजयो भद्रः | २३ |
| अजानानौ भिक्षा- | ५८ |
| अजितजिन- | ९८ |
| अज्ञानहालाहल- | ४९ |
| अत्यल्पं मित- | १३४ |
| अत्युज्ज्वलप्रकृतयः | ११७ |
| अथ मेघरथो | १६५ |
| अद्याऽपि लाञ्छ- | १२८ |
| अनादिभव- | १८८ |
| अनित्यः सर्वोऽयं | ३२ |
| अन्तस्त्रिकोश- | ६२ |
| अन्यायेन | १९१ |
| अपारे संसारे | ३६ |
| अभूवन्नर्हन्तो | ९५ |
| अम्भांसि वः | ५१ |
| अयनर्तुदिन- | १९२ |
| अर्थार्थे घट- | १०३ |
| अल्पोऽपि जीवः | १७९ |
| अशोकैः पुन्नागै- | ४२ |
| अश्वग्रीवस्तारक | २२ |
| अस्त्येव शास्त्रं | १६९ |
| अहह ! मनुजलोकः | ८२ |
| अहह ! सकलं | ८४ |

| आदि० | श्लो० |
|---|---|
| **आ** | |
| आत्मानं विदितं | ९३ |
| आसीने प्राङ्मुखे | ६३ |
| आहारो मितकालमेव | ३९ |
| आहारो हार- | १०१ |
| **उ** | |
| उच्छिद्यते प्रणयिनां | ११० |
| उच्छेदो विषयस्य | २८ |
| उपकारकरस्यैव | ४१ |
| उपहतो व्यसनैर्गणिका- | ३८ |
| **ऊ** | |
| ऊद्ध्वाधोदिग्भ्यो-४६ | |
| **ऋ** | |
| ऋषभदेवचरित्र- | ८५ |
| ऋषभाऽजित- | १९ |
| **ए** | |
| एकेन राज्ञा | १५९ |
| एकैकोऽपि दुरन्त- | १३० |
| एतन्मानुष्यकं नीवी | ३० |
| एतेनैव तपस्विनी | ७६ |
| एतैः सङ्गीतकैर्देव- | २९ |

| आदि० | श्लो० |
|---|---|
| **औ** | |
| औत्सुक्यं वहतु द्वयं | ३५ |
| **क** | |
| कः किल्बिषै- | १७४ |
| कन्दर्पदर्प- | १८६ |
| कन्याः शीलेन | ५६ |
| कलिः कालः | १२ |
| कल्पज्योति- | ६१ |
| कल्पेशा दश | ५० |
| कान्तेः पात्रं | ५५ |
| किमम्भोऽम्भोधीनां | १०० |
| केऽपि क्षिपन्ति | ११४ |
| कोदण्डमिक्षु- | ९१ |
| को नाम | १४२ |
| कोऽन्यान् | २७ |
| क्षुधो निरोधः | १७७ |
| क्षेत्रं कलत्रमपि | १७६ |
| क्षेत्रं कलत्रमशनं | ३३ |
| **ग** | |
| गात्रं पात्र- | १२१ |
| गुणा नामाधारः | १२५ |
| गेहस्नेहमपाकरोति | ७८ |
| **च** | |
| चलः स्थास्नुप्रायः | २०० |
| चिन्तायाः समनन्तरं | ७१ |

| आदि० | श्लो० |
|---|---|
| चिरतरनृप- | १०६ |
| चेतश्चिन्तित- | १९४ |
| **ज** | |
| जन्तोरनन्तेषु भवेषु | ४० |
| जयतु शीतल- | १३५ |
| जागर्ति यन्मा- | १८९ |
| जानानोऽपि जनः | ९२ |
| जिनाभिवन्द्या- | २०१ |
| जीयाच्चन्द्र- | १२७ |
| जीवानां नयनादि- | १२२ |
| ज्ञात्वा सत्त्वर- | २०३ |
| **त** | |
| तत्पार्श्वे वसतिः | १४१ |
| तपःकृशतम- | १८१ |
| तारुण्ये न कृतः | ३१ |
| ताश्च जिनजिन- | ४८ |
| तिरश्चामज्ञाना- | १९६ |
| तीर्थङ्करस्य | १०९ |
| तीर्थङ्कराणां | १५ |
| तीर्थेशचक्रि- | १८ |
| तेषां किं चरितं | ८० |
| तैरेवोचित- | ७७ |
| त्रिपृष्ठश्च द्विपृष्ठश्च | २४ |
| त्वत्तोऽन्यः कतमः | ८१ |


Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| आदि० | श्लो० |
|---|---|
| **द** | |
| दत्तं येन जिनाय | ८८ |
| दानं निरन्तर- | ८६ |
| दूरस्थाः कति | १६० |
| दृढगुणं विमलस्य | १४७ |
| दृष्टेन येन | १४८ |
| दृष्ट्वान्यान् धनपुत्र- | १०७ |
| देवः श्रियं | २ |
| देवः स वः | १ |
| देवः स वो | १४४ |
| देव! त्वदुद्योग- | ६९ |
| दोषानेवो– | १८७ |
| दोषान् गुणान् | ९ |
| **न** | |
| न विभाति वपु- | ८३ |
| न वृत्तेन न | १६८ |
| नादौ धूमा | १८४ |
| नाप्तः पुरातनभवे | ६७ |
| नाभुक्तपूर्वा | १६७ |
| नाम्भः केलिसुखं | ८७ |
| नारायणश्च कृष्णश्चा- | २५ |
| नासाया श्वसितं | १४६ |
| निःसङ्ख्यानि | ८९ |
| नित्यं स्तुवे | २०२ |
| नित्यत्वां तु | १८२ |
| निर्वाणं निकटं | ५४ |
| निर्वेदेन तरङ्गितः | ६६ |
| निष्क्रान्तं घन- | ७३ |
| नीतिं व्यतीत्य | १५८ |
| नैसर्पः पाण्डुक- | ७२ |
| **प** | |
| पत्यौ न प्रथयन्ति | १५६ |
| पावित्र्यं सदनस्य | ९० |
| पुण्यैर्वैभवसम्भवो | ६८ |
| पुत्रः कस्य न | ११२ |
| पुन्नाग ! पुन्नागतरुः | ४३ |
| पूज्यं पदं स | १४० |
| पूर्वाणि भासन्ति | ६ |
| प्रकृतिरियं जन्तूनां | ३७ |
| प्रतीतं सर्वेषां | ५२ |
| प्रबन्धः पङ्गुवत् | १० |
| प्राग्वत् सम्प्रति- | १५० |
| प्रायेण पुंसा | १५७ |
| प्राविण्यं विनयेन | १७० |
| प्रीणन्ति क्रियया | १७१ |
| प्रीतिः प्रभोर्गुण- | ५७ |
| **ब** | |
| बहुमान एव - | १९८ |


Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| आदि० | श्लो० |
|---|---|
| **भ** | |
| भरतसगर- | २१ |
| भवद्गुणानां पयसा- | १७८ |
| भूयाद् दुरन्त- | १९५ |
| भृत्योऽस्मीति न | ५९ |
| **म** | |
| मांसास्थिमेद- | ९६ |
| मुक्तावलीषु | १३६ |
| मुनिकल्पस्त्री- | ६४ |
| **य** | |
| यः कारयति | २०४ |
| यज्जन्मनि | ११६ |
| यज्जन्ममज्जन- | १०५ |
| यत्कल्पःसमकल्पि- | ६० |
| यत्पाणिः करिणी- | १४५ |
| यद्दृष्टं शतपत्र- | १२९ |
| यद्यत् पुरा | १७५ |
| यद्यत्समाचरति | ३४ |
| यस्याः कान्ति- | १५३ |
| यस्याकर्ण- | ४ |
| यस्योज्ज्वल- | १९३ |
| यादृग्गर्भगतस्य | ११ |
| युगपदखिललोक | २६ |
| येऽमी कामाः | ११३ |
| ये वर्णयन्ति- | १६ |
| येषां जन्म | ९७ |
| येषामिदं जिन- | १०८ |
| यैर्निर्ममे | ३ |
| **र** | |
| राज्ञामेव विराजते- | ४४ |
| रोगाः सर्वे | १६२ |
| **ल** | |
| लुम्पन्ति प्रथमं | १६६ |
| लोकः किं मद- | ७४ |
| लोकैरपायपरि- | १३३ |
| लोकोत्तरा | १५४ |
| लोष्टोऽपि चिन्तित- | १५२ |
| **व** | |
| वक्राः केशा- | १९९ |
| वपुःकारैर्वेदं | १४९ |
| वप्रस्याऽन्त- | ६५ |
| वशीचक्रे देव ! | ७० |
| वाग्मी कश्चिदुदार- | १७२ |
| वाणिज्यव्यवहार- | १३८ |
| विद्यां प्रमादा- | १३७ |
| विद्यासु विस्मृति- | १२६ |


Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| आदि० | श्लो० |
|---|---|
| विद्योतते हृदय- | १८५ |
| वृत्तं न खण्ड- | १२४ |
| व्यामोहहालाहल- | ८ |
| व्युत्पत्तिमन्तः | १७ |
| **श** | |
| शक्रस्यैकाङ्गुली- | ७९ |
| शास्त्रे ज्ञानतपः | १९७ |
| शून्यानि यानि | १११ |
| शृङ्गारैकरसा | १७३ |
| श्रीधर्मनाथस्य | १५५ |
| श्रीभद्रबाहु- | ५ |
| श्रीमदनन्त- | १५१ |
| श्रीमान् समानयतु | १६३ |
| श्रीवासुपूज्य- | २० |
| श्रीवासुपूज्य- | १४३ |
| श्रीशीतलः स | १३२ |
| श्रीषेणः पृथिवी- | १६४ |
| श्रीसम्भवाय | ९९ |
| श्रीहेमसूरे- | ७ |
| श्रेयांसतीर्थेश- | १३९ |
| **ष** | |
| षट्खण्डभूजय- | ७५ |
| **स** | |
| सत्कर्मनिर्मिति- | १३ |
| सत्कृत्यमास्ते | १४ |
| सद्वृत्तवित्तमुक्ता- | ११९ |
| सद्वृत्तं शुभबीज- | १०४ |
| सम्पूरयत्व- | १९० |
| सम्मार्जनजलसेचन- | ४७ |
| सविनयास्तनया | ११८ |
| सुपार्श्वनाथस्य | १२३ |
| सुभिक्षे सौस्थ्ये | १०२ |
| सुमतिजिनचरित्र- | ११५ |
| सुविधिजिन- | १३१ |
| सौवर्णराजत- | ५३ |
| स्त्रीणां चित्तस्य | ४५ |
| स्वःसम्पदां | १२० |
| स्वर्णापूर्णतनु- | ९४ |
| स्वान्योपकारक- | १६१ |
| स्वाम्यादेशः | १८३ |
| **ह** | |
| हृष्टाश्च केचित् | १८० |


Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# नोंध

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# परिशिष्ट-३

## (ચરિત્રની અંતર્ગત આવેલા શ્લોકોનો ગુજરાતી અનુવાદ)

૧. સાથળમાં લાંછન છે બળદનું જેમને એવા જે (પ્રભુ)ના બન્ને ખભા ઉપર કાળા કેશની બે લટ શોભી રહી છે, જે બે લટોના બે કલાપો દુર્વાવનના જોડલાના સંભ્રમને ધારણ કરે છે, તે આદિજિન તમને પોતાનું પદ (મોક્ષ) આપે.

૨. જેમના ચરણના અગ્રભાગ વડે દબાવવાથી કલ્પવૃક્ષથી યુક્ત એવો અચલ મેરુપર્વત પણ ચલપણાને પામ્યો તે દેવ જગતમાં એક વીર એવા સિદ્ધાર્થરાજાના પુત્ર તમને અતિશયવાળી લક્ષ્મીને (મોક્ષને અથવા મોક્ષના ઉપદેશને) આપે.

૩. જેઓ વડે ત્રિપદીવાણી નિર્માણ કરાઈ, વળી તે (વાણી) બીજાઓને લાખો કરોડો પદો આપે છે તે અદ્‌ભૂત શક્તિવાળા અજિતનાથ આદિ બાવીશ જિનો મને સુખ આપે.

૪. જેને સાંભળવાથી મિથ્યાગ્રહરૂપી ગ્રંથીઓ જલ્દી તુટી જાય છે, જેની પ્રાપ્તિથી (આચરણથી) કુટીરની ઉપમાવાળું મનુષ્યોનું ભવપંજર જીર્ણ થાય છે, જેના આરાધકોને દુઃખે કરીને પ્રાપ્ત કરી શકાય તેવી પણ મુક્તિ પતિને શોધતી સ્ત્રીની જેમ સ્વયં ભજે છે, કુગતિરૂપી વૃક્ષને ભાંગવા માટે હાથી સમાન મોક્ષને આપનાર તે જિનનું આગમ તમારું રક્ષણ કરે.

૫. પૂર્વે થયેલા કવિઓમાં સૂર્યસમાન તે શ્રી ભદ્રબાહુસ્વામી વગેરે મુનીન્દ્રો જય પામે છે, ગાયની પાછળ જતા વાછરડાની જેમ (શ્રી ભદ્રબાહુસ્વામી વગેરે મુનિઓની પાછળ) અજ્ઞાનીઓ પણ શાસ્ત્રમાર્ગમાં પગલા મૂકે છે અર્થાત્ કાવ્યો રચે છે.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૬. ૧૪ પૂર્વો એ પ્રમાણે શોભી રહ્યા છે. જાણે સુંદર એવી તેની (૧૪ પૂર્વોની) ઉક્તિઓને જણાવવા માટે જેમણે ૧૪૦૦ (૧૪૪૪) ગ્રંથ રચ્યા તે શ્રી હરિભદ્રસૂરિજીની અમે સ્તુતિ કરીએ છીએ.

૭. સિદ્ધાંજનથી સજ્જ ચક્ષુવાળો મનુષ્ય જેમ સર્વ પદાર્થોને જુએ છે, તેમ જેમના ગ્રંથરૂપી સિદ્ધાંજનથી સજ્જ ચક્ષુવાળો સર્વ પદાર્થોને જાણે છે એવા મુનિઓમાં મુખ્ય શ્રી હેમચંદ્રાચાર્યને મારા નમસ્કાર થાઓ.

૮. જ્ઞાનની શક્તિરૂપ અદ્ભૂત મંત્રજાપથી બેચેનીરૂપ ઝેરથી દૂષિત એવું મારું ચૈતન્ય જેઓ વડે જલ્દી ઉલ્લસિત કરાયું છે તે શ્રી મલધારી પૂજ્યો જય પામો.

૯. સત્કૃતિઓમાં દોષોને બોલતા દુર્જનોને તથા ગુણોને બોલતા સજ્જનોને રોકવા શક્ય નથી, તેથી ખરેખર શાસ્ત્રની શરૂઆતમાં દુર્જનોની સ્તુતિ કરવાથી અને સજ્જનોની સ્તુતિ ન કરવાથી પણ તેઓનું સંકીર્તન (દોષો અને ગુણોનું કહેવું) નિષ્ફળ થાય છે.

૧૦. સાહિત્ય પાંગળા માણસની જેમ ક્યારે પણ ઘરની બહાર નીકળતું નથી, પણ કોઈ બંધનમુક્ત થાય એટલે પ્રકાશિત થાય તો તરત અરૂણોદયની જેમ સંપૂર્ણ જગતમાં ફેલાઈ જાય છે.

૧૧. મનુષ્યનો સમય જેવો ગર્ભમાં રહેલાનો જાય છે, તેવો બાલપણનો પણ જાય છે. કામથી ભરેલા (વિષયલોલુપી) યુવાનોને વિવેક ક્યાંથી હોય. વૃદ્ધાવસ્થામાં તો શક્તિ જ ક્યાં હશે. તેઓની (બાલપણ અને વૃદ્ધાવસ્થાની) વચ્ચેના દિવસો ઘણા ઓછા છે, તેથી આળશ છોડીને કર્તવ્યમાં થોડુ મન આપો.

૧૨. ક્રોધાદિ ઘણા ભારે દોષોથી કલુષિત થયેલો કલિકાલ છે, લાંબો વખત અનેક પ્રકારની ચિંતાઓથી ઘેરાયેલા મનવાળા

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

આ મનુષ્યો છે, તો ક્યાંથી ધર્મધ્યાન હોય ? ધૈર્ય પણ ક્યાં સુધી ટકી રહે ? સુખ પણ ક્યાંથી હોય ? આયુષ્ય તો ઓછું છે. તેથી શક્તિ પ્રમાણે સુકૃત કરો.

૧૩. સત્કર્મોથી જોડાયેલાનો આ પ્રથમ ગુણ છે :
સજ્જનો સાથે સંગતિ, વ્યસનોથી નિવૃત્તિ, પુણ્યાનુબંધનો સંયોગ, પરમ વિવેક, કલંક વગરની કીર્તિ, મિથ્યાજ્ઞાનનો નિરાસ.

૧૪. ધર્મથી શ્રેષ્ઠ ખરેખર કોઈ સત્કૃત્ય નથી. ચાર પ્રકારના ધર્મમાં પણ અહીં દુષ્ટ કર્મોનો નાશ કરનાર તપ છે. (તેમાં) અહીં સ્વાધ્યાય જ શ્રેષ્ઠ છે. તે પાંચ પ્રકારનો છે, તેમાં પણ ધર્મકથા વૈરાગ્યને માટે સમર્થ છે.

૧૫. મહામુનિઓની આખ્યાયિકા અને તીર્થંકરોના ચરિત્રો સાથે ધર્મની કથા પણ હર્ષને આપે છે, વૈરાગ્યને દૃઢ કરે છે, પાપને હણે છે.

૧૬. જે કવિઓ યુવાનોના મનોરંજન માટે અત્યુક્તિથી ભરેલા વાક્યો વડે સ્ત્રીઓનું વર્ણન કરે છે, તેઓ કામદેવરૂપી સર્પના ઝેરથી વિચલિત થયેલા જીવલોકના રક્ષણ માટે વિષની ભારી જેવી રચના બોલી રહ્યા છે.

૧૭. વ્યુત્પત્તિવાળા અને રસવાળા એવા હજારો પ્રબંધો પૂર્વાચાર્યો વડે કરાયેલા છે. (તોપણ) સ્ત્રીઓ અને બાળજીવોના બોધને માટે ત્રેષઠશલાકાપુરુષોના ચરિત્રોને હું કહું છું.

૧૮. તીર્થંકર, ચક્રવર્તી, પ્રતિવાસુદેવ, બલદેવ અને વાસુદેવો જિનેશ્વરરૂપી સૂર્ય અને અન્ય ગ્રહરૂપી અન્યોથી યુક્ત ક્રમે કરીને તેઓ વડે મોક્ષસુખ મેળવવા માટે શલાકા મોકલાયેલી છે. તેથી કરીને તેઓ શલાકા પુરુષ કહેવાય છે.

૧૯. ઋષભ, અજિત, સંભવ, અભિનંદન, સુમતિ, પદ્મપ્રભ, સુપાર્શ્વ, ચંદ્રપ્રભ, સુવિધિ, શીતલ, શ્રેયાંસ તે પછી

૨૦. શ્રી વાસુપૂજ્ય, વિમલ, અનન્ત, ધર્મ, શાંતિ, કુંથુ, અર,

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

મલ્લિ, મુનિસુવ્રત, નમિ, નેમિ; પાર્શ્વ અને વીર આ જિનેશ્વરો છે.

૨૧. ભરત, સગર, મઘવ, સનત્કુમાર, શાંતિ, કુંથુ, અર, શુભોમ, મહાપદ્મ, હરિષેણ, જય અને બ્રહ્મદત્ત એ પ્રમાણે ચક્રીઓ છે.

૨૨. અશ્વગ્રીવ, તારક, મેરક, મધવ, નિશુંભ, બલિ, પ્રહ્લાદ, રાવણ અને જરાસંઘ એ પ્રતિ વાસુદેવો છે.

૨૩. અચલ, વિજય, ભદ્ર, સુપ્રભ, સુદર્શન, આનંદ, નંદન, પદ્મ, રામ આ બલભદ્રો છે.

૨૪. ત્રિપૃષ્ઠ, દ્વિપૃષ્ઠ, સ્વયંભૂ, પુરુષોત્તમ, પુરુષસિંહ, પુરુષ પુણ્ડરીક, દત્ત અને

૨૫. નારાયણ અને કૃષ્ણ આ વાસુદેવો છે; આ શલાકા પુરુષો ભરતક્ષેત્રમાં ઉત્પન્ન થયેલા છે.

૨૬. એક સાથે સમસ્ત લોકની કર્ણેન્દ્રિયને પવિત્ર કરનાર છે, અને જે પ્રાણીઓના સર્વ કલ્યાણને કરે છે, તે જાણે કાંઈક નવા કુંડલોનું દ્વંદ હોય તેમ ઋષભદેવનું ચરિત્ર તમારા કર્ણોનું અતિથિ થાઓ.

૨૭. મોટા વૃક્ષોના બીજા ગુણોને અહીં કોણ ગણે છે; આકારથી પણ સુંદર આંબો જ છે, અને ફળની વાત જો કરાય તો આ સમસ્ત ભૂતલ કેરી વડે જીતાયું છે.

૨૮. હે વત્સ ! વિષયનો ઉચ્છેદ અને ઈન્દ્રિયોના વ્યાપારને રોકવાની ક્રિયા સાધુનો જ યશ ફેલાવે છે, વળી પૃથ્વીના રાજાનો નહિ. પરલોકથી એટલે મરણના ભયથી નિર્ભય થયેલા મહાસંગ્રામમાં ચારે બાજુ પ્રસરેલી કીર્તિવાળા રાજાઓ ક્ષમા વડે જ સાધુની જેમ હંમેશા પ્રશંસા પામે છે.

૨૯. આ સંગીત વડે મોહિત થયેલા દેવોના દેવોને (ઈન્દ્રોને) પણ પોતાના પસાર થયેલા લાંબા કાળનું ભાન જ રહેતું નથી.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૩૦. પ્રાણીની આ મનુષ્યભવસંબંધી મૂડી ધર્મરૂપી ધનના ઉત્પાદન માટે છે; જો તે ફોગટ વેડફાય તો ક્યાંથી કલ્યાણનો સંગમ (મોક્ષ) થાય ?

૩૧. કુકર્મમાં રક્ત એવા અમારા વડે યુવવસ્થામાં બ્રહ્મચર્યમાં નિષ્કપટ લય ન કરાયો, હમણાં વૃદ્ધાવસ્થાને પામેલા અમે અતિ સુખ આપનાર મોક્ષ માટે શું કરીએ ? આજે જરા વડે શરીર અસ્થિર થયે છતે કાર્યો કરવામાં સમર્થ નથી જ; પશ્ચાતાપથી હણાયેલા ચિત્તમાં ધર્મનો પ્રેમ ક્યાંથી હોય ?

૩૨. ખરેખર સંસારમાં રહેનાર આ સર્વ લોક અનિત્ય છે, કોઈ પણ પ્રમાદી પોતાના નાશની પરવાહ કરતો નથી અથવા શરીરધારીઓમાં ઉત્પન્ન થયેલો કોણ મૃત્યુ પામતો નથી ? તેથી મોટા માણસોનો વિષાદ અને કાતરતા ખરેખર ઉચિત નથી.

૩૩. જમીન, સ્ત્રી, ખોરાક, વસ્ત્ર અને ધન જેઓને છે, તેઓ પણ ખરેખર સુખી નથી. એથી વિપરીત અવસ્થાવાળા એટલે દરિદ્રો પણ દુ:ખી હોય છે; હકીકતમાં તો અજ્ઞાનતા જ દુ:ખ છે.

૩૪. મુઢમતિવાળો માણસ સુખને માટે જે જે આચરે છે તે તે સુખના ભ્રમને કરનારું અને ભાવિમાં દુ:ખને આપનારું છે, જ્ઞાની કર્મના નાશને માટે જ પ્રયત્ન કરે છે, કર્મમુક્તને સુખ જ હોય છે. લેશમાત્ર દુ:ખ હોતું નથી.

૩૫. તે દેખાતી નથી (તો પણ) બન્ને આંખ ઉત્સુકતાને વહન કરે, બન્ને કાન તેણીના વચનામૃતનું પાન કરવા માટે તૃષ્ણાને પણ વધારે, હૃદય વડે અનુભવાયો છે સ્ત્રીનો સંયોગ જેના વડે એવા હે ભાઈ ! (મન) ફરીવાર પણ તેણીને પ્રાપ્ત કરવા માટે જ તું ઉતાવળ કરે છે; ખરેખર પ્રિય વિષયમાં કોની તૃપ્તિ સંપૂર્ણ થાય છે ? અર્થાત્ કોઈને થતી નથી.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૩૬ અહો ! આ અપાર સંસારમાં જન્મમરણની શ્રેણીઓમાં પહેલા જીવ વડે જે દુઃખ અને સુખ અનુભવાયું તેથી (સુખ-દુઃખથી) સંતુષ્ટ થતો નથી. હમણાં પણ બીજાના પ્રાણને હરણ કરવા માટે ઈચ્છા કરે છે, શબ્દાદિ વિષયોમાં રત થાય છે અને તપકર્મોમાં લગાવ ઓછો કરે છે.

૩૭. પ્રાણીઓની આ પ્રકૃતિ છે :
નહિ પ્રેરાયેલા વ્યસનોમાં પ્રવર્તે છે અને શુભકર્મમાં જોડાયેલા કોપ કરે છે અને ઉદ્વેગ પામે છે.

૩૮. વેશ્યાગમન આદિ વ્યસનથી પરાભવ પામેલો ધનને ખર્ચતો કંઈપણ વિચાર કરતો નથી, સુકૃતના (ધર્મના) કાર્યમાં ખર્ચાયેલા થોડા પણ ધનને હજારો રૂપિયાના ખર્ચ સમાન માને છે.

૩૯. આહાર ભૂખ મટાડવા સુધી જ ઉપયોગી હોય છે, તોપણ શાસ્ત્રમાં આહારદાનનું પુષ્કળ ફળ કહેવામાં આવ્યું છે; ચિકિત્સા કરાયેલો મુનિનો આ દેહ ધર્મ માટે ઉપકારી છે, તેથી (શાસ્ત્રમાં) ગ્લાનની સેવાને જિનેશ્વરભગવંતની સેવા સમાન વર્ણવેલી છે.

૪૦. અનંત ભવોમાં જંતુના ભોગો સિદ્ધ થયા છે, તોપણ આ જીવની (ભોગોથી) તૃપ્તિ થતી નથી; દરેક ભવમાં નવું નવું જાણે છે; તેમાં એક સંતોષનું પાલન સુખ કરનાર છે.

૪૧. લોકો વડે ઉપકારીનું જ ગૌરવ કરાય છે; છાયા અને ફળ વગરના તાલવૃક્ષ કોના વડે પાણીથી સિંચાય છે ?

૪૨. અશોક પુન્નાગ અને બીજા પણ સુગંધિત વૃક્ષો વડે તમારું ઉદ્યાન પૂર્ણ થઈ ગયું છે, જેમ તમારા પૂર્વજો વડે આખું કુળ પૂર્ણ છે. આ ઉદ્યાનમાં એકપણ વૃક્ષ પ્રકૃતિથી કઠિન, કુટીલ નથી, ફળો વડે ત્યાગ કરાયેલ નથી જ, અને પ્રણયીઓના નવા તાપનું શમન કરનાર છે.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૪૩. હે ! પુન્નાગ (પુરુષોમાં હાથી સમાન) સામે પુન્નાગ વૃક્ષ છે, હે ! અશોક (શોક વગરના) અશોકવન બહુ દૂર નથી, આશ્રય કર્યો છે, લક્ષ્મીરૂપી ફળનો જેમણે એવા હે રાજા ! લાખો ફળોમાં સર્વોત્તમ એવું આ શ્રીફળ વૃક્ષ છે.

૪૪. અદ્‌ભૂત ભુજાબળવાળું સાહસ રાજાઓને જ શોભે છે, અગ્નિધારી બ્રાહ્મણનું અને તુલાધારી વણિકનું લુંટારુ સાથે વેર યશને માટે નથી થતું, પોતાની જાતિથી ઉપરની ચેષ્ટા કલ્યાણ માટે નથી થતી, કીડીઓના કુળમાં પાંખની ઉત્પત્તિ શું મરણ તરફ ન લઈ જાય ? અર્થાત્ મૃત્યુ માટે થાય.

૪૫. સ્ત્રીઓના ચિત્તની, ધનની અને જીવનની ક્યારેક જો સ્થિરતા થાય તો સ્વર્ગ અને મોક્ષનો માર્ગ ભાંગી ગયો છે, એમ સમજવું.

૪૬. ઉર્ધ્વ, અધો, પૂર્વ, દક્ષિણ, પશ્ચિમ, ઉત્તર આ છએ દિશાની આઠ આઠ ચાર વિદિશાની (પ્રત્યેકની એક એક) ચાર અને મધ્યમરુચક પ્રદેશની ચાર. આમ છપ્પન દિક્કુમારીકા છે.

૪૭. તેઓ અનુક્રમે સંમાર્જન, જલનો છંટકાવ, દર્પણ દર્શન, કળશથી અભિષેક, પંખો વીંઝવો, ચામર વીંઝવો, દીપકનો પ્રકાશ અને નાળછેદાદિ એક એક કાર્ય અનુક્રમે તે તે દિશાની કન્યાઓ સમુહમાં કરે છે.

૪૮. તે દિક્કુમારીઓ સૂતિકાગૃહની દક્ષિણ, પૂર્વ અને ઉત્તર દિશાઓના કદલીગૃહોમાં જિનેશ્વર અને જિનની માતાનું એક એક ગૃહમાં મર્દન, સ્નાન અને હોમરક્ષા આદિ કાર્ય કરે છે.

૪૯. અજ્ઞાનરૂપી ઝેરથી થઈ છે મૂર્છા જેને એવા સમસ્ત જગતના લોકોને બોધ કરવા માટે તમે જાંગુલી મંત્ર સમાન છો હે દેવિ ! જેમના પુત્રરૂપી મંત્ર મોટા મોહરૂપી અંધકારને દૂર કરે છે.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૫૦. કલ્પના સ્વામી (૧૨ દેવલોકના) દશ, સૂર્ય-ચંદ્ર, ભવનપતિના ઈન્દ્રો વીશ અને બત્રીશ વ્યંતરેન્દ્રો આમ કુલ ચોસઠ ઈન્દ્રો છે.

૫૧. દષ્ટિ વડે જેઓ જોવાયે છતે પણ પૂર્વજન્મમાં થયેલા કુકર્મના મળના અવલેપ (પાપકર્મ) એકાએક દ્રવિત થઈ જાય છે એવા શ્રી નાભિરાજાના પુત્રના જન્મવખતના સ્નાનથી ભેગું થયેલું પાણી તમારા (કર્મરૂપી) રજને નિત્ય શાંત કરે.

૫૨. ત્રણ જગતમાં સર્વને અનુભવાયેલું આ પ્રગટ જ છે કે જે પાણીના સંપર્કથી પરિતાપનું અત્યંત શમન થાય છે, કંઈક અચિંત્ય માહાત્મ્ય છે કે જિનરૂપી ચંદ્રના ઉદય સમયે અભિષેકના પ્રસંગથી પ્રતાપ બલવત્તાને પામે છે.

૫૩. જેઓ અરિહંતની આગળ સુવર્ણના તથા રજતના જવ કે ચોખા વડે મોટા આઠ મંગલના આરંભને કરે છે, તેઓ ઈન્દ્ર અને ચક્રવર્તીની લક્ષ્મીને ભોગવીને આઠ કર્મના નાશવાળા સ્થાનનો આશ્રય કરે છે.

૫૪. નિર્વાણ નિકટ છે, અત્યંત દુસ્તર દશાનો પ્રાંતભાગ પણ મેળવાયો છે, અંધકારનો સમુહ શાંત થયો છે, તોપણ દીવાની જેમ મન સ્નેહને ઈચ્છે છે, તીર્થંકરપણું પાળવાયોગ્ય છે, અંતિમ ભવ છે, મને ત્રણ જ્ઞાન છે, તો પણ મારા વડે કર્મ વેદવું (ભોગવવું) જોઈએ, જેથી હું આજે પાણીગ્રહણ કરીશ.

૫૫. શરીર છે, પણ કાંતિના આધારરૂપ પાત્ર નથી. ઘોડો છે, પણ પવન જેવો વેગ તેમાં નથી. હાથી છે, પણ મદ ઝરવાની અતિશય ગંધથી ગુંજારવ કરતા ભમરાઓના સમુહથી સુંદર નથી (એટલે મદ ઝરતો હાથી નથી). છત્ર છે, પણ ગરમીથી રક્ષણ કરાતું નથી. થાકેલા હાથમાં ચામર લઈ સુંદરીઓ ઉભી છે, પણ તે મસ્તક તરફ વીંઝતી નથી. તો લોક શ્રદ્ધાવાળો થઈને કેમ (સંસારમાં) વારંવાર ભમે છે.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૫૬. શીલથી ધન્ય થયેલી આ કન્યા, આપના ચરણની સેવા કરવામાં હોંશિયાર એવી આ મારી પુત્રી, અક્ષીણ ભંડારવાળી આ લક્ષ્મી, કોઈપણ દોષ વગરનું આ સુંદર ઘર, ઉત્સાહવાળા આ મારા ભાઈઓ અને આ હું જે આપના ચરણકમળને વિશે ભમરાની જેમ સેવા કરવા તૈયાર છું, આમાંથી આપને જે કાંઈ મનમાં પ્રસંશનીય લાગે તે આજ્ઞા કરો; હું તે આપના ચરણે અર્પણ કરું.

૫૭. પ્રભુની પ્રીતિ અને સેવકનો ગુણોનો સમુહ તે બન્નેનો સાચો યોગ તે સ્નેહીઓને વિશે લક્ષ્મીને ફેલાવે છે, સ્વામિ-સેવકની જે એક એક વસ્તુઓની ઘટના તે વળી એકબીજાના પુરાણા ઋણથી મુક્ત થવું જ છે.

૫૮. જે બન્નેના પિતા (કચ્છ-મહાકચ્છ) ભિક્ષાના ક્રમને નહિ જાણતા, અધિક થાકેલા ગૃહસ્થને વિશે માંગવારૂપ દીનતા નહિ કરતા, હમણા મુનિ એવા પણ આ પ્રભુને છોડીને બીજા પાસે નથી ગયા તે ખરેખર પિતા પુત્રો એવા તમે યોગ્ય કર્યું છે.

૫૯. હું સેવક છું એ પ્રમાણે નિસ્પૃહોને વિષે (નિવેદન કરવું) સારું નથી, પરંતુ હે ભગવાન ! કાર્યનો આદેશ કરો; એ મારી પ્રાર્થના છે. મારા સમસ્ત દુષ્ટકર્મો ક્ષય થયા છે એવો હું પવિત્ર છું (પુન્યશાળી છું); એ પ્રમાણે પણ પોતાની સ્તુતિ છે, આ બધું તમારું જ છે, આ કોઈ શું નવી વાત છે ? તેથી સ્વામિની સમક્ષ શું વિનંતી કરું ? કેવી રીતે પૂજા કરું તે મને આદેશ કરો.

૬૦. એકેન્દ્રિય એવા કલ્પવૃક્ષ વડે પણ જે ઈચ્છિત હોય તે પહેલેથી સારી રીતે અપાય છે, કઠિન એવું ચિંતામણી પણ આપતો (આપવાના) અંતને માટે ઈચ્છા રાખતો નથી, બાળપણથી ઉપાસના કરાયેલી જે કામધેનુ પશુ હોવા છતાં

Jain Educationa International		For Personal and Private Use Only		www.jainelibrary.org

પોતે (ઈચ્છિત ફળ આપે છે) (પરંતુ આશ્ચર્ય છે કે) તે દાન હોંશિયાર ચેતનવંતા પણ મનુષ્ય વડે કેમ નથી કરાતું ?

૬૧. વૈમાનિક, જ્યોતિષ અને ભવનપતિના દેવો અનુક્રમે મણી, રત્ન અને સુવર્ણના કાંગરાવાળા રત્ન, સુવર્ણ અને રૂપા વડે ત્રણ ગઢને બનાવે છે.

૬૨. વચ્ચે ત્રણ ગાઉ ઉંચા ચૈત્યવૃક્ષની નીચે સિંહાસનો અને બીજા ગઢની વચ્ચે દેવચ્છંદને તથા

૬૩. સ્વામી પૂર્વમુખ બેસે ત્યારે અન્ય ત્રણ રૂપાદિને અને બહાર (સમવસરણની બહાર) ધર્મચક્ર તથા કમળ ઉપર ચાલવું તે બધું વ્યંતરો કરે છે.

૬૪. અગ્નિ ખૂણામાં સાધુ, વૈમાનીકની સ્ત્રી અને સાધ્વીઓ, નૈઋત્ય ખૂણામાં ભવનપતિ, વ્યંતર અને જ્યોતિષદેવો, વાયવ્ય ખૂણામાં ભવનપતિ, વ્યંતર અને જ્યોતિષીની સ્ત્રીઓ (દેવીઓ) અને ઈશાન ખૂણામાં વૈમાનિક દેવ, મનુષ્ય (પુરુષ) અને સ્ત્રીઓની પર્ષદા છે.

૬૫. બીજા ગઢમાં અન્યોન્ય વૈરી પશુ-પક્ષીઓ તથા ત્રીજા ગઢમાં દેવોના વાહનો અને ગમનાગમન ગઢની બહાર હોય છે.

૬૬. હે વત્સ ! પ્રવ્રજ્યા લઈને પુત્ર ગયે છતે વિશેષ વિષાદ વડે તરંગિત થયેલ, ક્યારેક અસહ્ય ઉદય પામેલ દુઃખ વડે વ્યાપ્ત થયેલ, દુર્ગમ એવી મૂર્ચ્છા વડે પરિચિત, આતંક વડે કલુષિત થયેલ, સેંકડો અંતરવેદના રૂપ (વ્યથા) જ્વાળાઓ વડે ભેગો થયેલો મારો દિવસ વર્ષ જેવો થાય છે.

૬૭. ભારે કર્મો વડે જે (ધર્મ) પહેલાના ભવે પ્રાપ્ત થયો નથી. આવતા ભવે લોકો વડે (ધર્મ) અવશ્ય મળવાનો નથી. તેથી કરીને કર્મમાંથી છિદ્ર મેળવીને હમણા જ તે (ધર્મ) પ્રાપ્ત થયો છે તો જીવો વડે કેમ આ ધર્મ સર્વ પ્રયત્નથી કરાતો નથી ?

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૬૮. પુન્ય વડે જ જીવોના વૈભવની પ્રાપ્તિ (થાય છે), એ પ્રમાણે જાણતા હોવા છતાં પણ અલ્પબુદ્ધિવાળો આ લોક ત્યાં (પુન્ય ઉપાર્જન કરવામાં) નિરત થતો નથી, પરંતુ મોહવાળો આળસુ થાય છે, વાયુની જેમ આ આયુષ્ય અસ્થિર છે. એ પ્રમાણે નથી જાણતો, નજીકમાં રહેલ મૃત્યુને પણ ધ્યાનમાં રાખતો નથી અને નજીકમાં રહેલી વૃદ્ધાવસ્થાને પણ માનતો નથી.

૬૯. હે દેવ ! તમારા કાર્યથી દોડતા એવા ઘોડાના ખુરથી ખોદાયેલી ઉડતી ધૂળથી હમણાં ભુલા પડેલા (સૂર્યના) સાત ઘોડા વડે વક્રગતિને પમાઈ છે (તેથી) સૂર્ય (તેમને સીધા રસ્તે ચાલવાનું) શીખવે છે.

૭૦. હે દેવ ! સંપૂર્ણ રાજ્યવાળી એવી પૃથ્વી પણ આપના વડે વશ કરાઈ છે, ખરેખર પવિત્ર પુરુષોનો આથી મહાન અહીં કોઈ વિષય નથી, સૂર્યની જેમ તમારી યાત્રા ક્યાંય પણ અટકતી નથી, તેથી બધા દેવો અને વિદ્યાધરો મસ્તક ઉપર તમારી સેવાને વહન કરે.

૭૧. બધા તમારા પૂર્વજો એવા કુલકરોના વિચાર કરતાની સાથે જ ઈચ્છિત ફળને કલ્પવૃક્ષની અંદર રહેલા દેવો આપતા હતા. તે ખેડુતો વડે જાણે વૃક્ષની અંદર રહેલી લજ્જાને પણ પ્રગટ કરીને આજે કરરૂપી દંડ અપાય છે. તેથી હે સ્વામી ! આપના વડે આ ત્યાગ કરાયા.

૭૨. ૧. નૈસર્પ, ૨. પાંડક, ૩. પિંગલ, ૪. સર્વરત્ન, ૫. મહાપદ્મ, ૬. કાલ, ૭. મહાકાલ, ૮. માણવ અને ૯. શંખ (આ નવ નિધિઓ છે).

૭૩. હે ! મુનિઓના સમુહ વડે વંદનને યોગ્ય ચરણકમળવાળા આપના દર્શનથી પોતાને વિકટ દુર્દિનમાંથી નીકળી ગયો હોય, વિપત્તિથી જાણે જુદો થયો હોય, દુર્જનોની સંગતિથી

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

દૂર થયો હોય, યમના મુખમાંથી જાણે બહાર નીકળ્યો હોય, નરકરૂપી અંધારા કૂવામાંથી જાણે બહાર નીકળ્યો હોય, ભવસાગરને તરી ગયો હોય, તેમ પોતાને હું માનું છું.

૭૪. મદથી ફૂલાયેલો લોક કેમ દેવની જેમ પોતાને યુવાન માને છે ? કોપના આટોપથી અસ્વસ્થ થયેલાને પુલકિત થયલો એવો તે કેમ વૈરી માને છે ? ખાઉધરાની જેમ અધિક ભોજનથી પણ કેમ સંતોષ પામતો નથી ? મસ્તક ઉપર મૃત્યુ ભમી રહ્યું છે, આગળ દુર્ગતિ છે, અને મોક્ષ તો બહુ જ દૂર છે.

૭૫. મારું ચક્રરત્ન છ ખંડની ભૂમિને જીતનારું છે, મારી માતાએ ૧૪ સ્વપ્નોને જોયેલા છે, બાહુબળને વિષે કોઈપણ રીતે બાહુબલી બળવાન છે, તેથી ચક્રી હું છું કે આ છે, એ પ્રમાણે સંશય થયો છે.

૭૬. આના વડે જ તપસ્વીની મુક્ત ન કરાઈ (તેથી) સુંદરીએ તપ કર્યું, આ નિર્લજ્જે પોતાના નાના ભાઈઓને વિષે પણ ઘૃણા કરી, આ નિર્લજ્જ દ્વેષનો ભંડાર છે, નિર્દય એવા આણે મારા વધને માટે ચક્ર છોડ્યું હતું જેથી મોટો હોવા છતાં નાનો જ છે, અમો બન્નેને ધિક્કાર છે કે અમે ક્રમનું ઉલ્લંઘન કર્યું છે.

૭૭. મર્યાદાનું ઉલ્લંઘન નહીં કરનારા જેઓ વડે પિતાના માર્ગનો પ્રથમ આશ્રય કરાયો, મારા તે નાના ભાઈઓ વડે યોગ્ય વિચાર કરાયો.

૭૮. લોક ઘરના સ્નેહને દૂર કરે છે, ધનને પથ્થરની જેમ માને છે, પુત્રને શત્રુ સમાન માને છે, શરીરને તાપ વડે બાળે છે, ભોગના ત્યાગમાં વિવેક ધર્મથી વિમુખ થયેલો કાર્યથી સંયમિત થાય છે, માનથી ઉદ્ધત મનવાળો માનવ કોઈપણ વિચાર કરતો નથી.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૭૯. જે પ્રમાણે શક્રેન્દ્રની એક આંગળીની જ્યોતિ જગતને પ્રકાશિત કરે છે, તે પ્રમાણે સો ચંદ્ર વડે પણ પ્રકાશ થતો નથી.

૮૦. કવિઓ તે દેવોના અતિઅદ્ભુત ચરિત્રનું વર્ણન શું કરે ? જેઓ એક એક કાર્યમાં રત થયેલા ઘણા મોટા કાળને પસાર કરે છે, હે રાજા ! સમસ્ત સ્તુતિનું પાત્ર અતિ બુદ્ધિશાળી એવા તમે એક જ છો, જેણે ધર્મ, અર્થ, કામ અને મોક્ષને સાધવામાં કોઈ અન્તરાય નથી.

૮૧. તમારા સિવાય બીજો કોણ પુરુષ છે ? પોતાના શિખરની શ્રેણીઓ વડે આકાશને સ્પર્શ કરતા આવા પ્રકારનું જિનેશ્વર ભગવાનનું નિરુપમ એવું પ્રાસાદરત્ન કરાવવા માટે સક્ષમ હોય ? ધીમે ધીમે જે ધજાદંડની ધજાનો છેડો ચલાયમાન થતા વાયુના વાવાથી લક્ષ્મીના સંગમની ગરમીથી દુઃખી થયેલો પોતાને વીંજતો અટકતો નથી.

૮૨. અહો આ આખો મનુષ્યલોક શૂન્ય જ થયો છે અને આ મનુષ્યલોકના હૃદયમાં હમણાં મોહનિદ્રા પ્રસરી ગઈ છે, છીપમાં મોતીની જેમ જિનરૂપી સૂર્ય (અસ્ત) થયે છતે અંધકાર વડે ગ્રસ્ત થતા વિશ્વનું કોણ રક્ષણ કરશે ?

૮૩. કવિઓનું કવિત્વ જેમ અલંકાર વિના શોભતું નથી તેમ મનુષ્યનું શરીર અલંકાર વિના શોભતું નથી, નિમિત્ત હોય ત્યારે ધાતુની (વ્યાકરણશાસ્ત્રમાં) ગુણ અને વૃદ્ધિ થાય છે, તેમ શરીરમાં પણ નિમિત્ત મળે ત્યારે ધાતુની (રસ, મેદ આદિ સાત ધાતુઓ) ગુણ કરવારૂપ વૃદ્ધિ થાય છે.

૮૪. અહો ! મારા વડે આખો પોતાનો ભવ ફોગટ પસાર કરાયો, ખરેખર ઉતાવળને માટે કોની જેમ મોટા તપને તપું; (કેમકે) પોતાના પિતાના કોઈપણ ગુણો વડે હું પ્રસિદ્ધ ન થયો, તેથી હમણાં મારું (જીવન) ભોગો વડે પૂર્ણ છે, (મને) ગૃહસ્થપણામાં (રહેવાની) ઈચ્છા નથી.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

૮૫. એ પ્રમાણે તેર ભવવાળું ઋષભદેવ ભગવાનનું ચરિત્ર અને ભરતચક્રીનું નાની કથાઓથી પ્રસિદ્ધ અને સુગમ ચરિત્રને સ્મૃતિને માટે વિમલસૂરિજીએ ઉદ્ધૃત કર્યું છે.

૮૬. આ (અજિતનાથરૂપી અનેકપ = હાથી) નિરંતર દાન (ભાવધર્મનું દાન) આપે છે (સામાન્ય હાથીનું દાન = મદ હંમેશા નથી ઝરતો), એમની ગતિ (મોક્ષગતિ) નમન કરવા યોગ્ય છે. (હાથીની ગતિ=ચાલ સારી પણ નમન કરવા યોગ્ય નથી), જગત આખાના પ્રતિકારકો = શત્રુઓનો વિષય તેઓ બનતા નથી (હાથીઓ તો સિંહ વગેરે શત્રુઓનો વિષય બને છે), આવું જાણીને લાંછનના બહાને હાથીઓનો સમૂહ જેમને આશ્રયીને રહ્યો છે તેવા અજિતનાથ રૂપી અનેકપનો (અનેકોનું રક્ષણ કરનારનો) હે સત્પુરુષો તમે આશ્રય કરો.

